अर्हम्

पुव्वायरियविरइयं

# चंदपण्णत्तिसुत्तं

आचार्यप्रवरश्रीमलयगिरिसूरिविरचितवृत्तिविभूषितम्

## (चन्द्रप्रज्ञप्तिसूत्रम्)

द्वितीयो भागः

प्रेरकाः

परमपूज्य-वैराग्यदेशनादक्ष-आचार्यदेव-श्रीमद्विजय-

हेमचन्द्रसूरीश्वराः

प्रकाशकः

श्रीमहावीर जैन विद्यालय

जैनआगमग्रन्थमाला ग्रन्थाङ्कः - ११(२)

पुव्वायरियविरइयं

# चंदपण्णत्तिसुत्तं

## (चन्द्रप्रज्ञप्तिसूत्रम्)

आचार्यप्रवरश्रीमलयगिरिसूरिविरचितवृत्तिविभूषितम्

## द्वितीयो भागः

* प्रेरकाः *

परमपूज्य-वैराग्यदेशनादक्ष-आचार्यदेव-श्रीमद्विजय-

हेमचन्द्रसूरीश्वराः

* संशोधकः सम्पादकश्च *

परमपूज्य-श्रीसीमन्धरजिनोपासक-आचार्यदेव-श्रीमद्विजय-हेमचन्द्रसूरीश्वराणां
शिष्याणुः मुनिरत्नबोधिविजयः

* प्रकाशकः *

श्रीमहावीरजैनविद्यालयः, मुम्बई

❋ ... *कृपावर्षा* ... ❋

सिद्धान्तमहोदधि-सच्चारित्रचूडामणि-सुविशालगच्छसर्जक-आचार्यदेवश्रीमद्विजय-**प्रेमसूरीश्वराः**

न्यायविशारद-वर्धमानतपोनिधि-गच्छाधिपति-आचार्यदेवश्रीमद्विजय-**भुवनभानुसूरीश्वराः**

समतासागर-संयमसमर्पणादिगुणगणार्णव-पन्न्यासप्रवरश्री-**पद्मविजयगणिवराः**

❋ ... *आज्ञाप्रसादः* ... ❋

सिद्धान्तदिवाकर-गीतार्थगच्छाधिपति-आचार्यदेवश्रीमद्विजय-**जयघोषसूरीश्वराः**


* **प्रथम संस्करण** : वी.सं.२५३९, वि.सं. २०६९, इ.स.२०१३

* **नकल** : ५००

* **मूल्य** : ५०० रूपये

* **प्रकाशक** : श्री महावीर जैन विद्यालय
मानद मंत्रीओ, अगस्त क्रांति मार्ग, मुंबई - ४०० ०३६.

* **प्राप्तिस्थान** : **(१) प्रकाशक**

**(२) श्री महावीर जैन विद्यालय**
श्री कच्छी विशा ओसवाल जैन महाजन वाडी,
९९/१०१, केशवजीनायक रोड, दूसरा माला,
चींच बंदर, मुंबई-९.

**(३) श्री महावीर जैन विद्यालय**
पालडी बस स्टेन्ड के पास, पालडी,
अमदावाद-३८०००७.

**(४) सरस्वती पुस्तक भंडार**
हाथीखाना, रतनपोल, अमदावाद-१.

**(५) आ. ॐकारसूरिज्ञानमंदिर**
सुभाष चोक, गोपीपुरा, सूरत.

टाईपसेटींग : **श्रीपार्श्व कोम्प्युटर्स**, ५८, पटेल सोसायटी, जवाहरचोक, मणिनगर, अमदावाद-८.

प्रिन्टर्स : **शिवकृपा ओफसेट प्रिन्टर्स**, जे-के ब्लोक, रवि एस्टेट, दूधेश्वर, अमदावाद-४.

Jaina-Āgama-Series No. 11 (2)

# CHANDAPANNATTI SUTTAṀ

## ( CHANDRAPRAGNAPTI SŪTRAṀ )

With The Commentary By

**ĀCHĀRYA ŚRI MALAYGIRISŪRI MAHĀRĀJA**

**PART II**

EDITOR
DISCIPLE OF
**ĀCHĀRYADEV ŚRIMAD VIJAY HEMCHANDRASŪRĪSHWÁR MAHĀRĀJA**
MUNI RATNABODHI VIJAY

**Publisher**
**ŚRĪ MAHĀVĪRA JAINA VIDYĀLAYA**
MUMBAI 400 036

First Edition :

Vīra Erā 2539 / Vikram Erā 2069 / A.D. 2013

Copies : 500

Price : Rs. 500

Published by :

The Secretary,

**ŚRĪ MAHĀVĪRA JAINA VIDYĀLAYA**

August Kranti Marg, Mumbai-400 036.

Available At :

(1) **Publisher**

(2) **ŚRĪ MAHĀVĪRA JAINA VIDYĀLAYA**
Shri Katchi Visha Oswal Jain Mahajan Wadi,
99/101, Keshavji Nayak Road, 2nd Floor, Chinch Bunder, Mumbai-9.

(3) **ŚRĪ MAHĀVĪRA JAINA VIDYĀLAYA**
Near Paldi Bus Stand, Paldi, Ahmedabad-380007.

(4) **Saraswati Pustak Bhandar**
112, Hathikhana, Ratanpole, Ahmedabad, Gujarat.
Pin-380001. Tel. : 079-25356692

(5) **Ach.Omkarsuri Gyanmandir**
Subhash chowk, Gopipura, Surat.

Composed By :
**Shree Parshva Computers**
58, Patel Society, Jawahar Chowk, Maninagar, Ahmedabad. Tel : 079-30912149

જૈન આગમોના સંશોધિત-સંપાદિત સંસ્કરણ તૈયાર કરવાનો પ્રારંભ વિ.સં. ૨૦૧૭ માં આગમપ્રભાકર મુનિશ્રી **પુણ્યવિજયજી** મ.સા. આદિ દ્વારા થયો. તેઓશ્રીના કાળધર્મ પછી આગમગ્રંથોનું સંપાદનકાર્ય આગમપ્રજ્ઞ મુનિશ્રી **જંબૂવિજયજી** મ.સા.એ આગળ વધાર્યું. તેઓશ્રીના કાળધર્મ પછી આ જવાબદારી શાસ્ત્રસંશોધક આ.વિજય **મુનિચન્દ્રસૂરિ** મ.સા. અને શ્રુતભાસ્કર આ.શ્રી **ધર્મધુરંધરસૂરિ** મ.સા.એ સ્વીકારી.

આ.શ્રી મુનિચન્દ્રસૂરિજી સંપાદિત उववाइसुत्तं ટીકા સાથે ગયા વર્ષે પ્રગટ થયું છે.

વૈરાગ્યદેશનાદક્ષ પૂ.આ.ભ.શ્રી **હેમચન્દ્રસૂરિ** મ.સા.ના વિદ્વાન શિષ્યરત્ન મુનિશ્રી રત્નબોધિવિજય મ.સા. **શ્રીચન્દ્રપ્રજ્ઞપ્તિઉપાંગઆગમગ્રંથ**નું અદ્યાવધિ અપ્રગટ આ.શ્રી. **મલયગિરિસૂરિ** મ.ની **ટીકા** સાથે સંપાદન કરી રહ્યા છે અને શ્રીજિનશાસનઆરાધનાટ્રસ્ટ દ્વારા તેનું પ્રકાશન થવાનું છે એવા સમાચાર આ.મુનિચન્દ્રસૂરિ મ.સા.ને મળતાં તેઓએ પૂ.આ.ભ. શ્રી હેમચન્દ્રસૂરિ મ.સા.ને વિનંતી કરી કે આ ગ્રંથ શ્રીમહાવીરજૈનવિદ્યાલયની જૈન આગમ ગ્રંથમાલામાં પ્રકાશિત કરવા માટે આપશ્રી સંમતિ આપો. પૂજ્યશ્રીએ સહર્ષ સંમતિ આપતાં અમો હર્ષાન્વિત બન્યા. શ્રીચંન્દ્રપ્રજ્ઞપ્તિ આગમગ્રંથનું અદ્યાવધિ અપ્રગટ ટીકા સાથે પ્રકાશન કરતાં અમે ખૂબ આનંદ અનુભવીએ છીએ.

આ ગ્રંથનું સુંદર ટાઈપસેટીંગ કરનાર શ્રીપાર્શ્વ કોમ્પ્યુટર્સવાળા વિમલભાઈને આ પ્રસંગે ધન્યવાદ આપીએ છીએ.

લિ.

**પ્રકાશક**

# આવકાર

**શ્રીચન્દ્રપ્રજ્ઞપ્તિઉપાંગ** ગ્રંથ આ. **શ્રીમલયગિરિસૂરિ** મ.ની ટીકા સાથે પ્રથમવાર પ્રકટ થાય છે. તે ઘણા હર્ષનો વિષય છે.

આગમપ્રભાકર મુનિશ્રી **પુણ્યવિજયજી** મ.સા.એ પ્રારંભ કરેલી અને આગમપ્રજ્ઞ મુનિશ્રી **જંબૂવિજયજી** મ.સા.એ આગળ વધારેલી આ જૈનાગમગ્રંથમાલામાં બાકી રહેતા આગમ ગ્રંથો સંપાદિત કરવાનું મેં અને આ. **ધર્મધુરંધરસૂરિજી**એ સ્વીકાર્યું. ઉપાંગગ્રંથો સંપાદન કરવાનો મેં પ્રારંભ કર્યો અને બાકી રહેતા અંગગ્રંથોનું કાર્ય આ. ધર્મધુરંધરસૂરિજીએ શરૂ કર્યું.

મુનિશ્રી રત્નબોધિવિજયજી મ. ચંદ્રપ્રજ્ઞપ્તિગ્રંથનું ટીકા સાથે અનેક પ્રાચીન પ્રતોના આધારે સંપાદન કરી રહ્યા છે તે જાણવા મળતાં અમે વૈરાગ્યદેશનાદક્ષ પૂ.આ.ભ. **હેમચન્દ્રસૂરિ** મ.સા.ને આ ગ્રંથના પ્રકાશનનો લાભ શ્રીમહાવીરજૈનવિદ્યાલયની જૈનાગમગ્રંથમાળાને આપવા વિનંતી કરી. પૂજ્યશ્રીએ સંમતિ આપી.

આ ગ્રંથ શ્રીજિનશાસનઆરાધનાટ્રસ્ટ દ્વારા ટકાઉ કાગળ ઉપર પણ પ્રકાશિત થઈ રહ્યો છે. ગ્રંથના સુઘડ મુદ્રણ અને ટકાઉ કાગળ, ઉત્તમ બાઈન્ડીંગ વગેરે માટે પણ પૂજ્યશ્રીનું માર્ગદર્શન મળ્યું છે. આ માટે પૂજ્યશ્રીના ઋણી છીએ.

અપ્રગટગ્રંથનું સંપાદનકાર્ય અતિ અતિ શ્રમસાધ્ય હોય છે. સંપાદકશ્રીને ખૂબ ખૂબ ધન્યવાદ. વિદ્વદ્વર્ય મુનિરાજશ્રી સૂર્યપ્રજ્ઞપ્તિ વગેરે ગ્રંથોનું પણ આવું સુંદર સંપાદન કરે એજ અભિલાષા.

લી. **પૂ.આ.ભ.શ્રી ભદ્રસૂરીશ્વરજી મ.સા.**ના વિનેય
**પૂ.મુનિરાજશ્રી જિનચન્દ્ર વિ.મ.સા.**ના શિષ્ય
આ.વિજય **મુનિચન્દ્રસૂરિ**

ચૈત્ર સુદ ૧૩ વિ.સં. ૨૦૬૯
પ્રભુવીર જન્મકલ્યાણકદિન
શ્રી ભીલડીયાજી તીર્થ,
વિજયભદ્ર ચે. ટ્રસ્ટ ધર્મશાળા,
પાર્શ્વભક્તિનગર.

# સંક્ષેપમાં સાર

એક ભણેલો માણસ ફરવા નીકળ્યો. ફરતા ફરતા તે એક નદી પાસે આવ્યો. કિનારે ઊભેલી નાવડીમાં બેઠેલા નાવીકને ભાડું આપી તે નાવમાં બેસી સામે કિનારે જવા લાગ્યો. રસ્તાનો સમય પસાર કરવા તેણે નાવીકને પૂછ્યું, 'શું તું ઈતિહાસ ભણ્યો છે ?' નાવીકે કહ્યું, 'ના, હું તો અંગુઠાછાપ છું.' પેલા ભાઈએ કહ્યું, 'તારી ૨૫ ટકા જીંદગી પાણીમાં ગઈ.' થોડીવાર પછી તેણે નાવીકને પૂછ્યું, 'શું તું ભૂગોળ ભણ્યો છે ?' નાવીકે કહ્યું, 'ના, મને લખતા-વાંચતા આવડતું નથી.' પેલા ભાઈએ કહ્યું, 'તારી ૫૦ ટકા જીંદગી પાણીમાં ગઈ.' થોડીવાર પછી તેણે ફરી નાવીકને પૂછ્યું, 'શું તું વિજ્ઞાન ભણ્યો છે ?' નાવીકે કહ્યું, 'ના, હું નિશાળે ગયો નથી.' પેલા ભાઈએ કહ્યું, 'તારી ૭૫ ટકા જીંદગી પાણીમાં ગઈ.' થોડીવાર પછી નાવીકને નદીમાં વમળ દેખાયું. નાવડી એ દિશામાં જ આગળ વધી રહી હતી. જો નાવડી વમળમાં ફસાઈ જાય તો નાવડી, નાવીક અને પેલા ભાઈ ત્રણે ડૂબી જાય. નાવીકે વિચાર્યું, 'જો નાવડી છોડીને પાણીમાં કૂદી પડીએ અને તરતા તરતા સામા કનિારે પહોંચીએ તો બચી શકાશે, નહીંતર નહીં.' એટલે તેણે પેલા ભાઈને પૂછ્યું, 'તમને તરતા આવડે છે ?' પેલા ભાઈએ જવાબ આપ્યો, 'ના, એ તો હું શીખ્યો નથી.' નાવીકે કહ્યું, 'તમારી સો ટકા જીંદગી પાણીમાં.' એમ કહી એ તો પાણીમાં કૂદીને તરતો તરતો સામા કિનારે પહોંચી ગયો. પેલા ભાઈ નાવડી સાથે વમળમાં ફસાઈ ગયા અને ડૂબી ગયા.

પેલા ભાઈને બધુ જ્ઞાન હતું. છતાં તરવાના જ્ઞાનના અભાવે તે ડૂબી ગયા. તેમ દુન્યવી જ્ઞાન ગમે તેટલું હોય પણ જો સમ્યગ્જ્ઞાન આપણી પાસે ન હોય તો આપણે આ સંસારસમુદ્રમાં ડૂબી જવાના. સમ્યગ્જ્ઞાન આપણને સંસારનું અને આત્માનું સાચું સ્વરૂપ સમજાવે છે. સંસારના નાશ અને મુક્તિની પ્રાપ્તિના ઉપાયો એ બતાવે છે. દુન્યવી જ્ઞાન ઓછું હશે કે નહીં હોય અને સમ્યગ્જ્ઞાન હશે તો પણ આપણે સંસારસમુદ્રને પાર ઊતરી જવાના.

સમ્યગ્જ્ઞાનનું જીવનમાં ખૂબ મહત્ત્વ છે. સમ્યગ્જ્ઞાન એટલે ભગવાને બતાવેલા શાસ્ત્રોનું જ્ઞાન. મુખ્ય શાસ્ત્રોને આગમ કહેવાય છે. હાલ આવા ૪૫ આગમો છે. તેમાંનું એક આગમ એટલે **શ્રીચન્દ્રપ્રજ્ઞપ્તિ**. આ મૂળગ્રન્થની રચના **અજ્ઞાત પૂર્વાચાર્ય ભગવંતે** કરી છે. તેની ઉપર **પૂજ્ય મલયગિરિસૂરિ મહારાજે** હૃદયંગમ શૈલીમાં વૃત્તિ રચી છે.

વરસો સુધી આ ગ્રંથરત્ન અપ્રગટ રહેલ. પૂજ્ય ગુરુદેવશ્રી વૈરાગ્યદેશનાદક્ષ આચાર્યભગવંત શ્રીમદ્વિજય **હેમચન્દ્રસૂરીશ્વરજી** મહારાજાની કૃપા અને આશીર્વાદથી આ ગ્રન્થરત્નનું હસ્તલિખિત પ્રતમાંથી પ્રથમ લિપ્યંતર કર્યું, પછી અલગ અલગ હસ્તલિખિત પ્રતોમાંથી તેનું સંશોધન કર્યું અને આજે આ ગ્રન્થરત્ન પ્રકાશિત થઈ રહ્યું છે.

આ ગ્રંથરત્નમાં જ્યોતિષચક્રના પાંચ પ્રકારો - ચંદ્ર, સૂર્ય, ગ્રહ, નક્ષત્ર અને તારા સંબંધી લગભગ બધી જ જાણકારી આપેલ છે. આ ગ્રન્થરત્નના અભ્યાસથી તેનો સૂક્ષ્મતમ બોધ થાય છે.

આ ગ્રન્થરત્નમાં વીસ પ્રાભૃતો છે. પહેલા ભાગમાં દશ પ્રાભૃતો પ્રકાશિત થયા છે. આ બીજા ભાગમાં બાકીના દશ પ્રાભૃતો પ્રકાશિત થઈ રહ્યા છે. અગ્યારમા પ્રાભૃતમાં વર્ષોની શરૂતા ક્યારે થાય છે ? એ બતાવ્યું છે. બારમા પ્રાભૃતમાં પાંચ પ્રકારના વર્ષો અને માસોના મુહૂર્તો અને અહોરાત્રોનું પ્રમાણ કહ્યું છે. તેરમા પ્રાભૃતમાં ચન્દ્રની વૃદ્ધિ-હાનિ શી રીતે થાય છે ? એ જણાવ્યું છે. ચૌદમા પ્રાભૃતમાં ચન્દ્રની જ્યોત્સ્ના ક્યારે વધુ હોય છે ? એ બતાવ્યું છે. પંદરમા પ્રાભૃતમાં ચન્દ્ર વગેરે પાંચ પ્રકારના જ્યોતિષ્વિમાનોમાંથી કયું વિમાન શીઘ્ર ગતિવાળું છે ? એનું વર્ણન કર્યું છે. સોળમા પ્રાભૃતમાં જ્યોત્સનાનું લક્ષણ બતાવ્યું છે. સત્તરમા પ્રાભૃતમાં ચન્દ્ર અને સૂર્યના ચ્યવન અને ઉપપાત કહ્યા છે. અઢારમા પ્રાભૃતમાં ચન્દ્ર-સૂર્ય વગેરેની પૃથ્વીતલથી ઉપર ઊંચાઈ કેટલી છે ? તેનું નિરૂપણ કર્યું છે. ઓગણીસમા પ્રાભૃતમાં સર્વલોકમાં રહેલા ચન્દ્રો-સૂર્યોની સંખ્યા બતાવી છે. વીસમા પ્રાભૃતમાં ચન્દ્ર વગેરેનું વિશેષ સ્વરૂપ કહ્યું છે.

આ ગ્રન્થરત્ન સંબંધી વિશેષ માહિતી પહેલા ભાગની વિસ્તૃત પ્રસ્તાવનામાં લખી છે. તે ત્યાંથી જાણી લેવી.

પૂજ્ય ગુરૂદેવશ્રીની કૃપાના બળે જ આ કાર્ય કરવા હું સમર્થ થયો છું. હું સદાય પૂજ્યશ્રીનો ઋણી રહીશ.

(૧) શ્રીજિનશાસન આરાધના ટ્રસ્ટ, પાટણ (૨) શ્રીકૈલાસસાગરસૂરિ જ્ઞાનમંદિર, કોબા (૩) પૂજ્ય આ.કલ્યાણબોધિસૂરિ મહારાજ (૪) પૂજ્ય પં.અપરાજિતવિજયજી મહારાજ (૫) પૂજ્ય આ. જગચ્ચન્દ્રસૂરિ મહારાજ (ડહેલાવાળા) (૬) નડિયાદ શ્રી શ્વેતાંબર મૂર્તિપૂજક જૈન સંઘ, નડિયાદ - આ મહાત્માઓ, સંસ્થાઓ અને સંઘોએ આ ગ્રન્થરત્નના સંશોધન માટે ભિન્ન-ભિન્ન હસ્તલિખિત પ્રતોની ફોટોકોપિઓ મને આપીને મારી ઉપર ઘણો ઉપકાર કર્યો છે. આ પ્રસંગે તેમનો ખૂબ ખૂબ આભાર માનું છું. આ

ગ્રન્થરત્નના સંશોધનમાં ઉપયોગી થયેલ હસ્તલિખિત પ્રતોનો પરિચય પહેલા ભાગની પ્રસ્તાવનામાં આપેલ છે.

ગ્રન્થને અંતે સાત પરિશિષ્ટો તૈયાર કર્યા છે. તેમાં અવતરણસૂચિ, અવતરણોના મૂળગ્રન્થોની સૂચિ, શબ્દસૂચિ, ટીકામાં લખેલા શાસ્ત્રનામોની સૂચિ, મૂળમાં લખેલા શાસ્ત્રનામોની સૂચિ, ટીકામાં લખેલા વિશેષનામોની સૂચિ અને મલયગિરિશબ્દાનુશાસનના સૂત્રોની આકારાદિક્રમે સૂચિ બતાવી છે.

આ ગ્રન્થરત્નના સંશોધન-સંપાદનમાં કંઈ પણ ક્ષતિ રહી ગઈ હોય તો તેની ક્ષમા યાચું છું.

આ ગ્રન્થરત્નના અભ્યાસ દ્વારા બધા અધિકારી સંયમીઓ આગમોના મર્મને જાણનારા બને એ જ શુભાભિલાષા.

લિ.

**પરમ પૂજ્ય સીમન્ધરજિનોપાસક આચાર્યદેવ**
**શ્રીમદ્વિજય હેમચન્દ્રસૂરીશ્વરજી મહારાજાનો**
ચરણોપાસક
મુનિ રત્નબોધિવિજય

અમદાવાદ
વિ.સં.૨૦૬૮, ચૈત્ર સુદ ૧૪
(સિદ્ધાંતમહોદધિ પૂજ્ય પ્રેમસૂરીશ્વરજી
મહારાજનો ૭૬મો આચાર્યપદપ્રદાનદિન)

# जीवे सस्सुत्ते संसारे न विणस्सई।

संसारपारावारमुल्लङ्घयितुकामानां मुमुक्षूणां सम्यग्ज्ञानं नौकल्पम्। मिथ्याज्ञानं जीवान्संसारे पातयति। सम्यग्ज्ञानं संसारस्वरूपं संसारनाशोपायं मुक्तिप्राप्त्युपायञ्च दर्शयति।

सम्यग्ज्ञानं जीवनेऽतीवावश्यकम्। सम्यग्ज्ञानमर्हत्प्ररूपितशास्त्रज्ञानरूपम्। मुख्य-शास्त्राणि आगमा इत्युच्यन्ते। साम्प्रतमीदृशाः पञ्चचत्वारिंशदागमा वर्त्तन्ते। **श्रीमती चन्द्रप्रज्ञप्तिस्**तेभ्य एक आगमः। अयं मूलग्रन्थो विरचितोऽज्ञातनामभिः **पूर्वाचार्यैः**। **श्रीमलयगिरिसूरि**भिरस्या हृदयङ्गमा वृत्तिर्निर्मिता। अद्यावधीदं ग्रन्थरत्नमप्रकाशित-मासीत्। तत्त्वत्रयकृपया मया हस्तलिखितप्रतिभ्यः प्रथममिदं लिप्यन्तरीकृतम्। ततो भिन्नभिन्नहस्तलिखितप्रतिभ्य इदं संशोधितं सम्पादितञ्च। इत्थमिदमद्य प्रकाशितम्।

चन्द्र-सूर्य-ग्रह-नक्षत्र-तारात्मकपञ्चविधज्योतिष्चक्रस्य सर्वं स्वरूपमस्मिन्ग्रन्थ-रत्ने प्रतिपादितम्। अत्र विंशतिः प्राभृतानि सन्ति। तत्र दश प्राभृतानि प्रथमे भागे प्रकाशितानि। शेषाणि दश प्राभृतान्यस्मिन्द्वितीये भागे प्रकाश्यन्ते। तत्रैकादशं प्राभृतं संवत्सराणामादिं प्रतिपादयति। द्वादशं प्राभृतं पञ्चविधसंवत्सरमासानां मुहूर्त्ता-होरात्रप्रमाणं प्रदर्शयति। त्रयोदशं प्राभृतं चन्द्रस्य वृद्धिहानी निरूपयति। चतुर्द्दशं प्राभृतं चन्द्रस्य ज्योत्स्ना कदा प्रभूता भवति ? इति प्रतिपादयति। पञ्चदशं प्राभृतं चन्द्रादिपञ्चभ्यः कः शीघ्रगतिरिति प्ररूपयति। षोडशं प्राभृतं ज्योत्स्नाया लक्षणं स्पष्टयति। सप्तदशं प्राभृतं चन्द्रसूर्ययोश्च्यवनोपपातौ विशदीकरोति। अष्टादशं प्राभृतं चन्द्रसूर्यादीनां भूमितलादूद्धर्वमुच्चत्वप्रमाणं दर्शयति। एकोनविंशतितमं प्राभृतं सर्व-लोकवर्त्तिचन्द्रसूर्याणां सङ्ख्यां प्रतिपादयति। विंशतितमं प्राभृतं चन्द्रादीनां विशेषस्वरूपात्मकमनुभावं निदर्शयति।

(१) पाटणस्थश्रीजिनशासनआराधनाट्रस्टः, (२) कोबास्थश्रीकैलाससागरसूरिज्ञानमन्दिरं, (३) पूज्य आचार्यकल्याणबोधिसूरिः, (४) पूज्यः पन्न्यासअपराजितविजयः, (५) पूज्य आचार्यजगच्चन्द्रसूरिः (डहेलावाला), (६) नडियादस्थनडियादश्रीश्वेताम्बरमूर्तिपूजकजैनसङ्घश्च - एते महात्मसंस्थासङ्घा अस्य ग्रन्थरत्नस्य संशोधनकार्ये हस्तलिखितप्रतिफोटोकोप्यर्पणेनातीव सहायीभूताः। अत्र प्रसङ्गे धन्यवादार्पणपूर्वंताननुमोदयामि।

अस्य ग्रन्थस्य संशोधनकार्ये उपयुक्तानां प्रतीनां परिचयः प्रथमभागप्रस्तावनाया ज्ञेयः।

ग्रन्थान्ते सप्त परिशिष्टानि न्यस्तानि। तेष्ववतरणसूचिरवतरणमूलग्रन्थसूचिः शब्दसूचिर्वृत्त्युक्तशास्त्रनामसूचिर्मूलोक्तशास्त्रनामसूचिर्वृत्त्युक्तविशेषनामसूचिर्मलयगिरिशब्दानुशासनसूत्रसूचिश्च दर्शिता।

परमपूज्य-संसारपारावारनिर्यामककल्प-परमकृपालु-गुरुदेव-आचार्यदेव-श्रीमद्विजय**हेमचन्द्रसूरीश्वराणां** शुभ-कृपा-प्रेरणा-मार्गदर्शनैरेव मयेदं ग्रन्थरत्नं संशोधितं सम्पादितञ्च। अत्र प्रसङ्गे पूज्यपादान् कृतज्ञभावेन वन्दे।

अस्य ग्रन्थरत्नस्य संशोधने सम्पादने च मतिमान्द्याद्या काचित् क्षतिर्जाता स्यात्तत्कृते क्षमां याचे बहुश्रुतांश्च तत्सम्मार्जनकृते प्रार्थये।

अस्य ग्रन्थरत्नस्य पठनेन सर्वेऽधिकृतसंयमिन आगममर्मज्ञा भवन्त्वित्यभिलषति

– **निर्वेदमूर्त्ति-आचार्यदेव-श्रीमद्विजय-**
**हेमचन्द्रसूरीश्वराणां**
शिष्याणुः
मुनिरत्नबोधिविजयः।

राजनगरम्,
वि.सं.२०६८, अक्षयतृतीया

# In Short

For the living beings wishing to cross the ocean of worldly state and to attain the shore of salvation, SamyagGnan (The knowledge imparted by the omniscients) is like a ship. MithyaGnan (false knowledge) makes the livingbeings to wander in this world. SamyagGnan shows the true nature of the world, the way to cross the worldly state and the way to achieve salvation.

SamyagGnan is very much essential in our life. We get SamyagGnan by the study of the scriptures written on the basis of preachings of the teerthankaras. The principle scriptures are called Agamas. At present, there are forty-five Agamas. '**ChandapannattiSuttam**' is one of them. It was composed by an **unknown Acharya Maharaj** of the past. **Acharya Shree Malayagirisuri Maharaj** composed a simple and lovely commentary on it. 'Chandapannattisuttam' with its comentary was not published till now. By the divine grace of Tattvatray (Bhagwaan, Gurudev and religion) I first prepared a script of this scripture and then corrected and edited it with the help of various manuscripts of this scripture. Thus, this scripture is being published today.

The Jyotishchakra is of five types, namely - moon, sun, planet, constellation and star. All the details of this fivefold Jyotishchakra are described in this scripture. There are twenty prabhrutas (chapters) in it. Ten Prabhrutas were published in the first part. The rest ten prabhrutas are published in this second part. The topics of these prabhrutas can be known from the index.

(1) Shree Jinshasan Aradhana Trust of Patan

(2) Shree Kailassagarsuri Gyanmandir of Koba.

(3) Acharya Kalyanbodhisuri Maharaj

(4) Pannyas Aparajitvijay Maharaj

(5) Acharya Jagacchandrasuri Maharaj (Dehlawala)

(6) Nadiad Shree Shwetambar Murtipujak Jain Sangh.

These Mahatmas, Institutions and Sanghas have been very helpful in this correction-work by supplying the photocopies of the manuscripts. At this event, I gratefully thank them and praise them for their help.

The introduction of the manuscripts used in this correction-work can be known from 'A Glance', the preface of the first part.

At the end, I have prepared seven appendixes which show list of quotations in the commentary, list of scriptures from which the quotations are taken in the commentary, list of words in the text, list of scripture--names in the commentary, list of scripture-names in the text, list of chief--names in the commentary and list of sutras in MalaygiriShabdanushasan.

I have corrected and edited this scripture by the blessings, inspiration and guidance of my gurudev Hisholiness Param Pujya Acharyadev Shreemad Vijay Hemchandrasurishwarji Maharaj. At this moment, I gratefully bow to him with reverence.

If any mistake has remained in the correction and in the edition of this scripture, I apologize for it and entreat the scholars to correct it.

I wish that after studying this scripture all authorized ascetics should become scholars of the doctrines of Jain Agamas.

- Disciple of
Hisholiness
Param Pujya Acharyadev Shreemad Vijay
**Hemchandrasurishwarji Maharaj**
Muni Ratnabodhi Vijay

Sirohi
2069 V.E.
27/6/2013

# विषयानुक्रमः


| प्राभृतम् | प्राभृत-प्राभृतम् | विषयः | पृष्ठ क्र. |
|---|---|---|---|
| ११ | - | संवत्सराणामादिः। | ४२१-४२९ |
| १२ | - | पञ्चविधसंवत्सराणां पञ्चविधमासानाञ्च मुहूर्त्तप्रमाणमहोरात्रप्रमाणञ्च। | ४३०-४९२ |
| १३ | - | चन्द्रस्य वृद्धिहानी। | ४९३-५१२ |
| १४ | - | चन्द्रस्य ज्योत्स्ना। | ५१३-५१५ |
| १५ | - | चन्द्रादीनां मध्ये कः शीघ्रगतिः ? | ५१६-५३६ |
| १६ | - | ज्योत्स्नाया लक्षणम्। | ५३७-५३८ |
| १७ | - | चन्द्रसूर्ययोश्च्यवनोपपातौ। | ५३९-५४१ |
| १८ | - | चन्द्रादीनां समतलभूभागादूर्द्ध्वमुच्चत्वप्रमाणम्। | ५४२-५६१ |
| १९ | - | सर्वस्मिन्लोके कति चन्द्राः सूर्याश्च ? | ५६२-५९७ |
| २० | - | चन्द्रादीनामनुभावः। | ५९८-६२२ |
| परिशिष्टम् - १ | | श्रीचन्द्रप्रज्ञप्तिवृत्त्यन्तर्गतानामवतरणानामकारादिक्रमेण सूचिः। | ६२३-६२८ |
| परिशिष्टम् - २ | | श्रीचन्द्रप्रज्ञप्तिवृत्त्यन्तर्गतानामवतरणानां मूलग्रन्थानाम-कारादिक्रमेण सूचिः। | ६२९ |
| परिशिष्टम् - ३ | | श्रीचन्द्रप्रज्ञप्तिमूलान्तर्गतानां शब्दानामकारादिक्रमेण सूचिः। | ६३०-६९० |
| परिशिष्टम् - ४ | | श्रीचन्द्रप्रज्ञप्तिवृत्तावुक्तानां शास्त्रनाम्नामकारादिक्रमेण सूचिः। | ६९१ |
| परिशिष्टम् - ५ | | श्रीचन्द्रप्रज्ञप्तिमूले उक्तानां शास्त्रनाम्नामकारादिक्रमेण सूचिः। | ६९२ |
| परिशिष्टम् - ६ | | श्रीचन्द्रप्रज्ञप्तिवृत्तावुक्तानां विशेषनाम्नामकारादिक्रमेण सूचिः। | ६९२ |
| परिशिष्टम् - ७ | | मलयगिरिशब्दानुशासनगतसूत्राणामकारादिक्रमेण सूचिः। | ६९३-७४० |

पुव्वायरियविरइयं श्रीमलयगिरिसूरिविरचितवृत्तिविभूषितं

# चंदपण्णत्तिसुत्तं

## द्वितीयो भागः

### एकादशं प्राभृतम्

तदेवमुक्तं दशमं प्राभृतम्। साम्प्रतमेकादशमारभ्यते। तस्य चायमर्थाधिकारो यथा संवत्सराणामादिर्वक्तव्य इति। ततस्तद्विषयं प्रश्नसूत्रमाह —

**मू० ता कहं ते संवच्छराणादी आहितातिं वदेज्जा ?**

**टी० 'ता कहं ते'** इत्यादि। **'ता'** इति पूर्ववत्, **कथं** - केन प्रकारेण भगवन् ! **त्वया संवत्सराणामादिराख्यात इति वदेत्** ?

भगवानाह —

**मू० तत्थ खलु इमे पंच संवच्छरा पण्णत्ता (तं०) - चंदे चंदे अभिवड्ढिए चंदे अभिवड्ढिए। ता एएसि णं पंचण्हं संवच्छराणं पढमस्स चंदसंवच्छरस्स के आई आहिया त्ति वइज्जा ? ता जे णं पंचमस्स अभिवड्ढियसंवच्छरस्स पज्जवसाणे से णं पढमस्स चंद-संवच्छरस्स आदी अणंतरपुरक्खडे समए।**

**टी० 'तत्थ खलु'** इत्यादि। **तत्र** संवत्सरविचारविषये **खल्विमे पञ्च संवत्सराः प्रज्ञप्तास्तद्यथा चन्द्रश्चन्द्रोऽभिवर्द्धितश्चन्द्रोऽभिवर्द्धितः**। एतेषां च स्वरूपं प्रागेवोपदर्शितम्। भूयः प्रश्नयति- **'ता एएसि ण'**मित्यादि। **'ता'** इति पूर्ववत्, **एतेषां पञ्चानां संवत्सराणां** मध्ये **प्रथमस्य चान्द्रस्य संवत्सरस्य (क) आदिराख्यात इति वदेत्**? भगवानाह- **'ता जे ण'**मित्यादि। **यत्पाश्चात्य-**युगवर्त्तिनः **पञ्चमस्य संवत्सरस्याभिवर्द्धितरूपस्य (पर्यवसानं-)** पर्यवसान-समयस्तस्मादनन्तरो यः **पुरस्कृतो** - [अभितः](भावी यः) **समयः स प्रथमस्य**

**चान्द्रसंवत्सरस्य** [पर्यवसानसमयः। तं समयं च णमित्यादि] (**आदिः**। तदेवं प्रथम-संवत्सरस्यादिर्ज्ञातः।

सम्प्रति पर्यवसानसमयं पृच्छति-)

**मू० ता से णं किंपज्जवसिते आहिते ति वदेज्जा?**

**टी० 'ता'** इति पूर्ववत्, **स** प्रथमश्चान्द्रः संवत्सरः **किंपर्यवसितः**- किम्पर्य-वसान **आख्यात इति वदेत्**?

भगवानाह -

**मू० ता जे णं दोच्चस्स (चंद)संवच्छरस्स आदी से णं [1]पढमस्स चंदसंवच्छरस्स पज्जवसाणे अणंतरपच्छाकडे समए।**

**टी० 'ता जे ण'**मित्यादि। **यो द्वितीयस्य चान्द्रस्य संवत्सरस्यादिरा-**दिसमयस्तस्मा**दनन्तरो** यः [पुरस्](**पश्चात्**)**कृतो**ऽतीतः **समयः स** प्रथमस्य चान्द्र-संवत्सरस्य **पर्यवसानं** पर्यवसानसमयः।

**मू० तं समतं च णं चंदे केणं णक्खत्तेणं जोएति ? ता उत्तराहिं आसाढाहिं, उत्तराणं आसाढाणं [2]छदुवीसं मुहुत्ता [3]छदुवीसं च बावट्ठिभागा मुहुत्तस्स [4]बावट्ठिभागं च सत्तट्ठिधा छेत्ता चउप्पण्णं चुण्णिया भागा सेसा। तं समयं च णं सूरे केणं णक्खत्तेणं जोएति? ता पुणव्वसुणा, पुणव्वसुस्स णं सोलसमुहुत्ता अट्ठ य बावट्ठिभागा मुहुत्तस्स बावट्ठिभागं च सत्तट्ठिधा छेत्ता वीसं चुण्णिया भागा सेसा। ता एतेसिं णं पंचण्हं संवच्छराणं दोच्चस्स चंदसंवच्छरस्स के आदी आहिता ति वदेज्जा ? ता जे णं पढमस्स चंदसंवच्छरस्स पज्जवसाणे से णं दुच्चस्स चंदसंवच्छरस्स आदी अणंतरपुरक्खडे समये। ता**

---

१. पढमसंवच्छरस्स - A, B, C, D, E, F, G, I, J, K। २. छव्वीसं - U। ३. छव्वीसं - U। ४. बावट्ठिभागं सत्तट्ठिधा - H।

से णं किंपज्जवसिए आहिते ति वदेज्जा ? ता जे णं तच्चस्स अभिवड्डियसंवच्छरस्स आदी से णं दुच्चस्स चंदसंवच्छरस्स पज्जवसाणे अणंतरपच्छाकडे समते। तं समतं च णं चंदे के० पुच्छा ? ता पुव्वाहिं आसाढाहिं, पुव्वाणं आसाढाणं सत्त मुहुत्ता तेवण्णं बावट्ठिभागा मुहुत्तस्स बावट्ठिभागं च सत्तट्ठिधा छेत्ता ईतालीसं चुण्णिया भागा सेसा। तं समतं च णं सूरे के० पुच्छा ? ता पुणव्वसुणा, पुणव्वसुस्स णं बातालीसं मुहुत्ता पण्णत्तीसं च बावट्ठिभागा मुहुत्तस्स बावट्ठिभागं च सत्तट्ठिधा छेत्ता सत्त चुण्णिया भागा सेसा। ता एएसि णं पंचण्हं संवच्छराणं तच्चस्स अभिवड्ढितस्स (संवच्छरस्स) के आदी आहितातिवदेज्जा? ता जे णं दोच्चस्स चंदसंवच्छरस्स पज्जवसाणे से णं तच्चस्स[1] अभिवड्ढितसंवच्छरस्स आदी अणंतरपुरक्खडे समते। ता से णं किंपज्जवसिए[2] आहिते (त्ति वदेज्जा)? ता जे णं चउत्थस्स चंदसंवच्छरस्स आदी से णं तच्चस्स अभिवड्ढितस्स (संवच्छरस्स) पज्जवसाणे अंणतरपच्छाकडे समये। तं समतं च णं चंदे केणं ण० ? ता उत्तराहिं आसाढाहिं, उत्तराणं आसाढाणं तेरस मुहुत्ता तेरस त बावट्ठिभागा मुहुत्तस्स बावट्ठिभागं च सत्तट्ठिहा छेत्ता सत्तावीसं चुण्णिया भागा सेसा। तं समतं च णं सूरे केणं णक्खत्तेणं० ? ता पुणव्वसुणा, पुणव्वसुस्स णं दो[ण्णि] मुहुत्ता [3]छप्पण्णं बावट्ठिभागा मुहुत्तस्स बावट्ठिभागं च सत्तट्ठिधा छेत्ता सट्ठिं चुण्णिया भागा सेसा। ता एएसि णं पंचण्हं संवच्छराणं चउत्थस्स चंदसं० के आदी० ? ता जे णं [4]तच्चस्स अभिवड्ढि-

---

१. तच्चअभिवड्ढित... - U। २. किंपज्जवसाणे - U। ३. छप्पण्णं च बावट्ठि.. - O, U।
४. तच्चअभिवड्ढित.. - U।

तसंवच्छरस्स पज्जवसाणे से णं चउत्थस्स चंदसं० आदी अणंतरपुरक्खडे समते। ता से णं किंपज्जवसिते आहिते ति वदेज्जा? ता जे णं पंचमस्स अभिवड्डियसंवच्छरस्स आदी से णं चउत्थस्स चंदसंवच्छरस्स पज्जवसाणे अणंतरपच्छाकडे समते। तं संमतं च णं चंदे केणं ण० ? ता उत्तराहिं आसाढाहिं, उत्तराणं आसाढाणं (ऊण)-[1]चत्तालीसं मुहुत्ता चत्तालीसं च बावट्ठिभागा मुहुत्तस्स बावट्ठिभागं सत्तट्ठिहा छेत्ता [2][सीतालीसं](चउद्दस) चुण्णिया भागा सेसा। तं समयं च णं सूरे केणं णक्खत्तेणं जोएति ? सा पुणव्वसुणा, पुणव्वसुस्स अउणत्तीसं मुहुत्ता एक्कवीसं बावट्ठिभागा मुहुत्तस्स बावट्ठिभागं च सत्तट्ठिहा छेत्ता सीयालीसं चुण्णियाभागा सेसा। ता एतेसि णं पंचण्हं संवच्छराणं पंचमस्स अभिवड्ढियसंवच्छरस्स के आदी आहिते ति वदेज्जा ? ता जे णं चउत्थस्स चंदसंवच्छरस्स पज्जवसाणे से णं पंचमस्स अभिवड्ढितसंवच्छरस्स आदी अणंतरपुरक्खडे समये। ता से णं किंपज्जवसिते आहितेति वदेज्जा ? ता जे णं पढमस्स चंदसंवच्छरस्स आदी से णं पंचमस्स अभिवड्डितसंवच्छरस्स पज्जवसाणे अणंतरपच्छाकडे समए। तं समयं च णं चंदे केणं णक्खत्तेणं जोएति ? ता उत्तराहिं आसाढाहिं, उत्तराणं आसाढाणं चरिमसमए। तं समयं च णं सूरे केणं णक्खत्तेणं जोएति ? ता पुस्सेणं पुस्सस्स णं [3]ए[क्क](क्कूण)वीसं मुहुत्ता तेतालीसं च बावट्ठिभागा मुहुत्तस्स बावट्ठिभागं च सत्तट्ठिधा छेत्ता तेत्तीसं चुण्णिया भागा सेसा।

---

१. मुद्रितसूर्यप्रज्ञप्तिवृत्तौ त्वत्र 'चत्तालीसं' इति पाठो दृश्यते, स न समीचीनो भाति। २. मुद्रितसूर्यप्रज्ञप्तिवृत्तौ त्वत्र 'चउसट्ठी' इति पाठो दृश्यते, स न समीचीनो भाति। ३. मुद्रितसूर्यप्रज्ञप्तिवृत्तौ त्वत्र 'एक्कवीसं' इति पाठो दृश्यते, स तु न समीचीनो भाति।

## एक्कारसमं पाहुडं समत्तं ११।

**टी० 'तं समयं च ण'**मित्यादि। **तस्मिंश्च** प्रथमचान्द्रसंवत्सरपर्यवसानभूते [संपर्ये] **(समये) चन्द्रः केन नक्षत्रेण** सह **युनक्ति** योगं करोति ? भगवानाह- **'ता उत्तराहिं'** इत्यादि। इह द्वादशभिः [1]पौर्ण्णमासिभिश्चान्[2]द्रः संवत्सरो भवति। ततो यदेव प्राग्द्वा[भ्यां](दश्यां) पौर्ण्णमास्यां चन्द्रनक्षत्रयोगपरिमाणं सूर्यनक्षत्रयोग-परिमाणं चोक्तं तदेवान्यूनातिरिक्तमत्रापि द्रष्टव्यम्, तथैव गणितभावना कर्त्तव्या। एवं शेषसंवत्सरगतान्यप्यादिपर्यवसानसूत्राणि भावनीयानि यावत् प्राभृतपरिसमाप्तिर्नवरं गणितभावना क्रियते। तत्र द्वितीयचान्द्रसंवत्सरपरिसमाप्तिश्चतुर्विंशतितमपौर्ण्णमासी-समाप्तौ। तत्र ध्रुवराशिः [द्वा](षट्)षष्टिमुहूर्त्ता एकस्य च मुहूर्त्तस्य पञ्च द्वाषष्टिभागा एकस्य च द्वाषष्टिभागस्य एकः सप्तषष्टिभागः ६६।५।१ इत्येवम्प्रमाणश्चतुर्विंशत्या गुण्यते, जातानि पञ्चदश शतानि चतुरशीत्यधिकानि मुहूर्त्तानामेकस्य च मुहूर्त्तस्य द्वाषष्टिभागानां विंशत्युत्तरं शतं एकस्य च द्वाषष्टिभागस्य चतुर्विंशतिः सप्तषष्टिभागाः १,५८४।१२०।२४। तत एतस्मादष्टभिर्मुहूर्त्तशतैरेकोनविंशत्यधिकैरेस्य च मुहूर्त्तस्य चतुर्विंशत्या द्वाषष्टिभागैरेकस्य च द्वाषष्टिभागस्य षट्षष्ट्या सप्तषष्टिभागैरेकः परिपूर्णो नक्षत्रपर्यायः शुध्यति। ततः स्थितानि पश्चात्सप्त मुहूर्त्तशतानि पञ्चषष्ट्यधिकानि मुहूर्त्तगतानां च द्वाषष्टिभागानां पञ्चनवतिरेकस्य च द्वाषष्टिभागस्य पञ्चविंशतिः सप्तषष्टिभागाः ७६५।९५।२५। ततो **'मूले सत्तेव चोयाला'** इति वचनात् सप्तभि-श्चतुश्चत्वारिंशदधिकैर्मुहूर्त्तशतैरेकस्य च मुहूर्त्तस्य चतुर्विंशत्या द्वाषष्टिभागैरेकस्य च द्वाषष्टिभागस्य षट्षष्ट्या सप्तषष्टिभागैरभिजिदादीनि मूलपर्यन्तानि नक्षत्राणि शुद्धानि। ततः स्थिताः पश्चात् द्वाविंशतिर्मुहूर्त्ता एकस्य च मुहूर्त्तस्याष्टौ द्वाषष्टिभागा एकस्य च द्वाषष्टिभागस्य षड्विंशतिः सप्तषष्टिभागाः २२।८।२६। तत आगतं द्वितीयस्य चान्द्रसंवत्सरस्य पर्यवसानसमये पूर्वाषाढानक्षत्रस्य सप्त मुहूर्त्ता एकस्य च मुहूर्त्तस्य

१. पूर्ण्णमासिभिश्चान्द्रः - M। २. .......श्चन्द्रः संवत्सरो - A, G।

त्रिपञ्चाशत् द्वाषष्टिभागा एकस्य च द्वाषष्टिभागस्य एकचत्वारिंशत् सप्तषष्टिभागाः शेषाः। तदानीं च सूर्येण युक्तस्य पुनर्वसोर्द्वाचत्वारिंशत् मुहूर्त्ता एकस्य च मुहूर्त्तस्य पञ्चत्रिंशत् द्वाषष्टिभागा एकस्य च द्वाषष्टिभागस्य सप्त सप्तषष्टिभागाः शेषाः, तथाहि-स एव ध्रुवराशिः ६६।५।१ चतुर्विंशत्या गुणि[ते](तो) जातानि पञ्चदश शतानि चतुरशीत्यधिकानि मुहूर्त्तानामेकस्य च मुहूर्त्तस्य द्वाषष्टिभागानां विंशत्युत्तरं शतं एकस्य च द्वाषष्टिभागस्य चतुर्विंशतिः सप्तषष्टिभागाः १,५८४।१२०।२४। तत एतस्मादष्टभिः शतैरेकोनविंशत्यधिकैर्मुहूर्त्तानामेकस्य च मुहूर्त्तस्य चतुर्विंशत्या द्वाषष्टिभागैरेकस्य च द्वाषष्टिभागस्य षट्षष्ट्या सप्तषष्टिभागैरेकः ८१९।२४।६६ परिपूर्णो नक्षत्रपर्यायः शुद्धः, स्थितानि पश्चात् सप्त मुहूर्त्तशतानि पञ्चषष्ट्यधिकानि एकस्य च मुहूर्त्तस्य द्वाषष्टिभागाः पञ्चनवतिरेकस्य च द्वाषष्टिभागस्य पञ्चविंशतिः सप्तषष्टिभागाः ७६५। ९५।२५। तत एतेभ्य एकोनविंशत्या मुहूर्त्तैरेकस्य च मुहूर्त्तस्य [द्वा](त्रि)चत्वारिंशता द्वाषष्टिभागैरेकस्य च द्वाषष्टिभागस्य त्रयस्त्रिंशता सप्तषष्टिभागैः पुष्यः शुद्धः, स्थितानि पश्चात् मुहूर्त्तानां सप्त शतानि षट्चत्वारिंशदधिकानि एकस्य च मुहूर्त्तस्य एकपञ्चाशत् द्वाषष्टिभागा एकस्य च द्वाषष्टिभागस्य एकोनषष्टिः सप्तषष्टिभागाः ७४६।५१।५९। ततो भूयोऽप्येतस्मात् सप्तभिर्मुहूर्त्तशतैः चतुश्चत्वारिंशदधिकैरेकस्य च मुहूर्त्तस्य चतुर्विंशत्या द्वाषष्टिभागैरेकस्य च द्वाषष्टिभागस्य षट्षष्ट्या सप्तषष्टिभागैरश्लेषादीनि आर्द्रापर्यन्तानि शुद्धानि, स्थितौ पश्चात् द्वौ मुहूर्त्तावेकस्य च मुहूर्त्तस्य षड्विंशतिर्द्वाषष्टिभागा एकस्य च द्वाषष्टिभागस्य षष्टिः सप्तषष्टिभागाः २।२६।६०। आगतं द्वितीयचान्द्रसंवत्सरपर्यवसानसमये पुनर्वसुनक्षत्रस्य द्वाचत्वारिंशत् मुहूर्त्ता एकस्य च मुहूर्त्तस्य पञ्चत्रिंशत् द्वाषष्टिभागा एकस्य च द्वाषष्टिभागस्य सप्त सप्तषष्टिभागाः शेषाः। तथा तृतीयाभिवर्द्धितसञ्ज्ञसंवत्सरपरिसमाप्तिः सप्तत्रिंशता पौर्णमासीभिः। ततो ध्रुवराशिः ६६।५।१ सप्तत्रिंशता गुण्यते, जातानि मुहूर्त्तानां चतुर्विंशतिशतानि द्वाचत्वारिंशदधिकानि द्वाषष्टिभागानां च पञ्चाशीत्यधिकं शतं सप्तत्रिंश[ति](त्)

सप्तषष्टिभागाः २,४४२।१८५।३७। तत एतेभ्योऽष्टौ मुहूर्त्तशतान्येकोनविंशत्यधिकान्येकस्य मुहूर्त्तस्य चतुर्विंशतिर्द्वाषष्टिभागा एकस्य च द्वाषष्टिभागस्य षट्षष्टिः सप्तषष्टिभागा इत्येकनक्षत्रपर्यायपरिमाणं द्वाभ्यां गुणयित्वा शोध्यते। ततः स्थितानि पश्चादष्टौ मुहूर्त्तशतानि चतुरुतराणि मुहूर्त्तसत्कानाञ्च[1] द्वाषष्टिभागानां पञ्चत्रिंशदधिकं शतमेकस्य च द्वाषष्टिभागस्य एकोनचत्वारिंशत् सप्तषष्टिभागाः ८०४।१३५।३९। तत एतेभ्यः सप्तभिर्मुहूर्त्तशतैश्चतुःसप्तत्यधिकैरेकस्य च मुहूर्त्तस्य चतुर्विंशत्या द्वाषष्टिभागैरेकस्य च द्वाषष्टिभागस्य षट्षष्ट्या सप्तषष्टिभागैरभिजिदादीनि पूर्वाषाढापर्यन्तानि नक्षत्राणि शुद्धानि, स्थिताः पश्चादेकत्रिंशत् मुहूर्त्ता एकस्य च मुहूर्त्तस्य [त्रयोदश] (अष्टचत्वारिंशत्) द्वाषष्टिभागा एकस्य च द्वाषष्टिभागस्य चत्वारिंशत् सप्तषष्टिभागाः ३१।[१३](४८)।४०। तत आगतं तृतीयाभिवर्द्धितसञ्ज्ञसंवत्सरपर्यवसानसमये उत्तराषाढानक्षत्रस्य त्रयोदशमुहूर्त्ता एकस्य च मुहूर्त्तस्य त्रयोदश द्वाषष्टिभागा एकस्य च द्वाषष्टिभागस्य सप्तविंशतिः सप्तषष्टिभागाः शेषाः। तदानीञ्च सूर्येण सम्प्रयुक्तस्य पुनर्वसुनक्षत्रस्य द्वौ मुहूर्त्तावेकस्य च मुहूर्त्तस्य षट्पञ्चाशत् द्वाषष्टिभागा एकं च द्वाषष्टिभागं सप्तषष्टिधा छित्त्वा तस्य सत्काः षष्टिः चूर्णिका भागाः शेषाः, तथाहि-स एव ध्रुवराशिः ६६।५।१ सप्तत्रिंशता गुण्यते, जातानि मुहूर्त्तानां चतुर्विंशतिशतानि द्विचत्वारिंशदधिकानि मुहूर्त्तसत्कानाञ्च द्वाषष्टिभागानां पञ्चाशीत्यधिकं शतमेकस्य च द्वाषष्टिभागस्य सप्तत्रिंशत् सप्तषष्टिभागाः २,४४२।१८५।३७। तत एतेभ्यः पूर्ववत् सकलनक्षत्रपर्यायपरिमाणं द्विगुणं कृत्वा शोध्यते, स्थितानि पश्चादष्टौ मुहूर्त्तशतानि चतुरुत्तराणि मुहूर्त्तसत्कानां च द्वाषष्टिभागानां पञ्चत्रिंशदधिकं शतमेकस्य च द्वाषष्टिभागस्य एकोनचत्वारिंशत् सप्तषष्टिभागाः ८०४।१३५।३९। ततो भूय एतेभ्य एकोनविंशत्या मुहूर्त्तैरेकस्य मुहूर्त्तस्य त्रिचत्वारिंशता द्वाषष्टिभागैरेकस्य च द्वाषष्टिभागस्य त्रयस्त्रिंशता सप्तषष्टिभागैः पुष्यः शुद्धः, स्थितानि पश्चात् मुहूर्त्तानां सप्त

---

१. ... सत्कानां द्वाषष्टि... - T।

शतानि पञ्चाशीत्यधिकानि मुहूर्त्तसत्कानां[१] द्वाषष्टिभागानां द्विनवतिरेकस्य च द्वाषष्टि-भागस्य षट् सप्तषष्टिभागाः ७८५।९२।६। ततो भूयोऽप्येतेभ्यः सप्तभिर्मुहूर्त्तशतैश्चतुश्चत्वारिंशदधिकैरेकस्य च मुहूर्त्तस्य चतुर्विंशत्या द्वाषष्टिभागैरेकस्य च द्वाषष्टिभागस्य षट्षष्ट्या सप्तषष्टिभागैरश्लेषादीन्याद्रापर्यन्तानि शुद्धानि, स्थिता[नि](ः) पश्चात् मुहूर्त्ता द्वाचत्वारिंशत् एकस्य च मुहूर्त्तस्य पञ्च द्वाषष्टिभागा एकस्य च द्वाषष्टिभागस्य (सप्त) सप्तषष्टिभागाः ४२।५।७। तत आगतं तृतीयाभिवर्द्धितसञ्ज्ञसंवत्सरपर्यवसानसमये सूर्येण सह संयुक्तस्य पुनर्व[सौ](सोः) द्वौ मुहूर्त्तावेकस्य च मुहूर्त्तस्य षट्पञ्चाशत् द्वाषष्टिभागा एकस्य च द्वाषष्टिभागस्य षष्टिश्चूर्णिका भागाः शेषाः। तथा चतुर्थ-चान्द्रसंवत्सरपर्यवसानसमये एकोनपञ्चाशत्तमपौर्णमासीपरिसमाप्तिः। ततः स एव ध्रुवराशिः ६६।५।१ एकोनपञ्चाशता गुण्यते, जातानि मुहूर्त्तानां द्वात्रिंशच्छतानि चतुस्त्रिंशदधिकानि मुहूर्त्तसत्कानां च द्वाषष्टिभागानां द्वे शते पञ्चचत्वारिंशदधिके एकस्य च द्वाषष्टिभागस्य एकोनपञ्चाशत् सप्तषष्टिभागाः ३,२३४।२४५।४९। तत एतस्मात्प्रागुक्तं सकलनक्षत्रपर्यायपरिमाणं त्रिभिर्गुणयित्वा शोध्यते, ततः स्थितानि सप्त शतानि सप्तसप्तत्यधिकानि मुहूर्त्तानामेकस्य च मुहूर्त्तस्य द्वाषष्टिभागानां सप्तत्यधिकं शतं एकस्य च द्वाषष्टिभागस्य द्विपञ्चाशत् सप्तषष्टिभागाः ७७७।१७०।-५२। ततः सप्तभिः शतैश्चतुःसप्तत्यधिकैर्मुहूर्त्तानामेकस्य[२] च मुहूर्त्तस्य चतुर्विंशत्या द्वाषष्टिभागैरेकस्य च द्वाषष्टिभागस्य षट्षष्ट्या सप्तषष्टिभागैर्भूयोऽभिजिदादीनि पूर्वा-षाढापर्यन्तानि नक्षत्राणि शुद्धानि, स्थिताः पश्चात् पञ्च मुहूर्त्ता एकस्य च मुहूर्त्तस्य एकविंशतिर्द्वाषष्टिभागा एकस्य च द्वाषष्टिभागस्य त्रिपञ्चाशत् सप्तषष्टिभागाः ५।२१।-५३। तत आगतं चतुर्थचान्द्रसंवत्सरपर्यवसानसमये उत्तराषाढानक्षत्रयुक्तस्य चन्द्रस्य एकोनचत्वारिंशत् मुहूर्त्ता [३]एकस्य च मुहूर्त्तस्य चत्वारिंशत् द्वाषष्टिभागा एकस्य च

१. ... कानां च द्वाषष्टि... - F, G, T। २. ...कस्य मुहूर्त्तस्य - A, B, C, D, E, F, G, H।
३. एकस्य मुहूर्त्तस्य - A, B, C, E, F, H, I।

द्वाषष्टिभागस्य चतुर्द्दश सप्तषष्टिभागाः शेषाः। तदानीञ्च सूर्येण सह संयुक्तस्य पुनर्वसुनक्षत्रस्य एकोनत्रिंशत् मुहूर्त्ता एक[त्रि](विं)शतिर्द्वाषष्टिभागा मुहूर्त्तस्य एकं च द्वाषष्टिभागं सप्तषष्टिधा छित्त्वा तस्य सत्काः सप्तचत्वारिंशत् चूर्णिका भागाः शेषाः, तथाहि - स एव ध्रुवराशिरेकोनपञ्चाशता गुण्यते, गुणयित्वा च ततः प्रागुक्तं सकलनक्षत्रपर्यायपरिमाणं त्रिभिर्गुणयित्वा शोध्यते। ततः स्थितानि सप्तमुहूर्त्तशतानि सप्तसप्तत्यधिकानि मुहूर्त्तसत्कानाञ्च द्वाषष्टिभागानां सप्तत्यधिकं शतमेकस्य च द्वाषष्टिभागस्य द्विपञ्चाशत् सप्तषष्टिभागाः ७७७।१७०।५२। तत एतेभ्य एकोनविंशत्या मुहूर्त्तैरेकस्य च मुहूर्त्तस्य त्रिचत्वारिंशता द्वाषष्टिभागैरेकस्य च द्वाषष्टिभागस्य त्रयस्त्रिंशता सप्तषष्टिभागैः पुष्यः शुद्धः, स्थितानि पश्चात् मुहूर्त्तानां सप्तशतान्यष्टा-पञ्चाशदधिकानि मुहूर्त्तसत्कानां च द्वाषष्टिभागानां सप्तविंशत्यधिकं शतमेकस्य च द्वाषष्टिभागस्य एकोनविंशतिः सप्तषष्टिभागाः ७५८।१२७।१९। ततः सप्तभिः शतैश्च-तुश्चत्वारिंशदधिकैर्मुहूर्त्तानामेकस्य च मुहूर्त्तस्य चतुर्विंशत्या द्वाषष्टिभागैरेकस्य च द्वाषष्टिभागस्य षट्षष्ट्या सप्तषष्टिभागैरश्लेषादीन्या[षाढा](र्द्रा)पर्यन्तानि शुद्धानि, स्थिताः पञ्चदश मुहूर्त्ता एकस्य च मुहूर्त्तस्य चत्वारिंशत् द्वाषष्टिभागा एकस्य च द्वाषष्टिभागस्य विंशतिः सप्तषष्टिभागाः १५।४०।२०। तत आगतं चतुर्थचान्द्र-संवत्सरपर्यवसानसमये पुनर्वसुनक्षत्र(स्य) एकोनत्रिंशत् मुहूर्त्ता एकस्य च मुहूर्त्तस्य एकविंशतिर्द्वाषष्टिभागा [१]एकस्य च द्वाषष्टिभागस्य सप्तचत्वारिंशत् सप्तषष्टिभागाः शेषा इति। पञ्चमाभिवर्द्धितसंवत्सरपर्यवसानं च द्वाषष्टितमपौर्ण्णमासीपरिसमाप्तिसमये। ततो यदेव प्राग् द्वाषष्टितमपौर्ण्णमासीपरिसमाप्तिसमये चन्द्रनक्षत्र(योग)परिमाणं सूर्यनक्षत्र-योगपरिमाणञ्चोक्तं तदेवान्यूनातिरिक्तमत्रापि द्रष्टव्यम्।

इति मलयगिरिविरचितायां चन्द्रप्रज्ञप्तिटीकायामेकादशं प्राभृतं समाप्तम्।

* * * * *

---

१. एकस्य द्वाषष्टि... - A, B, C, D, E, F, G, H।

## द्वादशं प्राभृतम्

तदेवमुक्तमेकादशं प्राभृतम्। सम्प्रति द्वादशमुच्यते। तस्य चायमर्थाधिकारो यथा कति संवत्सरा भवन्ति ? इति। ततस्तद्विषयमेव प्रश्नसूत्रमाह-

**मू० ता कति णं संवच्छरा णं आहिता ति वदेज्जा ?**

**टी० 'ता कइ संवच्छरा'** इत्यादि। **'ता'** इति पूर्ववत् **कति संवत्सरा** भगवन् त्वया **आख्याता इति वदेत्** ?

भगवानाह-

**मू० तत्थ खलु इमे पंच संवच्छरा पण्णत्ता, तं जहा नक्खत्ते चंदे उडू आदिच्चे अभिवड्ढिते।**

**टी० 'तत्थे'**त्यादि। **तत्र** संवत्सरविचारविषये **खल्विमे पञ्च संवत्सराः प्रज्ञप्तास्तद्यथा 'नक्खत्ते'**त्यादि। पदैकदेशे पदसमुदायोपचारात् **नक्षत्रसंवत्सर-श्चन्द्रसंवत्सर ऋतुसंवत्सर आदित्यसंवत्सरोऽभिवर्द्धितसंवत्सरः**। एतेषाञ्च पञ्चा-नामपि संवत्सराणां स्वरूपं प्रागेवोक्तम्।

**मू० ता एतेसि णं पंचण्हं संवच्छराणं पढमस्स णक्खत्तसंवच्छरस्स नक्खत्तमासे तीसतिमुहुत्तेणं अहोरत्तेणं गणिज्जमाणे केवतिए रातिंदि-यग्गेणं आहिते ति वदेज्जा ?**

**टी० 'ता एएसि ण'**मित्यादि प्रश्नसूत्रम्। **'ता'** इति पूर्ववत्, **एतेषां पञ्चानां संवत्सराणां** मध्ये **प्रथमस्य नक्षत्रसंवत्सरस्य** सत्को यो **नक्षत्रमासः** स **त्रिंशन्मुहूर्त्तेन** - त्रिंशन्मुहूर्त्तप्रमाणेनाहोरात्रेण **गणण्यमानः कियान्** रात्रिन्दिव-परिमाणेनाऽऽ**ख्यात इति वदेत्** ?

भगवानाह-

**मू० ता सत्तावीसं रातिंदियाइं एक्कवीसं च सत्तट्ठिभागा रातिंदियस्स रातिंदियग्गेणं आहितेति वदेज्जा।**

**टी०** '**ता**' इत्यादि। ('**ता**') इति पूर्ववत्, **सप्तविंशति**रहोरात्रा **एकविंशतिश्च सप्तषष्टिभागा (रात्रिन्दिवस्य)** अहोरात्रपरिमाणेन **आख्यात इति वदेत्**। तथाहि - युगे नक्षत्रमासाः सप्तषष्टिरेतच्च प्रागेव भावितम्, युगे चाहोरात्राणामष्टादश शतानि त्रिंशदधिकानि १,८३०। ततस्तेषां सप्तषष्ट्या भागे हृते लब्धाः सप्तविंशतिरहोरात्रा एकस्य चाहोरात्रस्य एकविंशतिः सप्तषष्टिभागाः २७।२१/६७।

**मू० ता से णं केवतिए मुहुत्तग्गेणं आहितेति वइज्जा ?**

**टी०** '**ता से ण**'मित्यादि। **स** नक्षत्रमासः **कियान् मुहूर्त्ताग्रेण** - मुहूर्त्त-परिमाणेनाऽऽ**ख्यात इति वदेत्**?

भगवानाह-

**मू० ता अट्ठसए एक्कूणवीसे (मुहुत्ताणं) सत्तावीसं च सत्तट्ठिभागे मुहुत्तस्स मुहुत्तग्गेणं आहिते ति वदेज्जा। ता [1]एस णं अद्धा दुवाल-सखुत्तकडा णक्खत्तसंवच्छरे।**

**टी०** '**ता अट्ठ सए**' इत्यादि। **अष्टौ शतानि एकोनविंशत्यधिकानि मुहूर्त्ता**नामेकस्य च **मुहूर्त्तस्य सप्तविंशतिः सप्तषष्टिभागाः मुहूर्त्ताग्रेणाख्यात इति वदेत्**, तथाहि - नक्षत्रमासपरिमाणं सप्तविंशतिरहोरात्रा एकविंशतिरहोरात्रस्य सप्तषष्टिभागाः। [2]तत्सवर्ण्णनार्थं सप्तविंशतिरप्यहोरात्राः सप्तषष्ट्या गुण्यन्ते, गुणयित्वा चोपरितना एकविंशतिः सप्तषष्टिभागाः प्रक्षिप्यन्ते, जातानि सप्तषष्टिभागानामष्टा-दशशतानि त्रिंशदधिकानि १,८३०। तानि मुहूर्त्तानयनार्थं त्रिंशता गुण्यन्ते, जातानि चतुष्पञ्चाशत्सहस्राणि नव शतानि मुहूर्त्तगतसप्तषष्टिभागानां ५४,९००। तत एतेषां सप्तषष्ट्या भागो ह्रियते, लब्धान्यष्टौ शतानि एकोनविंशत्यधिकानि मुहूर्त्तानामेकस्य च मुहूर्त्तस्य सप्तविंशतिः सप्तषष्टिभागा इति। '**ता ए[एसि](स) ण**'मित्यादि। **एषा**ऽनन्तरमुक्ता नक्षत्रमासरूपा **अद्धा द्वादशकृत्वः कृता**-द्वादशभिर्वारैर्गुणि-[त्वा](ता) इत्यर्थः **नक्षत्रसंवत्सरो** भवति।

---

१. मुद्रितसूर्यप्रज्ञप्तौ त्वत्र 'एतेसि' इति पाठः, स न समीचीनो भाति। २. ततः सवर्ण्ण.. - K, T।

(सम्प्रति) सकलनक्षत्रसंवत्सरगतरात्रिन्दिवपरिमाणमुहूर्त्तपरिमाणविषयप्रश्ननिर्वचनसूत्राण्याह-

**मू० ता से णं केवतिए रातिंदियग्गेणं आहितेति वदेज्जा ? ता तिण्णि सत्तावीसे रातिंदियसते एकावण्णं च सत्तट्ठिभागे रातिंदिअस्स रातिंदियग्गेणं आहिते ति वदेज्जा। ता से णं केवतिए मुहुत्तग्गेणं आहितेति वदेज्जा ? ता नव मुहुत्तसहस्साइं अट्ठ य बत्तीसे मुहुत्तसते छप्पण्णं च सत्तट्ठिभागे मुहुत्तस्स मुहुत्तग्गेणं आहिते ति वदेज्जा।**

**टी०** '**ता से ण**'मित्यादि सुगमम्, नवरं रात्रिन्दिवचिन्तायां नक्षत्रमासरात्रिन्दिवपरिमाणं मुहूर्त्तचिन्तायां नक्षत्रमासमुहूर्त्तपरिमाणं द्वादशभिर्गुणयितव्यम्, ततो यथोक्ता रात्रिन्दिवसङ्ख्या मुहूर्त्तसङ्ख्या च भवति।

**मू० ता एतेसि णं पंचण्हं संवच्छराणं दोच्चस्स चंदसंवच्छरस्स चंदे मासे तीसतिमुहुत्तेणं (अहोरत्तेणं) गणिज्जमाणे केवतिए रातिंदियग्गेणं आहिते ति वदेज्जा ? ता एगूणतीसं रातिंदियाइं बत्तीसं च बावट्ठिभागा रातिंदियस्स रातिंदियग्गेणं आहिताति वदेज्जा। ता से णं केवतिए मुहुत्तग्गेणं आहिताति वदेज्जा ? ता अट्ठ पंचासीते मुहुत्तसए [1]तीसं च बावट्ठिभागे मुहुत्तस्स मुहुत्तग्गेणं आहिते ति वदेज्जा। ता एस णं अद्धा दुवालसखुत्तकडा चंदे संवच्छरे। ता से णं केवतिए रातिंदियग्गेणं आहिते ति वदेज्जा ? ता तिण्णि चउप्पण्णे रातिंदियसते दुवालस य बावट्ठिभागा रातिंदियस्स रातिंदियग्गेणं आहिते ति वदेज्जा। ता से णं केवइए मुहुत्तग्गेणं आहिते ति वदेज्जा ? ता दस मुहुत्तसहस्साइं छच्च पणवीसे मुहुत्तसए पण्णासं च बावट्ठिभागे मुहुत्तस्स मुहुत्तग्गेणं आहितेति वदेज्जा।**

---

१. मुद्रितसूर्यप्रज्ञप्तौ त्वत्र 'तेत्तीसं च छावट्ठि...' इति पाठो दृश्यते, स न समीचीनो भाति।

टी० '**ता एएसि ण**'मित्यादि सुगमम्। भगवानाह- '**ता एगूणतीस**'मित्यादि। **एकोनत्रिंशद्रात्रिन्दिवानि द्वात्रिंशच्च द्वाषष्टिभागा रात्रिन्दिवस्य** एतावत्परिमाणश्चन्द्रमासो **रात्रिन्दिवाग्रेण आख्यात इति वदेत्**, तथाहि - युगे द्वाषष्टिश्चन्द्रमासाः, एतच्च प्रागेव भावितम्। ततो युगसत्कानामष्टादशानामहोरात्रशतानां त्रिंशदधिकानां द्वाषष्ट्या भागो ह्रियते, लब्धा एकोनत्रिंशदहोरात्रा एकस्य चाहोरात्रस्य द्वात्रिंशत् द्वाषष्टिभागाः २९ ३२/६२। '**ता से ण**'मित्यादि। प्रश्नसूत्रं सुगमम्। भगवानाह- '**ता अट्ठे**'त्यादि। **अष्टौ मुहूर्त्तशतानि** पञ्चाशीत्यधिकान्येकस्य च **मुहूर्त्तस्य त्रिंशत् द्वाषष्टिभागा** एतावत्परिमाणश्चन्द्रमासो **मुहूर्त्ताग्रेणाख्यात इति वदेत्**, तथाहि- चन्द्रमासपरिमाणमेकोनत्रिंशदहोरात्रा एकस्य चाहोरात्रस्य द्वात्रिंशद्द्वाषष्टिभागाः, तत्र सवर्ण्णनार्थमेकोनत्रिंशदप्यहोरात्रा द्वाषष्ट्या गुण्यन्ते, गुणयित्वा च उपरितना द्वात्रिंशद्द्वाषष्टिभागाः प्रक्षिप्यन्ते, जातान्यष्टादशशतानि त्रिंशदधिकानि द्वाषष्टिभागानां १,८३०। तत एतानि त्रिंशता गुण्यन्ते, जातानि चतुष्पञ्चाशत्सहस्राणि नवशतानि मुहूर्त्तगतद्वाषष्टिभागानां ५४,९००। तत एतेषां द्वाषष्ट्या भागो ह्रियते, लब्धान्यष्टौ शतानि पञ्चाशीत्यधिकानि मुहूर्त्तानामेकस्य च मुहूर्त्तस्य त्रिंशत् द्वाषष्टिभागाः ८८५ ३०/६२। '**ता एस णं अद्धा**' इत्यादि प्राग्वद्भावनीयम्।

**मू० ता एएसि णं पंचण्हं संवच्छराणं [1]तच्चस्स उडुसंवच्छरस्स उडुमासे तीसतिमुहुत्तेणं अहोरत्तेणं गणिज्जमाणे केवइए रातिंदियग्गेणं आहिता ति वदेज्जा ? ता तीसं रातिंदियाइं रातिंदियग्गेणं आहिता ति वदेज्जा। ता से णं केवतिए मुहुत्तग्गेणं० पुच्छा ? ता णव मुहुत्तसताइं मुहुत्तग्गेणं आहिते ति वदेज्जा। ता एस णं अद्धा दुवालसखुत्तकडा उडुसंवच्छरे। ता से णं केवतिए रातिंदियग्गेणं आहिते ति वदेज्जा ? ता तिण्णि सट्ठे रातिंदियसते रातिंदियग्गेणं**

१. तच्चउडुसंवच्छरस्स - V।

**आहिते ति वदेज्जा। ता से णं केवतिए मुहुत्तग्गेणं आहिते ? ता दस मुहुत्तसहस्सातिं अट्ठ य मुहुत्तसयाइं मुहुत्तग्गेणं आहिता।**

**टी०** '**ता एएसि ण**'मित्यादि। तृतीयऋतुसंवत्सरविषयं प्रश्नसूत्रं सुगमम्। भगवानाह - '**ता तीस**'मित्यादि। '**ता**' इति पूर्ववत्, **त्रिंशद्रात्रिन्दिवानि रात्रिन्दिवाग्रेण** ऋतुमास **आख्यात इति वदेत्**। तथाहि - ऋतुमासा युगे एकषष्टिः। ततो युगसत्कानां (अष्टादशशतसङ्ख्यानां) त्रिंशदधिकानामहोरात्राणामेकषष्ट्या भागो ह्रियते, लब्धाः त्रिंशदहोरात्राः ३०। '**ता से ण**'मित्यादि मुहूर्त्तविषयं प्रश्नसूत्रं सुगमम्। भगवानाह- '**ता नव मुहुत्तसयाइं**' इत्यादि। **नव मुहूर्त्तशतानि मुहूर्त्ताग्रेणाख्यात इति वदेत्**। तथाहि - त्रिंशद्रात्रिन्दिवानि ऋतुमासपरिमाण-मेकस्मिंश्च रात्रिन्दिवे त्रिंशन्मुहूर्त्तास्ततस्त्रिंशतस्त्रिंशता गुणने नवशतानि भवन्तीति। '**ता ए[एसि](स) ण**'मित्यादि प्राग्वद्भावनीयम्।

**मूलम् - ता एएसि णं पंचण्हं संवच्छराणं चउत्थस्स आदिच्च-संवच्छरस्स आदिच्चे मासे तीसइमुहु० पुच्छा तहेव ? ता तीसं राइंदियाइं[1] अवड्ढभागं च रातिंदियस्स रातिंदियग्गेणं आहिते ति वदेज्जा। ता से णं केवतिए मुहुत्त० पुच्छा ? ता णव पण्णरसे[2] मुहुत्तसए मुहुत्तग्गेणं आहिता। ता एस णं अद्धा दुवालसखुत्तकडा आदिच्चे संवच्छरे। ता से णं केवतिते पुच्छा? ता तिण्णि छावट्ठे रातिंदियसते रातिंदियग्गेणं आहिता। ता से णं केवतिते मुहुत्तग्गेणं आहिते ? ता दस मुहुत्तसहस्साइं णव त असीते मुहुत्तसते मुहुत्तग्गेणं आहिता।**

**टी०** '**ता एएसि ण**'मित्यादि। चतुर्थसूर्यसंवत्सरविषयं प्रश्नसूत्रं सुगमम्। भगवानाह- '**ता तीस**'मित्यादि। '**ता**' इति पूर्ववत्, **त्रिंशद्रात्रिन्दिवानि** एकस्य

---

१. राइंदियाणि - H, V। २. पण्णारे - H।

च **रात्रिन्दिवस्य** एकम[प्प्य](**पा)र्द्धभाग**मेकमर्द्धभागमेकमर्द्धमित्यर्थः। एतावत्प्रमाणः सूर्यमासो **रात्रिन्दिवाग्रेणाख्यात इति वदेत्**। तथाहि - सूर्यमासा युगे षष्टिस्ततो युगसत्कानामहोरात्राणां त्रिंशदधिकाष्टादशशतसङ्ख्यानां षष्ट्या भागो ह्रियते, लब्धाः सार्द्धत्रिंशदहोरात्राः। '**ता से ण**'मित्यादि। मुहूर्त्तविषयं प्रश्नसूत्रं सुगमम्। भगवानाह - '**नव पन्नारे**' इत्यादि। नव मुहूर्त्तानां शतानि पञ्चदशाधिकानि मुहूर्त्तपरिमाणेनाऽऽ-**ख्यात** इति वदेत्। तथाहि - सूर्यमासपरिमाणं त्रिंशद्रात्रिन्दिवानि एकस्य च रात्रिन्दिवस्यार्द्धं, तत्र त्रिंशत् त्रिंशता गुण्यते, जातानि नव शतानि, रात्रिन्दिवार्द्धे च पञ्चदश मुहूर्त्ता इति। '**ता एस ण**'मित्यादि (प्राग्वद् भावनीयम्।)

**मू० ता एएसि णं पंचण्हं संवच्छराणं पंचमस्स [1]अभिवड्ढि-तसंवच्छरस्स अभिवड्ढितमासे तीसतिमुहुत्तेणं अहोरत्तेणं गणिज्जमाणे केवतिते रातिंदियग्गेणं आहिते ? ता एक्कतीसं रातिंदियाइं अगुणतीसं च मुहुत्ता सत्तरस त बावट्ठिभागे मुहुत्तस्स रातिंदियग्गेणं आहिते ति वदेज्जा। ता से णं केवतिते मुहुत्तग्गेणं आहिते ? ता णव [2]अगुणट्ठे मुहत्तसते सत्तरस त बावट्ठिभागे मुहुत्तस्स मुहुत्तग्गेणं आहिते ति। ता एस णं अद्धा दुवालसखुत्तकडा अभिवड्ढिए संवच्छरे। ता से णं केवतिते रातिंदियग्गेणं आहितेति वदेज्जा? ता तिण्णि तेसीए रातिंदियसते [3]एक्कवीसं च मुहुत्ते अट्ठारस य बावट्ठिभागे मुहुत्तस्स रातिंदियग्गेणं आहितेति वदेज्जा। ता से णं केवइए मुहुत्तग्गेणं आहिते ति वदेज्जा ? ता एक्कारसमुहुत्तसहस्से पंच य एक्कारसमुहुत्तसते अट्ठारस त बावट्ठिभागे मुहुत्तस्स मुहुत्तग्गेणं आहिते ति वदेज्जा।**

**टी०** ('**ता एएसि ण**'मित्यादि) पञ्चमाभिवर्द्धितसंवत्सरविषयं प्रश्नसूत्रं सुगमम्। भगवानाह - '**ता एक्कतीस**'मित्यादि। '**ता**' इति पूर्ववत्, **एकत्रिंशत्**

---

१. अभिवड्ढितस्स संवच्छरस्स - H, Q। २. अगुणसट्ठे - U। ३. एक्कवीसं मुहुत्ते - H।

**रात्रिन्दिवानि एकोनत्रिंशच्च मुहूर्त्ता** एकस्य च **मुहूर्त्तस्य सप्तदश द्वाषष्टिभागा रात्रिन्दिवाऽग्रेणाख्यात इति वदेत्**। तथाहि - त्रयोदशभिश्चन्द्रमासैरभिवर्द्धित-संवत्सरः, चन्द्रमासस्य च परिमाणमेकोनत्रिंशद्रात्रिन्दिवानि एकस्य च रात्रिन्दिवस्य[1] द्वात्रिंशद्द्वाषष्टिभागाः २९ ३२/६२। एतत् त्रयोदशभिर्गुण्यते। ततो यथासम्भवं द्वाषष्टिभागै रात्रिन्दिवेषु (जातेषु) जातमिदं त्रीण्यहोरात्रशतानि त्र्यशीत्यधिकानि चतुश्चत्वारिंशच्च द्वाषष्टिभागा अहोरात्रस्य ३८३ ४४/६२। एतदभिवर्द्धितसंवत्सर-परिमाणम्। तत एतस्य द्वादशभि[र्गुण्यते](र्भागो ह्रियते)। तत्र त्रयाणामहोरात्रशतानां त्र्यशीत्यधिकानां द्वादशभिर्भागे हृते लब्धा एकत्रिंशदहोरात्राः, शेषास्तिष्ठन्त्येकादश, ते मुहूर्त्तकरणार्थं त्रिंशता गुण्यन्ते, जातानि त्रिंशदधिकानि त्रीणि शतानि ३३०। येऽपि च चतुश्चत्वारिंशद् द्वाषष्टिभागा रात्रिन्दिवस्य तेऽपि मुहूर्त्तकरणार्थं त्रिंशता गुण्यन्ते, जातानि त्रयोदशशतानि विंशत्यधिकानि १,३२०। तेषां द्वाषष्ट्या भागो ह्रियते, लब्धा एकविंशतिमुहूर्त्ताः, शेषास्तिष्ठन्त्यष्टादश। तत्रैकविंशतिमुहूर्त्ता मुहूर्त्तराशौ प्रक्षिप्यन्ते, जातानि मुहूर्त्तानां त्रीणि शतान्येकपञ्चाशदधिकानि ३५१। तेषां द्वादशभिर्भागो ह्रियते, लब्धा एकोनत्रिंशत् मुहूर्त्ताः, शेषास्तिष्ठन्ति त्रयः। ते द्वाषष्टिभागकरणार्थं द्वाषष्ट्या गुण्यन्ते, जातं षडशीत्यधिकं शतं १८६। ततः प्रागुक्ताः शे[षास्ततो](षीभूता) मुहूर्त्तस्याष्टादश द्वाषष्टिभागाः प्रक्षिप्यन्ते, जाते द्वे शते चतुरुत्तरे २०४, तयोर्द्वादशभिर्भागो ह्रियते, लब्धा मुहूर्त्तस्य सप्तदश द्वाषष्टिभागाः। **'ता से ण'**मित्यादि। **'ता'** इति पूर्ववत्, **सो**ऽभिवर्द्धितमासः **कियान् मुहूर्त्ताग्रेणाख्यात** इति वदेत् ? भगवानाह - **'ता नवे'**त्यादि। **नव मुहूर्त्तशतानि एकोन-षष्ट्यधिकानि** ९५९ **सप्तदश च मुहूर्त्तस्य द्वाषष्टिभागाः**। तथाहि - एकत्रिं-शदप्यहोरात्रा त्रिंशता गुण्यन्ते, जातानि नव शतानि त्रिंशदधिकानि मुहूर्त्तानाम्। तत उपरितना एकोनत्रिंशन्मुहूर्त्तास्तत्र प्रक्षिप्यन्ते, जातानि मुहूर्त्तानामेकोन-

---

१. रात्रिन्दिवसस्य - N।

षष्ट्यधिकानि नव शतानि। **'ता ए[एसि](स) ण'**मित्यादि प्राग्वत् व्याख्येयम्। **'ता से ण'**मित्यादि रात्रिन्दिवप्रश्नसूत्रं सुगमम्। भगवानाह- **'ता तिण्णी'**त्यादि। **त्रीणि रात्रिन्दिवशतानि त्र्यशीत्यधिकानि एकविंशतिमुहूर्त्ता** एकस्य च **मुहूर्त्तस्याष्टादश द्वाषष्टिभागा रात्रिन्दिवाग्रेणाख्यात इति वदेत्**। तथाहि - एकत्रिंशत् अहोरात्रा द्वादशभिर्गुण्यन्ते, जातानि त्रीणि शतानि द्विसप्तत्यधिकानि रात्रिन्दिवानां ३७२। तत एकोनत्रिंशत् मुहूर्त्ता द्वादशभिर्गुण्यन्ते, जातानि त्रीणि शतानि अष्टाचत्वारिंशदधिकानि ३४८। तेषामहोरात्रकरणार्थं त्रिंशता भागो ह्रियते, लब्धा एकादश अहोरात्राः, अष्टादश तिष्ठन्ति, येऽपि च सप्तदश द्वाषष्टिभागाः मुहूर्त्तस्य तेऽपि द्वादशभिर्गुण्यन्ते, जाते द्वे शते चतुरुत्तरे २०४, तयोर्द्वाषष्ट्या भागो ह्रियते, लब्धास्त्रयो मुहूर्त्तास्ते प्राक्तनेषु अष्टादशसु मध्ये प्रक्षिप्यन्ते, जाता एकविंशतिमुहूर्त्ताः, शेषास्तिष्ठन्त्यष्टादश द्वाषष्टिभागा मुहूर्त्तस्य। **'ता से ण'**मित्यादि प्रश्नसूत्रं सुगमम्। भगवानाह- **'(ता) एक्कारसे'**त्यादि। **एकादशमुहूर्त्तसहस्राणि पञ्चमुहूर्त्तशतानि एकादशाधिकानि अष्टादश च द्वाषष्टिभागा मुहूर्त्तस्येति मुहूर्त्ताग्रेणा-**भिवर्द्धितसंवत्सर **आख्यात इति वदेत्**। तथाहि - अभिवर्द्धितसंवत्सरस्य परिमाणं त्रीण्यहोरात्रशतानि त्र्यशीत्यधिकानि एकविंशतिमुहूर्त्ता एकस्य च मुहूर्त्तस्याष्टादश द्वाषष्टिभागाः। तत्र एकैकस्मिन्रात्रिन्दिवे त्रिंशत् मुहूर्त्ता इति त्रीण्यहोरात्रशतानि त्र्यशीत्यधिकानि त्रिंशता गुण्यन्ते, गुणयित्वा चोपरितना एकविंशतिमुहूर्त्तास्तत्र प्रक्षिप्यन्ते। ततो यथोक्ता मुहूर्त्तसङ्ख्या भवतीति।

सम्प्रत्येते पञ्च संवत्सरा एकत्र मीलिता यावत्प्रमाणा रात्रिन्दिवपरिमाणेन भवन्ति [त](ताव)तो निर्दिदिक्षुः प्रथमतः प्रश्नसूत्रमाह-

**मू० ता केवइयं ते णोजुगे रातिंदियग्गेणं आहिताति वदेज्जा?**

**टी० 'ता केवइयं नोजुगे'**त्यादि। **'ता'** इति पूर्ववत्, **कियत्** - किम्प्रमाणं **'ते'** - **त्वया** भगवन् ! **नोयुगं** नोशब्दो देशतो निषेधवचनः किञ्चिदूनं युगमित्यर्थः,

**रात्रिन्दिवाग्रेण**-रात्रिन्दिवपरिमाणेनाऽऽ**ख्यातमिति वदेत्**?

भगवानाह-

**मू० ता सत्तरस एक्काणउते रातिंदियसते अगुणवीसं च मुहूत्ते सत्तावण्णं च बावट्ठिभागे मुहुत्तस्स बावट्ठिभागं च सत्तट्ठिधा छेत्ता पणपण्णं चुण्णिया भागा[1] रातिंदियग्गेणं आहिते ति वदेज्जा।**

**टी० 'ता सत्तरस'** इत्यादि। नोयुगं हि किञ्चिदूनं युगं, तच्च नक्षत्रादिपञ्च-संवत्सरपरिमाणम्। ततो नक्षत्रादिपञ्चसंवत्सरपरिमाणानामेकत्र मीलने भवति यथोक्ता रात्रिन्दिवसङ्ख्या, तथाहि- नक्षत्रसंवत्सरस्य परिमाणं (त्रीणि) रात्रिन्दिवशतानि सप्तविंशत्यधिकानि एकस्य रात्रिन्दिवस्य एकपञ्चाशत् सप्तषष्टिभागाः, चन्द्रसंवत्सरस्य त्रीणि रात्रिन्दिवशतानि चतुष्पञ्चाशदधिकानि [2]द्वादश च द्वाषष्टिभागा रात्रिन्दिवस्य, ऋतुसंवत्सरस्य त्रीणि रात्रिन्दिवशतानि षष्ट्यधिकानि, सूर्यसंवत्सरस्य त्रीणि शतानि षट्षष्ट्यधिकानि रात्रिन्दिवानाम्, अभिवर्द्धितसंवत्सरस्य त्रीणि रात्रिन्दिवशतानि त्र्यशीत्यधिकानि एकविंशतिश्च मुहूर्त्ता एकस्य च मुहूर्त्तस्याष्टादश द्वाषष्टिभागाः। तत्र सर्वेषां रात्रिन्दिवानामेकत्र मीलने जातानि सप्तदशशतानि नवत्यधिकानि। ये च एकपञ्चाशत् सप्तषष्टिभागा रात्रिन्दिवस्य ते मुहूर्त्तकरणार्थं त्रिंशता गुण्यन्ते, जातानि पञ्चदश शतानि त्रिंशदधिकानि १,५३०, तेषां सप्तषष्ट्या भागो ह्रियते, लब्धा द्वाविंशतिर्मुहूर्त्ता एकस्य च मुहूर्त्तस्य षट्पञ्चाशत् सप्तषष्टिभागाः ५६/६७, मुहूर्त्ताश्च लब्धा एकविंशतौ मुहूर्त्तेषु मध्ये प्रक्षिप्यन्ते, जातास्त्रिचत्वारिंशत्मुहूर्त्तास्तत्र त्रिंशताऽहोरात्रो लब्ध इति जातान्यहोरात्राणां सप्तदशशतान्येकनवत्यधिकानि १७९१, शेषास्तिष्ठन्ति मुहूर्त्तास्त्रयोदश। येऽपि च द्वाषष्टिभागा अहोरात्रस्य द्वादश तेऽपि मुहूर्त्तकरणार्थं त्रिंशता गुण्यन्ते, जातानि त्रीणि शतानि षष्ट्यधिकानि ३६०, तेषां द्वाषष्ट्या भागो ह्रियते, लब्धाः पञ्च मुहूर्त्तास्ते प्रागुक्तेषु त्रयोदशसु मुहूर्त्तेषु

---

१. भागे - A, B, C, D, E, F, G। २. द्वादश द्वाषष्टि... - E।

मध्ये प्रक्षिप्यन्ते, जाता अष्टादश, शेषास्तिष्ठन्ति पञ्चाशत् द्वाषष्टिभागा मुहूर्त्तस्य, येऽपि च षट्पञ्चाशत् सप्तषष्टिभागा मुहूर्त्तस्य ते त्रैराशिकेन द्वाषष्टिभागा एवं क्रियन्ते - यदि सप्तषष्ट्या द्वाषष्टिभागा लभ्यन्ते ततः षट्पञ्चाशता सप्तषष्टिभा[गाः](गैः) कियन्तो द्वाषष्टिभागा लभ्यन्ते ? राशित्रयस्थापना ६७।६२।५६। अत्रान्त्येन राशिना मध्यराशेर्गुणनं, जातानि चतुस्त्रिंशच्छतानि द्विसप्तत्यधिकानि ३,४७२। तेषामादिराशिना सप्तषष्ट्या भागो ह्रियते, लब्धा एकपञ्चाशत् द्वाषष्टिभागाः। ते प्रागुक्तेषु पञ्चाशति द्वाषष्टिभागेष्वेव प्रक्षिप्यन्ते, जातमेकोत्तरं शतं १०१। ततस्तन्मध्येऽभिवर्द्धितसंवत्सरसत्का उपरिनाश्चाष्टादश द्वाषष्टिभागाः प्रक्षिप्यन्ते, जातमेकोनविंशत्यधिकं शतं द्वाषष्टिभागानां ११९, शेषाश्च तिष्ठन्ति पञ्चपञ्चाशत् द्वाषष्टिभागस्य सप्तषष्टिभागाः ५५/६७, द्वाषष्ट्या च द्वाषष्टिभागैरेको मुहूर्त्तो लब्धः, स प्राक्तनेष्वष्टादशसु मुहूर्त्तेषु मध्ये प्रक्षिप्यते, जाता एकोनविंशतिमुहूर्त्ता १९, शेषाः सप्तपञ्चाशत् द्वाषष्टिभागा अवतिष्ठन्ते इति।

**मू० ता से णं केवइए मुहुत्तग्गेणं आहिए त्ति वइज्जा ? ता तेपण्णं मुहुत्तसहस्साइं सत्त य अगुणपण्णे मुहुत्तसते [1]सत्तावण्णं च बावट्ठिभागे य बावट्ठिभागं च सत्तट्ठिधा छेत्ता पणपण्णं च चुण्णिया भागा मुहुत्तग्गेणं आहिताति वदेज्जा।**

**टी० 'ता से ण'**मित्यादि। मुहूर्त्तपरिमाणविषयं प्रश्नसूत्रं निर्वचनसूत्रं च सुगमम्। रात्रिन्दिवपरिमाणस्य त्रिंशता गुणनात्तदुपरि शेषमुहूर्त्तप्रक्षेपे च यथोक्तमुहूर्त्तपरिमाणसमागमात्।

**मू० ता केवतिए (णं) ते जुगपत्ते रातिंदियग्गेणं आहिताति वदेज्जा। ता अट्ठतीसं रातिंदियाइं दस य मुहुत्ते चत्तारि बावट्ठिभागे मुहुत्तस्स बावट्ठिभागं च सत्तट्ठिहा छेत्ता दुवालस चुण्णिया भागा**

---

१. सत्तावण्णं बावट्ठि - H।

**रातिंदियग्गेणं आहिताति वदेज्जा।**

**टी० 'ता केवइए णं ते'** इत्यादि। **'ता'** इति पूर्ववत्, **कियता** रात्रिन्दिवपरिमाणेन (तदेव नोयुगं) **युगप्राप्तमाख्यातमिति वदेत्** ? (कियत्सु रात्रिन्दिवेषु प्रक्षिप्तेषु तदेव नोयुगं परिपूर्णं युगं भवतीति भावः। भगवानाह- **'ता अट्ठतीस'**मित्यादि। **अष्टात्रिंशद् रात्रिन्दिवानि दश मुहूर्त्ता** एकस्य च **मुहूर्त्तस्य चत्वारो द्वाषष्टिभागा** एकं च **द्वाषष्टिभागं सप्तषष्टिधा छित्त्वा** तस्य सत्का **द्वादश चूर्णिका भागा** इत्येतावता रात्रिन्दिवपरिमाणेन युगप्राप्तमा**ख्यातमिति वदेत्**।) एतावत्सु रात्रिन्दिवादिषु प्रक्षिप्तेषु तत् नोयुगं परिपूर्ण्णं भवतीति भावः।

सम्प्रति तदेव नोयुगं (मुहूर्त्त)परिमाणात्मकं यावता मुहूर्त्तपरिमाणेन प्रक्षिप्तेन परिपूर्ण्णं युगं भवति तद्विषयं प्रश्नसूत्रमाह-

**मू० ता से णं केवतिते मुहुत्तग्गेणं आहिते ति ? (ता) एक्कारस पन्नास मुहुत्तसत्ते चत्तारि य बावट्ठिभागे बावट्ठिभागं च सत्तट्ठिहा छेत्ता दुवालस चुण्णिया भागे मुहुत्तग्गेणं आहिता ति वदेज्जा।**

**टी० 'ता से ण'**मित्यादि सुगमम्। भगवानाह- **'ता एक्कारसे'**त्यादि। इदश्चाष्टात्रिंशतो रात्रिन्दिवानां त्रिंशता गुणने शेषमुहूर्त्तादिप्रक्षेपे च यथोक्तं भवति। भावार्थश्चायं - एतावति मुहूर्त्तपरिमाणे प्रक्षिप्ते प्रागुक्तं नोयुगमुहूर्त्तपरिमाणं परिपूर्ण्ण-युगमुहूर्त्तपरिमाणं भवतीति।

सम्प्रति युगस्यैव रात्रिन्दिवपरिमाणं मुहूर्त्तपरिमाणं च प्रतिपिपादयिषुः प्रश्ननिर्वचनसूत्राण्याह-

**मू० ता केवतियं ते जुगे रातिंदियग्गेणं आहिते ति ? ता अट्ठारस तीसे रातिंदियसते रातिंदियग्गेणं आहितेति। ता से णं केवतिते मुहुत्तग्गेणं आहितेति वदेज्जा ? ता चउप्पण्णं मुहुत्तसहस्साइं णव त मुहुत्तसए मुहुत्तग्गेणं आहितेति वदेज्जा।**

**टी० 'ता केवइयं ते'** इत्यादि सुगमम्।

अधुना समस्तयुगविष[यः स च](ये एव) मुहूर्त्तगतद्वाषष्टिभागपरिज्ञानार्थं प्रश्नसूत्रमाह-

**मू० ता से णं केवतिते बावट्ठिभागमुहुत्तग्गेणं आहिते ? ता चोत्तीसं सतसहस्सं अट्ठतीसं च बावट्ठीभागमुहुत्तसते बावट्ठिभाग-मुहुत्तग्गेणं आहितेति।**

**टी० 'ता से ण'**मित्यादि सुगमम्। भगवानाह - **'ता चोत्तीस'**मित्यादि। इदमप्यक्षरार्थमधिकृत्य सुगमम्। भावार्थस्त्वयं-चतुष्पञ्चाशन्मुहूर्त्तसहस्राणां नवशता-धिकानां द्वाषष्ट्या गुणनं क्रियते। ततो यथोक्ता द्वाषष्टिभागसङ्ख्या भवतीति।

सम्प्रति कदा(ऽसौ चन्द्रसंवत्सरः) सूर्यसंवत्सरेण सह समादिः (सम)पर्यवसानो भवतीति जिज्ञासुः प्रश्नं करोति-

**मू० ता कता णं ते आदिच्चचंदसंवच्छरा समातीता समपज्ज-वसिता आहिता ति वदेज्जा ? ता सट्ठिं एए आदिच्चमासा बावट्ठिं एए चंदमासा, एस णं अद्धा छक्खुत्तकडा दुवालसभतिता तीसं एए आदिच्चसंवच्छरा एक्कत्तीसं एए चंदसंवच्छरा, तया णं एए आदिच्च-चंदसंवच्छरा समातीता समपज्जवसिया आहिता ति वदेज्जा।**

**टी० 'ता कया ण'**मित्यादि सुगमम्। भगवानाह- **'ता सट्ठि'**मित्यादि। **'ता'** इति पूर्ववत्, **एते** - एकयुगवर्त्तिनः **षष्टिः सूर्यमासा एते** च एकयुगवर्त्तिन एव **द्वाषष्टिश्चन्द्रमासाः, एतावती अद्धा षट्कृत्वः** क्रियते षड्भिर्गुण्यते इत्यर्थः, ततो द्वादशभिर्भज्यते, द्वादशभिश्च भागे हृते **त्रिंशदेते सूर्यसंवत्सरा** भवन्ति **एकत्रिंशदेते चन्द्रसंवत्सराः,** तदा एतावति कालेऽतिक्रान्ते **एते आदित्यचन्द्रसंवत्सराः समादयः** समप्रारम्भाः **समपर्यवसिताः** - समपर्यवसाना **आख्याता इति वदेत्।** किमुक्तं भवति ? एते चन्द्रसूर्यसंवत्सरा[दि] विवक्षितयुगस्यादौ समाः- समारम्भारब्धाः

सन्तः तत आरभ्य षष्ठयुगपर्यवसाने समपर्य[न्त]वसाना भवन्ति, तथाहि - एकस्मिन्युगे त्रयश्चन्द्रसंवत्सरा द्वौ चाभिवर्द्धितसंवत्सरौ, तौ च प्रत्येकं त्रयोदशचन्द्र-मासात्म[कस्](कौ,)ततः प्रथमे युगे पञ्च चन्द्रसंवत्सरा द्वौ च चन्द्रमासौ, द्वितीये युगे दश चन्द्रसंवत्सराश्चत्वारश्चन्द्रमासाः, एवं प्रतियु[गे](गं) मासद्विकवृद्ध्या षष्ठयुगपर्यन्ते परिपूर्णा एकत्रिंशच्चन्द्रसंवत्सरा भवन्ति।

**मू० ता कता णं एए आदिच्चउडुचंदणक्खत्ता संवच्छरा समातीया समपज्जवसिया आहिता? ता सट्ठिं एए आदिच्चमासा एगट्ठिं एए उडुमासा बावट्ठिं एए चंदमासा सत्तट्ठिं एए नक्खत्तमासा एस णं अद्धा दुवालसखुत्तकडा दुवालसभइया सट्ठिं एए आदिच्चसंवच्छरा एगट्ठिं एए उडुसंवच्छरा बावट्ठिं एए चंदसंवच्छरा सत्तट्ठिं एए नक्खत्तसंवच्छरा, तया णं एए आदिच्चउडूचंदणक्खत्ता संवच्छरा समातीता समपज्जवसिता आहिता।**

**टी०** '**ता कया ण**'मित्यादि। '**ता**' इति पूर्ववत्, **कदा** '**ण**'मिति वाक्यालङ्कारे (एते) **आदित्यऋतुचन्द्रनक्षत्रसंवत्सराः समादिकाः समपर्यवसिता (आख्याता)** इति वदेत् ? भगवानाह - '**[स]ता स[ट्ठी](ट्ठि)**' [इ](मि)त्यादि। **षष्टिरेते** एकयुगान्त[व](र्व)र्त्तिन **आदित्यमासा एकषष्टिरेते ऋतुमासा (द्वाषष्टिरेते चन्द्रमासाः) सप्तषष्टिरेते नक्षत्रमासाः, एतावती** प्रत्येकम**द्धा द्वादशकृत्वःकृता** द्वादशभिर्गुणिता इत्यर्थः तदनन्तरं संवत्सरानयनाय **द्वादशभिर्भक्ता** तत एव**मेते षष्टिरादित्यसंवत्सरा एकषष्टिरेते ऋतुसंवत्सरा द्वाषष्टिरेते (चन्द्रसंवत्सराः सप्तषष्टिरेते) नक्षत्रसंवत्सराः, तदा** (द्वादश)युगातिक्रमे[ण] इत्यर्थः, **एते आदित्य-ऋतुचन्द्रनक्षत्रसंवत्सराः समादिकाः समपर्यवसिता आख्याता** इति वदेत्। एतदुक्तं भवति - विवक्षितयुगस्यादावेते चत्वारोऽपि समाः-समारब्धप्रारम्भाः सन्तस्तत आरभ्य द्वादशयुगपर्यन्ते समपर्यवसाना भवन्ति, अर्वाक् चतुर्णामन्यत-

मस्यावश्यम्भावेन कतिपयमासाधिकतया युगपत् सर्वेषां समपर्यवसानत्वासम्भवात्।

**मू० ता कता णं एए अभिवड्डियआदिच्चउडुचंदणक्खत्ता संवच्छरा समातीता समपज्जवसिता आहिता ? ता सत्तापण्णं मासा सत्त य अहोरत्ता एक्कारस य मुहुत्ता तेवीसं च बावट्ठिभागा मुहुत्तस्स एए णं अभिवड्डियमासा सट्ठिं एए आइच्चमासा एगट्ठिं एए उडुमासा बावट्ठिं एए चंदमासा सत्तट्ठिं एए णक्खत्तमासा एस णं अद्धा छप्पण्णसतखुत्तकडा दुवालसभइया सत्त सया चोयाला एए णं अभिवड्डितसंवच्छरा, सत्तसया असीता एए णं आदिच्चसंवच्छरा, सत्त सया तेणउया एए णं उडुसंवच्छरा, अट्ठसता छडुत्तरा[1] एए णं चंदसंवच्छरा, अट्ठसता एगसत्तरा एए णं णक्खत्तसंवच्छरा, तता णं एए अभिवड्डिय-आदिच्च-उडु-चंद-णक्खत्तसंवच्छरा समातीया समपज्जवसिता आहिते (त्ति वदेज्जा)। ता णयट्ठताए णं चंदे संवच्छरे तिण्णि चउप्पण्णे रातिंदियसते दुवालस त बावट्ठीभागे रातिंदियस्स आहिते, अहातच्चेणं चंदे संवच्छरे तिण्णि चउप्पण्णे रातिंदियसते पंच य मुहुत्ते पण्णासं च बावट्ठिभागे मुहुत्तस्स आहिते ति (वदेज्जा)।**

**टी०** '**ता कया ण**'मित्यादि प्रश्नसूत्रं सुगमम्। भगवानाह- '**सत्तावन्न**'मित्यादि। **सप्तपञ्चाशन्मासाः सप्त अहोरात्रा एकादश मुहूर्त्ता** एकस्य च **मुहूर्त्तस्य त्रयोविंशतिर्द्वाषष्टिभागा** एतावत्प्रमाणा एकयुगान्तर्वर्त्तिनोऽ**भिवर्द्धितमासाः, षष्टिरेते सूर्यमासाः, एकषष्टिरेते ऋतुमासाः, द्वाषष्टिरेते चन्द्रमासाः, सप्तषष्टिरेते नक्षत्रमासाः, एतावती** प्रत्येकम**द्धा षट्पञ्चाशदधिकशतकृत्वः** क्रियते, कृत्वा च द्वादशभिर्भज्यते, द्वादशभिश्च भागे हृते **चतुश्चत्वारिंशदधिकसप्तशतसङ्ख्या** ७४४ **एतेऽभिवर्द्धितसंवत्सराः, अशीत्यधिकसप्तशतसङ्ख्या** ७८० **एते**

१. छलुत्तरा - U।

**आदित्यसंवत्सराः, त्रिनवत्यधिकसप्तशत**सङ्ख्याः ७९३ **एते ऋतुसंवत्सराः, ष[ट्सप्तत्यु](ड्)त्तराष्टशत**सङ्ख्याः ८[७](०)६ **एते चन्द्रसंवत्सराः, एकसप्तत्यधिकाष्टशत**सङ्ख्याः ८७१ **(एते) नक्षत्रसंवत्सराः, तदा 'ण'**मिति वाक्यालङ्कारे **अभिवर्द्धितादित्यऋतुचन्द्रनक्षत्रसंवत्सराः समादिकाः समपर्यवसिता आख्याता** इति वदेत्। अर्वाक्कस्यापि कतिपयमासाधिकत्वेन युगपत्सर्वेषां समपर्यवसानत्वासम्भवात्। सम्प्रति यथोक्तमेव चन्द्रसंवत्सरपरिमाणं गणितभेदमधिकृत्य प्रकारद्वयेनाह **'ता नयअट्ठयाए'** इत्यादि। **'ता'** इति पूर्ववत्, **नयार्थ**[क]-(त)**या** परतीर्थिकानामपि सम्मतस्य नयस्य चिन्तया **चन्द्रसंवत्सरस्त्रीण्यहोरात्रशतानि चतुष्पञ्चाशद**धिकानि **द्वादश च द्वाषष्टिभागा** अहोरात्रस्येत्य**आख्यात** इति वदेत्, **याथातथ्येन** पुनश्चिन्त्यमान**श्चन्द्रसंवत्सरस्त्रीणी रात्रिन्दिवशतानि चतुष्पञ्चाशदधिकानि पञ्च मुहूर्त्ता** एकस्य च **मुहूर्त्तस्य पञ्चाशत् द्वाषष्टिभागा** इत्ये[व]-(वम्प्रमाण) **आख्यात इति वदेत्**। तत्राहोरात्रपरिमाणमुभयत्रापि तावदेकरूपं, ये तूपरितना द्वादश द्वाषष्टिभागा रात्रिन्दिवस्य ते मुहूर्त्तकरणार्थं त्रिंशता गुण्यन्ते, जातानि त्रीणि शतानि षष्ट्यधिकानि ३६०, तेषां द्वाषष्ट्या भागो ह्रियते, लब्धाः पञ्च मुहूर्त्ताः शेषास्तिष्ठन्ति पञ्चाशत् मुहूर्त्तस्य द्वाषष्टिभागा इति।

तदेवं संवत्सरवक्तव्यता सप्रपञ्चमुक्ता। साम्प्रतमृतुवक्तव्यतामाह-

**मू० तत्थ खलु इमे छ उडू प० तं० पाउसे वरिसारत्ते सरदे हेमंते वसंते गिम्हे। ता सव्वे वि णं एए चंदउडू दुवे दुवे मासा तिचउप्पण्णेणं[1] तिचउप्पण्णेणं आदाणेणं गणिज्जमाणे सातिरेगाइं अगुणसट्ठिं २ रातिंदियाइं राइंदियग्गेणं आहिता।**

**टी० 'तत्थ खलु'** इत्यादि। **तत्रास्मिन्**मनुष्यलोके प्रतिसूर्यायनं प्रतिचन्द्रायणं च **खल्विमे षट् ऋतवः प्रज्ञप्तास्तद्यथा प्रावृट् वर्षारात्रः शर[दो](द्) हेमन्तो वसन्तो ग्रीष्मः**। इहलोकेऽन्यथाऽभि[2]धानऋतवः प्रसिद्धास्तद्यथा प्रावृट् शरद् हेमन्तः

१. तिचउप्पण्णएणं - U। २. ...भिधाना ऋतवः... - I, C।

शिशिरो वसन्तः ग्रीष्मश्चेति। जिनमते तु यथोक्ताभिधाना एव ऋतवस्तथा चोक्तं - '**पाउस१ वासारत्तो२ सरओ३ हेमंत४ वसंत५ गिम्हो६ य। एए खलु छप्पि उऊ जिणवरदिट्ठा मए सिट्ठा॥२८०॥**' **(जो.प.)** इह ऋतवो द्विधा - तद्यथा सूर्यर्त्तवश्चन्द्रर्त्तवश्च। तत्र प्रथमतः सूर्य(र्त्तु)वक्तव्यता प्रस्तूयते - तत्रैकस्य सूर्यर्त्तोः परिमाणं द्वौ सूर्यमासावेकषष्टिरहोरात्रा इत्यर्थः, एकैकस्य सूर्यमासस्य सार्द्धत्रिंश-दहोरात्रप्रमाणत्वात्, उक्तश्चैतदन्यत्रापि - '**बे आइच्चा मासा एगट्ठी ते भवंत-होरत्ता। एयं उउपरिमाणं अवगयमाणा जिणा बेंति॥२७६॥**' **(जो.प.)** इह पूर्वाचार्यैरीप्सितसूर्यर्त्त्वानयने करणमुक्तम्। तद्विनेयजनानुग्रहायोपदर्श्यते- '**सूरउ-उस्साणयणे पव्वं पन्नरससंगुणं नियमा। तिहिसंखित्तं संतं बावट्ठिभाग-परिहीणं॥२७७॥ दुगुणेगट्ठीए जुयं बावीससएण भाइए नियमा। जं लद्धं तस्स पुणो छहि हिय सेसे उऊ होइ॥२७८॥ सेसाणं अंसाणं बेहि उ भागे हितम्मि जं लद्धं। ते दिवसा नायव्वा होंति पवत्तस्स** [अयण](उउ) **स्स॥२७९॥**' **(जो.प.)** आसां व्याख्या - सूर्यस्य सम्बन्धिन ऋतोरानयने **पर्व-**पर्वसङ्ख्यानं नियमात्**पञ्चदशसङ्गुणं** कर्त्तव्यं, पर्वणां पञ्चदशतिथ्यात्मकत्वात्, इयमत्र भावना - यद्यपि ऋतव आषाढादिप्रभवास्तथापि युगं प्रवर्त्तते श्रावणबहुल-पक्षप्रतिप[दा](द) (आ)रभ्य, ततो युगादित आरभ्य प्रवृत्तानि यानि पर्वाणि तत्सङ्ख्या पञ्चदश(गुणा) क्रियते, कृत्वा पर्वणामुपरि या विवक्षितं दिनमभिव्याप्य तिथयस्तास्तत्र सङ्क्षिप्यन्ते प्रक्षिप्यन्ते इत्यर्थः, त[उ](तो) '**बावट्ठीभागपरिहीणं**' ति प्रत्यहोरात्रमेकैकेन द्वाषष्टिभागेन परीहीयमानेन ये निष्पन्ना अवमरात्रास्तेऽप्युप-चारात् द्वाषष्टिभागास्तैः परीहीनं पर्वसङ्ख्यानं कर्त्तव्यम्॥२७७॥ ततो '**दुगुणे**' त्ति द्वाभ्यां गुण्यते, गुणयित्वा च एकषष्ट्या युतं क्रियते, ततो द्वाविं(शेन) शतेन भाजिते सति यल्लब्धं तस्य षड्भिर्भागे हृते यत् शेषं स ऋतुरनन्तरातीतो भवति॥२७८॥ येऽपि चांशाः शेषा उद्धरितास्तेषां द्वाभ्यां भागे हृते (यल)लब[धा](धं

ते दिवसाः) प्रवर्त्तमानस्य ऋतोर्ज्ञातव्याः ॥२७९॥ एष करणगाथाऽक्षरार्थः। सम्प्रति करणभावना क्रियते - तत्र युगे प्रथमदीपोत्सवे केनापि पृष्टं-कः सूर्यर्त्तुरनन्तरमतीतः ? को वा सम्प्रति वर्त्तते ? तत्र युगादितः सप्त पर्वाण्यतिक्रान्तानीति सप्त ध्रियन्ते। तानि पञ्चदशभिर्गुण्यन्ते, जातं पञ्चोत्तरं शतं १०५। एतावति च काले द्वाववमरात्राव-भूतामिति द्वौ ततः पात्येते, स्थितं पश्चात्त्र्युत्तरं शतं १०३। त[तो](त्) द्वाभ्यां गुण्यते, जाते द्वे शते षडुत्तरे २०६। तत्रैकषष्टिः प्रक्षिप्यते, जाते द्वे शते सप्तषष्ट्यधिके २६७। तयोर्द्वाविंशेन शतेन भागो ह्रियते, लब्धौ द्वौ। तौ षड्भिर्भागं न सहेते इति न तयोः षड्भिर्भागहारः, शेषास्त्वंशा उद्धरन्ति त्रयोविंशतिः। तेषामर्द्धे जाता एकादश अर्द्धं च, सूर्यर्तुश्चाषा[1]ढादिस्तत आगतं - द्वावृतू अतिक्रान्तौ तृतीयश्च ऋतुः सम्प्र(ति) वर्त्तते, तस्य च प्रवर्त्तमानस्य एकादश दिवसा अतिक्रान्ता द्वादशो वर्त्तते इति। तथा युगे प्रथमाया(मक्षय)तृतीयायां केनाऽपि पृष्टं के ऋतवः पूर्वमतिक्रान्ताः को वा सम्प्रति वर्त्तते ? तत्र प्रथमाया अक्षयतृतीयायाः प्राग्युग-स्यादित आरभ्य पर्वाण्यतिक्रान्तान्येकोनविंशतिः, (तत एकोनविंशतिः) धृत्वा पञ्चदशभिर्गुण्यते, जाते द्वे शते पञ्चाशीत्यधिके २८५। अक्षयतृतीयायां किल पृष्टमिति पर्वणामुपरि तिस्रस्तिथयः प्रक्षिप्यन्ते, जाते द्वे शतेऽष्टाशीत्यधिके २८८। एतावति च काले अवमरात्राः पञ्च भवन्तीति ततः पञ्च पात्यन्ते, जाते द्वे शते त्र्यशीत्यधिके २८३। ते द्वाभ्यां गुण्येते, जातानि पञ्च शतानि षट्षष्ट्यधिकानि ५६६। तान्येकषष्टिसहितानि क्रियन्ते, जातानि षट्शतानि सप्तविंशत्यधिकानि ६२७। तेषां द्वाविंशेन शतेन भागहरणं, लब्धाः पञ्च, (ते च षड्भिर्भागं न सहन्ते इति न तेषां षड्भिर्भागहारः,) पश्चादुद्धरन्त्यंशाः सप्तदश, तेषामर्ध्दे लब्धाः सार्द्धा अष्टौ। आगतं पञ्च ऋतवोऽतिक्रान्ताः षष्ठस्य च ऋतोः प्रवर्त्तमानस्याष्टौ दिवसा गता नवमो वर्त्तते। तथा युगे द्वितीये दीपोत्सवे केनाऽपि पृष्टं कियन्त ऋतवोऽतिक्रान्ताः को

---

१. ....षाढादिकस्तत - B, I, L।

वा सम्प्रति वर्त्तते ? तत्र एतावति काले पर्वाण्यतिक्रान्तान्येकत्रिंशत्। तत एकत्रिंशत् पञ्चदशभिर्गुण्यते, जातानि चत्वारि शतानि पञ्चषष्ट्यधिकानि ४६५। अवमरात्राश्चैतावति काले व्यत्यक्रामन्नष्टौ। ततोऽष्टौ पात्यन्ते, स्थितानि शेषाणि चत्वारि शतानि सप्तपञ्चाशदधिकानि ४५७। तानि द्विगुणीक्रियन्ते, जातानि नव शतानि चतुर्दशोत्तराणि ९१४। तेषु एकषष्टिभागप्रक्षेपे जातानि पञ्चसप्तत्यधिकानि नव शतानि ९७५। तेषां द्वाविंशेन शतेन भागो ह्रियते, लब्धाः सप्त, उपरिष्टादंशा उद्धरन्ति एकविंशं शतं १२१। तस्य द्वाभ्यां भागो ह्रियते, लब्धा षष्टिः सार्द्धा, सप्तानां च ऋतूनां षड्भिर्भागे हृते लब्ध एक, एक उपरिष्टात्तिष्ठति। आगतमेकः संवत्सरोऽतिक्रान्त एकस्य संवत्सरस्योपरि प्रथम ऋतुः प्रावृट्नामा अतिगतो द्वितीयस्य षष्टिदिनानि व्यतिक्रान्तान्येकषष्टितमं वर्त्तते इति। एवमन्यत्रापि भावना कार्या। अथ एतेषामृतूनां मध्ये क ऋतुः कस्यां तिथौ समाप्तिमुपयातीति परस्य प्रश्नावकाशमाशङ्क्य तत्परिज्ञानाय पूर्वाचार्यैरिदं करणमभाणि - '**इच्छा उऊ बिगुणितो उ रूवुणो बिगुणिओ य पव्वाणि। तस्सद्धं होइ तिही जत्थ समत्ता उऊ तीसं॥२८१॥**' **(जो.प.)** अस्या गाथाया व्याख्या - यस्मिन्नृतौ ज्ञातु**मिच्छा** स **ऋतुः** ध्रियते, तत्सङ्ख्या ध्रियते इत्यर्थः। ततो **द्विगुणितः** क्रियते, द्वाभ्यां गुण्यते इति भावः। गुणितः सन् **रूपोनः** क्रियते। ततः पुनरपि स द्वाभ्यां गुण्यते, गुणयित्वा च प्रतिराश्यते, **द्विगुणितश्च** सन् यावान् भवति तावन्ति **पर्वाणि** द्रष्टव्यानि, **तस्य** च द्विगुणीकृतस्या**र्द्धं** क्रियते, त[था](च्चा)र्द्धं यावद्भवति तावत्यस्तिथयः प्रतिपत्तव्याः **यासु** युगभाविन**स्त्रिंशद**पि **ऋतवः समाप्ताः** समाप्तिमैयरुरितिकरणगाथाक्षरार्थः॥२८१॥ सम्प्रति भावना क्रियते-किल प्रथम ऋतुर्ज्ञातुमिष्टो यथा युगे कस्यां तिथौ प्रथमः प्रावृड्लक्षण ऋतुः समाप्तिमुपयातीति ? तत्र [1]एको ध्रियते। स द्वाभ्यां गुण्यते, जाते द्वे रूपे। ते रूपोने क्रियेते, जात

---

१. एकको - N।

एकक एव। स भूयोऽपि द्वाभ्यां गुण्यते, जाते द्वे रूपे। ते प्रतिराश्येते। तयोरर्द्धे [१]जातमेकं रूपम्। आगतं युगादौ द्वे पर्वणि अतिक्रम्य प्रथमायां तिथौ प्रतिपदि प्रथम ऋतुः प्रावृड्नामा समाप्तिमगमत्। तथा द्वितीये ऋ[तु](तौ) ज्ञातुमिच्छेति द्वौ स्थाप्येते। तयोर्द्वाभ्यां गुणने जाताश्चत्वारस्ते रूपोनाः क्रियन्ते, जातास्त्रयस्ते भूयो द्वाभ्यां गुण्यन्ते, जाताः षट्। ते प्रतिराश्यन्ते, प्रतिराशितं चार्द्धीक्रियते जातास्त्रयः। आगतं युगादितः षट् पर्वाण्यतिक्रम्य तृतीयायां तिथौ द्वितीय ऋतुः समाप्तिमुपागमत्। तथा तृतीये ऋतौ ज्ञातुमिच्छेति त्रयो ध्रियन्ते, द्वाभ्यां गुण्यन्ते, जाताः षट्। ते रूपोनाः क्रियन्ते, जाताः पञ्च। ते भूयो द्वाभ्यां गुण्यन्ते, जाता दश। ते प्रतिराश्यन्ते प्रतिराशितानां चार्द्धे लब्धाः पञ्च। आगतं युगादित आरभ्य दशानां पर्वणामतिक्रमे पञ्चम्यां तिथौ तृतीय ऋतुः समाप्तिमियाय। तथा षष्ठे ऋतौ ज्ञातुमिष्यमाणे षट् स्थाप्यन्ते। ते द्वाभ्यां गुण्यन्ते, जाता द्वादश। ते रूपोनाः क्रियन्ते जाता एकादश। ते द्विगुण्यन्ते, जाता द्वाविंशतिः। सा प्रतिराश्यते, प्रतिराशितायाश्चार्द्धं क्रियते, जाता एकादश। आगतं युगादित आरभ्य द्वाविंशतिपर्वणामतिक्रमे एकादश्यां तिथौ षष्ठ ऋतुः समाप्नोति। तथा युगे नवमे ऋतौ ज्ञातुमिच्छा, ततो नव स्थाप्यन्ते। ते द्वाभ्यां गुण्यन्ते, जाता अष्टादश, ते रूपोनाः क्रियन्ते, जाताः सप्तदश। ते भूयो द्विगुण्यन्ते, जाता चतुस्त्रिंशत्। सा प्रतिराश्यते, प्रतिराश्य च तस्यार्द्धं क्रियते, जाताः सप्तदश। आगतं युगादितश्चतुस्त्रिंशत्पर्वाण्यतिक्रम्य द्वितीये संवत्सरे पौषमासे शुक्लपक्षे द्वितीयस्यां तिथौ नवम ऋतुः परिसमाप्तिं गच्छति। तथा त्रिंशत्तमे ऋतौ जिज्ञासिते त्रिंशत् ध्रियते। सा द्विगुणीक्रियते, जाता षष्टिः। सा रूपोना क्रियते, जाता एकोनषष्टिः। सा भूयो द्वाभ्यां गुण्यते, जातमष्टादशोत्तरं शतं ११८। तत् प्रतिराश्यते प्रतिराश्य च तस्यार्द्धं क्रियते, जाता एकोनषष्टिः। आगतं युगादितोऽष्टादशोत्तरं शतं पर्वणामतिक्रम्य एकोनषष्टितमायां तिथौ, किमुक्तं भवति ? पञ्चमे संवत्सरे प्रथमे आषाढमासे शुक्लपक्षे चतुर्दश्यां त्रिंशत्तम ऋतुः [२]समाप्तिमु[प](पा)यासीत्, व्यवहारतः

१. जातं रूपमेकमागतं - N। २. समाप्तिमुपयातीति - T।

प्रथमाषाढपर्यन्ते इत्यर्थः। एतस्यैवार्थस्य सुखप्रतिपत्त्यर्थमियं पूर्वाचार्योपदर्शिता गाथा **'एकंतरिया मासा (तिही य) जासु ता उऊ स[मु](म)प्पंति। आसाढाई मासा भद्दवयाई तिहि सव्वा॥२८५॥' (जो.प.)** अस्या व्याख्या - इह सूर्यर्त्तु-चिन्तायां **मासा आषाढादयो** द्रष्टव्याः, आषाढमासादारभ्य ऋतूनां प्रथमतः प्रवर्त्तमानत्वात्, **तिथयः सर्वा** अपि **भाद्रपदाद्याः**, भाद्रपदादिषु मासेषु प्रथमादी-नामृतूनां परिसमा[प्ति](प्त)त्वात्। तत्र येषु मासेषु यासु तिथिषु ऋतवः प्रावृडादयः सूर्यसत्काः परिसमाप्नुवन्ति (ते) आषाढादयो मासास्ताश्च तिथयो भाद्रपदाद्याः-भाद्रपदादिमासानुगताः सर्वा अप्येकान्तरिता वेदितव्याः, तथाहि - प्रथम ऋतुः भाद्रपदे मासे समाप्तिमुपयाति तत एकं मासम[स्य](श्व)यु[ग](ग्)लक्षणमपान्तराले मुक्त्वा कार्त्तिके मासे द्वितीयः ऋतुः समाप्तिमियर्त्ति, एवं तृतीयः पौषमासे, चतुर्थः फाल्गुने, पञ्चमो वैशाखे, षष्ठ आषाढे, एवं शेषा अपि ऋतव एष्वेव षट्सु मासेष्वेकान्तरितेषु व्यवहारतः परिसमाप्तिमाप्नुवन्ति, [१]न शेषेषु मासेषु। तथा प्रथम ऋतुः प्रतिपदि समाप्तिमेति, द्वितीयः तृतीयस्यां, तृतीयः पञ्चम्यां, चतुर्थः सप्तम्यां, पञ्चमो नवम्यां, षष्ठ एकादश्यां, सप्तमस्त्रयोदश्यां, अष्टमः पञ्चदश्याम्। एते[ऽपि] सर्वेऽपि ऋतवो बहुलपक्षे, ततो नवम ऋतुः शुक्लपक्षे द्वितीयायां, दशमश्चतुर्थ्यां, एकादशः षष्ठ्यां, द्वादशोऽष्टम्यां, त्रयोदशो दशम्यां, चतुर्दशो द्वादश्यां, पञ्चदश-श्चतुर्दश्याम्। एते ऋतवः शुक्लपक्षे। एते कृष्णशुक्लपक्षभाविनः पञ्चदशाऽपि ऋतवो युगस्यार्द्धे भवन्ति। तत उक्तक्रमेण शेषा अपि पञ्चदश ऋतवो द्विती[य](ये) युगस्या[र्द्ध](र्द्धे) भवन्ति, त(द्य)था षोडश ऋतुर्बहुलपक्षे प्रतिपदि, सप्तदशस्तृतीया-यामष्टादशः पञ्चम्यां, एकोनविंशतितमः सप्तम्यां, विंशतितमो नवम्यामेकविंशतितम एकादश्यां, द्वाविंशतितमस्त्रयोदश्यां, त्रयोविंशतितमः पञ्चदश्याम्। एते षोडशा-दयस्त्रयोविंशतिपर्यन्ता अष्टौ बहुलपक्षे। ततः शुक्लपक्षे चतुर्विंशतितमः द्वितीयायां,

१. न शेषेषु। तथा - M।

पञ्चविंशतितमः चतुर्थ्यां, षड्विंशतितमः षष्ठयां, सप्तविंशतितमोऽष्टम्यामष्टाविंशतितमो दशम्यामेकोनत्रिंशत्तमो द्वादश्यां, त्रिंशत्तमश्चतुर्दश्याम्। तदेवमेते सर्वेऽपि ऋतवो यु[ग](गे) मा[सकाले](सेष्वे)कान्तरितेषु तिथिष्वपि चैकान्तरितासु भवन्ति। एतेषां च ऋतुनां चन्द्रनक्षत्रयोगपरिज्ञानार्थं सूर्यनक्षत्रयोगपरिज्ञानार्थश्च पूर्वाचार्यैः करणमुक्तम्। तदपि विनेयजनानुग्रहायोपदर्श्यते - **'तिन्नि सया पंचहिगा अंसा छेयो सयं च चोत्तीसं। एगाइबिउत्तरगुणो धुवरासी होइ नायव्वो॥२८६॥ सत्तट्ठी अद्धखेत्ते दुगतिगगुणिया समे दिवड्ढखेत्ते। अट्ठासीइ[उस्से](पुस्सो) सो[उ](ज्झो) अभिइम्मि बायाला॥२८७॥ एयाणि सोहइत्ता जं सेसं तं तु होइ नक्खत्तं। रविसोमाणं नियमा तीसाए उऊसमत्तीसु॥२८८॥' (जो.प.)** आसां व्याख्या - **त्रीणि शतानि** पञ्चोत्तराणि **अंशाः**-विभागाः किंरूपच्छेदकृता इति चेत् ? अत आह - छेद**श्चतुस्त्रिंशं शतं,** किमुक्तं भवति ? चतुस्त्रिंशदधिक(शत)च्छेदेन छिन्नं यदहोरात्रं तस्य सत्कानि त्रीणि शतानि पञ्चोत्तराणि अंशानामिति। अयं ध्रुवराशिर्बोद्धव्यः। एष **ध्रुवराशिः एकादिद्व्युत्तरगुण** (इति) ईप्सितेन ऋतुना एकादिना त्रिंशत्पर्यन्[तानि](ते)न [हि](द्वि)उत्तरेण एकस्मादारभ्य तत ऊर्द्ध्वं द्व्युत्तरवृद्धेन गुण्य[न्]ते [तस्मि](स्मे)ति गुणो - गुणि[ताः](तः) क्रियते। तत एतस्मात् शोधनकानि शोधयितव्यानि॥२८६॥ तत्र शोधनकप्रतिपादनार्थं द्वितीयगाथा **'सत्तट्ठी'** इत्यादि। इह यन्नक्षत्रमर्द्धक्षेत्रं तत् सप्तषष्ट्या शोध्यते, यच्च नक्षत्रं समक्षेत्रं तत् द्विगुणया सप्तषष्ट्या चतुस्त्रिंशेन शतेनेत्यर्थः शोध्यते, यत्पुनर्नक्षत्रं द्व्यर्द्धक्षेत्रं तत् त्रिगुणया सप्तषष्ट्या एकोत्तराभ्यां द्वाभ्यां शताभ्यां शोध्य(ते) इत्यर्थः। इह सूर्यस्य पुष्यादीनि नक्षत्राणि शोध्यानि चन्द्रस्याभिजिदादीनि। तत्र सूर्यनक्षत्रयोगचिन्तायां **पुष्ये**-पुष्यविषया **अष्टाशीतिः शोध्या** चन्द्रनक्षत्रयोगचिन्तायाम**भिजिति द्वाचत्वारिंश-[ति]त्**॥२८७॥ **'एयाणी'**त्यादि। **एतानि** अर्द्धक्षेत्र-समक्षेत्र-द्व्यर्द्धक्षेत्रविषयाणि शोधनकानि **शोधयित्वा, यदुक्त**प्रकारेण नक्षत्रशेषं भवति- न सर्वात्मना शुद्धिमश्नुते

**तत् नक्षत्रं रविसोमयोः** - सूर्यस्य चन्द्रमसश्च **नियमात्** ज्ञातव्यम्, क्व इत्याह **त्रिंशत्यपि ऋतुसमाप्तिषु**॥२८८॥ एष करणगाथात्रयाक्षरार्थः। सम्प्रति करणभावना क्रियते। तत्र प्रथम ऋतुः कस्मिंश्चन्द्रनक्षत्रे समाप्तिमुपै(ती)ति जिज्ञासायामनन्तरोदितः पञ्चोत्तर[त्रिं](त्रि)शतीप्रमाणो ध्रुवराशिर्ध्रियते। स एकेन गुण्यते। एकेन गुणितं तदेव भवतीति तावा[न् च](नेव) ध्रुवराशिर्जातस्तत्राभिजितो द्वाचत्वारिंशत् शुद्धा, स्थिते पश्चात् द्वे शते त्रिषष्टयधिके २६३, ततश्चतुस्त्रिशेन (शतेन) श्रवणः शुद्धः, शेषं जातमेकोनत्रिंशं शतं १२९, तेन च धनिष्ठा न शुध्यति। तत आगतमेकोनत्रिंशं शतं चतुस्त्रिशदधिकशतभागानां धनिष्ठासत्कमवगाह्य चन्द्रः प्रथमं सूर्यर्तुं परिसमापयति। यदि द्वितीयसूर्यर्तुजिज्ञासा तदा स ध्रुवराशिः पञ्चोत्तरशतत्रयप्रमाणस्त्रिभिर्गुण्यते, जातानि नव शतानि पञ्चदशोत्तराणि ९१५। तत्राभिजितो द्वाचत्वारिंशत् शुद्धा, स्थितानि शेषाण्यष्टौ शतानि त्रिसप्तत्यधिकानि ८७३। ततश्चतुस्त्रिशेन शतेन श्रवणशुद्धिः, स्थितानि शेषाणि सप्त शतानि एकोनचत्वारिंशदधिकानि ७३९। ततोऽपि चतुस्त्रिशेन शतेन धनिष्ठा शुद्धा, स्थितानि षट्शताणि पञ्चोत्तराणि ६०५। ततोऽपि सप्तषष्ट्या शतभिषक् शुद्धा, स्थितानि पञ्च शतान्यष्टात्रिंशदधिकानि[1] ५३८। तेभ्योऽपि चतुस्त्रिशेन शतेन पूर्वभद्रपदा शुद्धा, स्थितानि चत्वारि शतानि चतुरधिकानि ४०४। तेभ्यो द्वाभ्यां शताभ्यां एकोत्तराभ्यां उत्तरभद्रपदा शुद्धा, स्थिते शेषे त्र्युत्तरे द्वे शते २०३। ताभ्यामपि चतुस्त्रिशदधिकेन शतेन रेवती शुद्धा, स्थिता पश्चादेकोनसप्ततिः ६९। आगतमश्विनीनक्षत्रस्य एकोनसप्ततिं चतुस्त्रिशदधिकशतभागानामवगाह्य द्वितीयं सूर्यर्तुं चन्द्रः परिसमापयति। एवं शेषेष्वपि ऋतुषु भावनीयम्। त्रिंशत्तमसूर्यर्तुजिज्ञासायां स एव ध्रुवराशिः पञ्चोत्तरशतत्रयप्रमाण एकोनषष्ट्या गुण्यते, जातानि सप्तदश सहस्राणि नव शतानि पञ्चनवत्यधिकानि १७,९९५। तत्र षट्त्रिंशता शतैः षष्ट्यधिकैरेको नक्षत्रपर्यायः शुध्यति। ततः षट्त्रिंशच्छतानि षष्ट्यधिकानि

---

१. ....न्यष्टत्रिंशद.... - C।

चतुर्भिर्गुणयित्वा ततः शोध्यन्ते, स्थितानि पश्चात् त्रयस्त्रिशत् शतानि पञ्चपञ्चाशदधिकानि ३,३५५। तेभ्यो द्वा[विं](त्रिं)श(ता) शतैः पञ्चविंशत्यधिकैरभिजिदादीनि मूलपर्यन्तानि शुद्धानि, स्थितं पश्चात् त्रिंशदधिकं शतं १३०, तेन च पूर्वाषाढा न शुध्यति। तत आगतं त्रिंशदधिकं शतं चतुस्त्रिंशदधिकशतभागानां पूर्वाषाढासत्कमवगाह्य चन्द्रस्त्रिंशत्तमं सूर्यर्तुं परिसमापयति। सम्प्रति सूर्यनक्षत्रयोगभावना क्रियते। स एव पञ्चोत्तरशतत्रयसङ्ख्यो ध्रुवराशिः प्रथमसूर्यर्तुजिज्ञासायामेकेन गुण्यते। [१]ऐकेन च गुणितं तदेव भवतीति जातस्तावानेव। ततः पुष्यसत्का अष्टाशीतिः शुद्धा, स्थिते शेषे द्वे शते सप्तदशोत्तरे २१७। ततः सप्तषष्ट्या अश्लेषा शुद्धा, स्थि[ता](तं) शेषं सार्द्धं शतम्। ततोऽपि चतुस्त्रिंशेन शतेन मघा शुद्धा, स्थिताः पश्चात्षोडश। आगतं पूर्वफाल्गुनीनक्षत्रस्य षोडश चतुस्त्रिंशदधिकशतभागानामवगाह्य सूर्यः प्रथमं स्वमृतुं परिसमापयति। तथा द्वितीयसूर्यर्तुजिज्ञासायां स एव ध्रुवराशिः पञ्चोत्तरशतत्रयप्रमाणस्त्रिभिर्गुण्यते, जातानि नव शतानि पञ्चदशोत्तराणि ९१५। ततोऽष्टाशीत्या पुष्यः शुद्धः, स्थितानि पश्चादष्टौ शतानि सप्तविंशत्यधिकानि ८२७। तेभ्यः सप्तषष्ट्या अश्लेषा शुद्धा, स्थितानि शेषाणि ७६०। तेभ्यश्चतुस्त्रिंशदधिकेन शतेन मघा शुद्धा, स्थितानि शेषाणि षट्शतानि षड्विंशत्यधिकानि ६२६। तेभ्यश्चतुस्त्रिंशदधिकेन शतेन पूर्वफाल्गुनी शुद्धा, स्थितानि पश्चात् चत्वारि शतानि द्विनवत्यधिकानि ४९२। ततोऽपि द्वाभ्यां शताभ्यामेकोत्तराभ्यामुत्तरफाल्गुनी शुद्धा, स्थिते द्वे शते एकनवत्यधिके २९१। ततोऽपि चतुस्त्रिंशेन शतेन हस्तः शुद्धः, स्थितं पश्चात् सप्तपञ्चाशदधिकं शतं १५७। ततोऽपि चतुस्त्रिंश[२]दधिकशतेन चित्रा शुद्धा, स्थिता शेषा त्रयोविंशतिः २३। आगतं स्वातेस्त्रयोविंशतिं [सप्तषष्टि][३]-(चतुस्त्रिंशदधिकशत)भागानवगाह्य सूर्यो द्वितीयं स्वमृतुं परिसमापयति। एवं शेषेष्वपि

१. एकेन गुणितं - E। २. ...दधिकेन शतेन-T। ३. 'सप्तषष्टिभागान्' इति मुद्रितसूर्यप्रज्ञप्तिवृत्तौ पाठः, स न समीचीनो भाति।

ऋतुषु भावनीयम्। त्रिंशत्तमसूर्यर्त्तुजिज्ञासायां स एव ध्रुवराशिः पञ्चोत्तरशतत्रयप्रमाण एकोनषष्ट्या गुण्यते, जातानि सप्तदश सहस्राणि नव शतानि पञ्चनवत्यधिकानि १७,९९५। तत्र चतुर्दशभिः सहस्रैः षड्भिः शतैः चत्वारिंशदधिकैः १४,६४० चत्वारः [१]परिपूर्णनक्षत्रपर्यायाः शुद्धाः, स्थितानि शेषाणि त्रयस्त्रिंशच्छतानि पञ्चपञ्चाशदधिकानि ३,३५५। तेभ्यो अष्टाशीत्या पुष्यः शुद्धः, स्थितानि पश्चात् द्वात्रिंशत् शतानि सप्तषष्ट्यधिकानि ३,२६७। तेभ्यो द्वात्रिंशता शतैरष्टापञ्चाशदधिकैः ३,२५८ अश्लेषादीनि मृगशिरःपर्यन्तानि शुद्धानि, स्थिताः [श्ले](शे)षा नव। तेन चार्द्रा न शुध्यति। तत आगतं नव [सप्तषष्टि] (चतुस्त्रिंशदधिकशत)भागानार्द्रासत्कानवगाह्य सूर्यस्त्रिंशत्तमं स्वमृतुं परिसमापयति। तदेवमुक्ताः सूर्यर्त्तवः। सम्प्रति चन्द्रर्त्तवो अभिधीयन्ते। तत्र युगे चन्द्रर्त्तूनां चत्वारि शतानि द्व्युत्तराणि ४०२, तथाहि-एकस्मिन्नक्षत्रपर्याये चन्द्रस्य षड् ऋतवो भवन्ति, यथा सूर्यस्य, चन्द्रस्य च नक्षत्रपर्याया युगे भवन्ति सप्तषष्टिसङ्ख्यास्ततः सप्तषष्टिः षड्भिर्गुण्यते, जातानि चत्वारि शतानि द्व्युत्तराणि ४०२, एतावन्तो युगे चन्द्रस्य ऋतवः, उक्तश्च **'चत्तारि उऊसयाइं बिउत्तराइं जुगंमि चं[द्रस्य](दस्स)।'(जो.प.२८९)** एकैकस्य चन्द्रर्त्तोः परिमाणं परिपूर्णाश्चत्वारोऽहोरात्राः पञ्चमस्य चाहोरात्रस्य सप्तत्रिंशत् सप्तषष्टिभागाः, तथा चोक्तं **'चंदस्स उऊपरिमाणं चत्तारि य केवला अहोरत्ता। सत्ततीसं अंसा सत्तट्ठिकएण छेएणं॥२९०॥' (जो.प.)** कथमेतदवसीयते इति चेत् ? उच्यते, इह एकस्मिन् नक्षत्रपर्याये षड् ऋतव इति प्रागेवानन्तरमुक्तम्। नक्षत्रपर्यायस्य चन्द्रविषयस्य परिमाणं सप्तविंशतिरहोरात्रा एकस्य चाहोरात्रस्य एकविंशतिः सप्तषष्टिभागाः। तत्राहोरात्राणां षड्भिर्भागो ह्रियते, लब्धाश्चत्वारोऽहोरात्राः, शेषास्तिष्ठन्ति त्रयस्ते सप्तषष्टिभागकरणार्थं सप्तषष्ट्या गुण्यन्ते, जाते द्वे शते एकोत्तरे २०१। तत उपरितना एकविंशतिः सप्तषष्टिभागाः प्रक्षिप्यन्ते, जाते द्वे शते

---

१. परिपूर्णा नक्षत्रपर्यायाः शुद्धाः-K।

द्वाविंशत्यधिके २२२। तेषां षड्भिर्भागे हृते लब्धाः सप्तत्रिंशत् ३७ सप्तषष्टिभागा इति। एतेषाञ्च चन्द्रर्त्तूनामानयनाय पूर्वाचार्यैरिदं करणमुक्तं '**चंदउऊआणयणे पव्वं पन्नरससंगु[णि](णं) नियमा। तिहिसंखित्तं संतं बावट्ठीभागपरिहीणं॥२९१॥ चोत्तीससया[सहि](भिह)यं पंचुत्तरतिसयसंजुयं। विभ[रे](ए) छहि उ दसुत्तरेहिं सएहिं लद्धा उऊ होइ॥२९२॥' (जो.प.)** अनयोर्व्याख्या - विवक्षितस्य **चन्द्रर्त्तोरानयने** कर्त्तव्ये युगादितो यत् **पर्व**-पर्वसङ्ख्यानमतिक्रान्तं तत् **पञ्चदशगुणं नियमात्**कर्त्तव्यम्। तत**स्तिथिसङ्क्षिप्त**मिति-यास्तिथयः पर्वणामुपरि विवक्षिता[न्](त्) दिना[न्](त्) प्रागतिक्रान्तास्तास्तत्र सङ्क्षिप्यन्ते। ततो **द्वाषष्टिभागै**र्द्वाषष्टिभाग-निष्पन्नैरवमरात्रैः **परिहीनं** विधेयम्॥२९१॥ तत एवम्भूतं (सत्) **चतुस्त्रिंशेन शतेनाभि[हि](ह)तं** - गुणितं कर्त्तव्यम्। तदनन्तरं च **पञ्चोत्तरैस्त्रिभिः शतैः संयुक्तं** सत् **षड्भिर्दशोत्तरैः शतैर्विभजेत्**, विभक्ते च सति ये **लब्धा** अङ्कास्ते **ऋतवो भवन्ति** ज्ञातव्याः॥२९२॥ एष करणगाथाद्वयाक्षरार्थः। सम्प्रति करणभावना क्रियते-कोऽपि पृच्छति युगादितः प्रथमे पर्वणि पञ्चम्यां कश्चन्द्रर्त्तुर्वर्त्तते इति ? तत्रैकमपि पर्व परिपूर्णमत्र नाद्याप्यभूदिति युगादि[गता](तो) दिवसा रूपोना ध्रियन्ते, (ते) च चत्वारस्तत(स्ते) चतुस्त्रिंशदधिकेन शतेन गुण्यन्ते, जातानि पञ्च शतानि षट्त्रिंशदधिकानि ५३६। तत्र भूयस्त्रीणि शतानि पञ्चोत्तराणि ३०५ प्रक्षिप्यन्ते, जातान्यष्टौ शतानि एकचत्वारिंशदधिकानि ८४१। तेषां षड्भिः शतैर्दशोत्तरैर्भागो ह्रियते, लब्धः प्रथमऋतुः [अस्या](अंशा) उद्धरतो द्वे शते एकत्रिंशदधिके २३१। तेषां चतुस्त्रिंशेन शतेन भागहरणे लब्ध एककः, अंशानाञ्च चतुस्त्रिंशेन शतेन भागे हृते यल्लभ्यते ते दिवसा ज्ञातव्याः, शेषास्त्वंशा उद्धरन्ति सप्तनवतिः ९७। तेषां [1]द्विकेनापवर्त्तनायां लब्धाः सार्द्धा अष्टाचत्वारिंशत् सप्तषष्टिभागाः। आगतं युगादितः पञ्चम्यां प्रथमः प्रावृट्लक्षणऋतुरतिक्रान्तो द्वितीयस्य च (ऋतोः) एको दिवसो

१. द्विकेनापवर्त्तना - T।

गतो द्वितीयस्य च सार्द्धा अष्टाचत्वारिंशत् सप्तषष्टिभागाः। तथा कोऽपि पृच्छति युगादितो द्वितीये पर्वणि एकादश्यां कश्चन्द्रर्त्तुरिति ? तत्रैकं पर्वातिक्रा[न्तो](तम्) इत्येको ध्रियते, स पञ्चदशभिर्गुण्यते, जाताः पञ्चदश, एकादश्यां किल पृष्टमिति तस्याः पश्चात् ये दिवसा दश ते प्रक्षिप्यन्ते, जाताः पञ्चविंशतिः २५। सा चतुस्त्रिंशेन शतेन गुण्यते, जातानि [षट्](त्रयस)त्रिंशत् शतानि [पञ्च] पञ्चाशदधिकानि ३,३५०। तेषु त्रीणि शतानि पञ्चोत्तराणि प्रक्षिप्यन्ते, जातानि षट्त्रिंशच्छतानि पञ्चपञ्चाशदधिकानि ३,६५५। तेषां षड्भिः शतैर्दशोत्तरैर्भागो ह्रियते, लब्धाः पञ्च, अंशा अवतिष्ठन्ते षट्शतानि पञ्चोत्तराणि ६०५। तेषां चतुस्त्रिंशेन शतेन भागे हृते लब्धाः चत्वारो दिवसा ४, शेषास्त्वंशा उद्धरन्ति एकोनसप्ततिः ६९। तस्य द्विकेनाऽपवर्त्तनायां लब्धाः सार्द्धाश्चतुस्त्रिंशत् सप्तषष्टिभागाः। आगतं पञ्च ऋतवोऽतिक्रान्ताः षष्ठस्य ऋतोश्चत्वारो दिवसाः पञ्चमस्य च दिवसस्य सार्द्धाश्चतुस्त्रिंशत् सप्तषष्टिभागाः। एवमन्यस्मिन्नपि दिवसे चन्द्रर्त्तुरवगन्तव्यः। सम्प्रति चन्द्रर्त्तुपरिसमाप्तिदिवसानयनाय पूर्वाचार्यैः करणमुक्तं तदभिधीयते- **'रविधुवरासी पुव्वं व गुणिय भयए [भा](स)गेण च्छेएण। जं लद्धं सो दिवसो सोमस्स उउसम्मत्ती ॥२९४॥'** **(जो.प.)** अस्या व्याख्या - इह पूर्वं सूर्यर्त्तुप्रतिपादने ध्रुवराशिरभिहितः पञ्चोत्तराणि त्रीणि शतानि चतुस्त्रिंशदधिकशतभागानां तस्मिन्**पूर्वमिव गुणिते**, किमुक्तं भवति ? ईप्सितेन [नर](ए)कादिना द्व्युत्तरचतुःशततमपर्यन्तेन द्व्युत्तरवृद्धेन-एकस्मादारभ्य तत ऊर्द्ध्वं द्व्युत्तरवृद्ध्या प्रव[र्त](र्द्ध)मानेन गुणिते **स्वकीयेना**त्मीयेन **च्छेदेन** चतुस्त्रिंशदधिकशतरूपेण **भक्ते** सति **यल्लब्धं स (दिवसः) सोमस्य** चन्द्रस्य **ऋतोः समाप्तौ** वेदितव्यः ॥२९४॥ यथा केनाऽपि पृष्टं चन्द्रस्य ऋतुः प्रथमः कस्यां तिथौ परिसमाप्तिं गत इति ? तत्र ध्रुवराशिः पञ्चोत्तरशतत्रयप्रमाणो ध्रियते ३०५। स एकेन गुण्यते, जातस्तावानेव ध्रुवराशिः। तस्य स्वीयेन चतुस्त्रिंशदधिकशतप्रमाणेन च्छेदेन भागो ह्रियते, लब्धौ द्वौ शेषास्तिष्ठन्ति सप्तत्रिंशत्। तस्य द्विकेनापवर्त्तना, जाताः

सार्द्धाऽष्टादश सप्तषष्टिभागाः। आगतं युगादितो द्वौ दिवसौ (अतिक्रान्तौ) तृतीयदिवसस्य सार्द्धान् अष्टादश सप्तषष्टिभागानतिक्रम्य प्रथमश्चन्द्रर्त्तुः परिसमाप्ति-मुपयाति। द्वितीयचन्द्रर्त्तुजिज्ञासायां [1]स एव ध्रुवराशिः पञ्चोत्तरशतत्रयप्रमाण-स्त्रिभिर्गुण्यते, जातानि नव शतानि पञ्चदशोत्तराणि ९१५। तेषां चतुस्त्रिंशदधिकेन शतेन भागो ह्रियते, लब्धाः षट्, शेषमुद्धरति एकादशोत्तरं शतं १११। तस्य द्विकेनाऽपवर्त्तनायां लब्धाः सार्द्धाः पञ्चपञ्चाशत् ५५ सप्तषष्टिभागाः। आगतं युगादितः षट्सु दिवसेष्वतिक्रान्तेषु सप्तमस्य च दिवसस्य सार्द्धेषु पञ्चपञ्चाशत्सङ्ख्येषु भागेषु गतेषु द्वितीयश्चन्द्रर्त्तुः परिसमाप्तिं गच्छति। द्व्युत्तरचतुःशततमचन्द्रर्त्तुजिज्ञासायां स एव ध्रुवराशिः पञ्चोत्तरशतत्रयप्रमाणोऽष्टभिः शतै[र्द्व्यु](स्त्र्यु)त्तरैर्गुण्यते, द्व्युत्तरवृद्ध्या हि द्व्युत्तरचतुःशततमस्य त्र्युत्तराष्टशतप्रमाण एव राशिर्भवति, तथाहि - यस्य एकस्मादूर्द्ध्वं द्व्युत्तरवृद्ध्या राशिश्चिन्त्यते तस्य द्विगुणो रुपो[न](नो) भवति, यथा द्विकस्य त्रीणि, त्रिकस्य पञ्च, चतुष्कस्य सप्त, अत्रापि द्व्युत्तरचतुःशतप्रमाणस्य राशेः द्व्युत्तरवृद्ध्या राशिश्चिन्त्यते। ततोऽष्टौ शतानि त्र्युत्तराणि भवन्ति। एवम्भूतेन राशिना गुणने जाते द्वे लक्षे चतुश्चत्वारिंशत्सहस्राणि नवशतानि पञ्चदशोत्तराणि २,४४,९१५। तेषां चतुस्त्रिंशेन शतेन भागो ह्रियते, लब्धान्यष्टादशशतानि सप्तविंशत्यधिकानि १,८२७ अंशाश्चोद्धरन्ति सप्तनवतिः, तस्या द्विकेनापवर्त्तना, लब्धाः सार्द्धा अ[ष्टौ](ष्टा)चत्वारिंशत् सप्तषष्टिभागाः । आगतं युगादितोऽष्टादशसु दिवसशतेषु सप्तविंशत्यधिकेष्वतिक्रान्तेषु ततः परस्य दिवसस्य सार्द्धेष्वष्टाचत्वारिं-शत्सङ्ख्येषु सप्तषष्टिभागेषु गतेषु द्व्युत्तरचतुःशततमस्य चन्द्रर्त्तोः परिसमाप्तिरिति। एतेषु चन्द्रर्त्तुषु चन्द्रनक्षत्रयोगपरिज्ञानार्थमेष पूर्वाचार्योपदेशः - **"सो चेव धुवरासी गुणरासी वि य हवंति ते चेव। नक्खत्तसोहणाणि च परिजाणसु पुव्वभणिआणि॥२९५॥"** **(जो.प.)** अस्या गाथाया व्याख्या - चन्द्रर्त्तूनां

१. स ध्रुवराशिः - M।

चन्द्रनक्षत्रयोगार्थं **स एव** पञ्चोत्तरशतत्रयप्रमाणो **ध्रुवराशिर्वे**दितव्यः **गुणकार-राशयोऽपि** एकादिका द्व्युत्तरवृद्धास्**त एव भवन्ति** ज्ञातव्या ये पूर्वमुपदिष्टाः, **नक्षत्रशोधनान्य**पि च **परिजानीहि** तान्येव यानि **पूर्वभणितानि** द्वाचत्वारिंशत्प्रभृतीनि ॥२९५॥ ततः पूर्वप्रकारेण विवक्षिते चन्द्रर्त्तौ नियतो नक्षत्रयोग आगच्छति। तत्र प्रथमे चन्द्रर्त्तौ कश्चन्द्रनक्षत्रयोग इति जिज्ञासायां स एव पञ्चोत्तरशतत्रयप्रमाणो (ध्रुवराशिः) ध्रियते ३०५। स एकेन गुण्यते। एकेन गुणितः सन् तावानेव भवति। ततो अभिजितो द्वाचत्वारिंशत् शुद्धाः शेषे तिष्ठतो द्वे शते त्रिषष्ट्यधिके २६३। ततश्चतुस्त्रिंशेन शतेन श्रवणः शुद्धः, स्थितं पश्चादेकोनत्रिंशं शतं १२९। तस्य द्विकेनापवर्त्तना, जाताः सार्द्धाश्चतुःषष्टिः सप्तषष्टिभागाः। आगतं धनिष्ठायाः सार्द्धां चतुःषष्टिं सप्तषष्टिभागानवगाह्य चन्द्रः प्रथमं स्वमृतुं परिसमापयति। द्वितीयचन्द्रर्त्तुजिज्ञासायां स एव धुवराशिः पञ्चोत्तरशतत्रयप्रमाणस्त्रिभिर्गुण्यते,जातानि नव शतानि पञ्चदशोत्तराणि ९१५। तत्राभिजितो द्वाचत्वारिंशत् शुद्धाः, स्थितानि शेषाणि अष्टौ शतानि त्रिसप्तत्यधिकानि ८७३। ततश्चतुस्त्रिंशदधिकेन शतेन श्रवणः शुद्धिमुपागतः, स्थितानि शेषाणि सप्त शतानि एकोनचत्वारिंशदधिकानि ७३९। ततोऽपि चतुस्त्रिंशेन शतेन धनिष्ठा शुद्धा, जातानि षट् शतानि पञ्चोत्तराणि ६०५। ततोऽपि सप्तषष्ट्या शतभिषक् शुद्धः, स्थितानि पश्चात्पञ्चशतान्यष्टात्रिंशदधिकानि ५३८। एतेभ्योऽपि चतुस्त्रिंशेन शतेन पूर्वभद्रपदा शुद्धा, स्थितानि चत्वारि शतानि चतुरधिकानि ४०४। [1]तेभ्योऽपि द्वाभ्यां शताभ्यामेकोत्तराभ्यामुत्तरभद्रपदा शुद्धा, स्थिते शेषे द्वे शते त्र्युत्तरे २०३। ताभ्यामपि चतुस्त्रिंशेन शतेन रेवती शुद्धा, स्थिता पश्चादेकोनसप्ततिः ६९। आगतमश्विनीनक्षत्रस्य एकोनसप्ततिं चतुस्त्रिंशदधि-कशतभागानामवगाह्य द्वितीयं स्वमृतुं चन्द्रः परिसमापयति। तथा द्व्युत्तरचतुः-शततमचन्द्रर्त्तुजिज्ञासायां स एव धुवराशिः पञ्चोत्तरशतत्रयप्रमाणो ध्रियते, धृत्वा

---

१. तेभ्यो द्वाभ्यां - N।

चाष्टभिः शतैः त्र्युत्तरैर्गुण्यते, जाते द्वे लक्षे (चतुश्)चत्वारिंशत्सहस्राणि नवशतानि पञ्चदशोत्तराणि २,४४,९१५। तत्र सकलनक्षत्रपर्यायपरिमाणं षट्त्रिंशत्शतानि षष्ट्यधिकानि ३,६६०, तथाहि- षट्सु अर्द्धक्षेत्रेषु नक्षत्रेषु प्रत्येकं सप्तषष्टिरंशाः, (षट्सु) द्व्यर्द्धक्षेत्रेषु प्रत्येकं द्वे द्वे शते एकोत्तरे अंशानाम्, पञ्चदशसु समक्षेत्रेषु प्रत्येकं चतुस्त्रिंशं श[तानि](तमि)ति, षट् सप्तषष्ट्या गुण्यन्ते, जातानि चत्वारि शतानि द्व्युत्तराणि ४०२, तथा षट् एकोत्तरेण शतद्वयेन गुण्यन्ते, जातानि द्वादश शतानि षडुत्तराणि १,२०६, तथा चतुस्त्रिंशं शतं पञ्चदशभिर्गुण्यते, जातानि विंशतिशतानि दशोत्तराणि २,०१०, एते च त्रयोऽपि राशय एकत्र मील्यन्ते मीलयित्वा च तेष्वभिजितो द्वाचत्वारिंशत् प्रक्षिप्यन्ते, जातानि षट्त्रिंशच्छतानि षष्ट्यधिकानि ३,६६०। एतावता एकनक्षत्रपर्यायपरिमाणेन पूर्वराशेः २,४४,९१५ भागो ह्रियते, लब्धाः षट्षष्टिनक्षत्रपर्यायाः, पश्चादवतिष्ठन्ते पञ्चपञ्चाशदधिकानि त्रयस्त्रिंशच्छतानि ३,३५५। तत्राभिजितो द्वाचत्वारिंशच्छुद्धाः, स्थितानि शेषाणि त्रयस्त्रिंशच्छतानि त्रयोदशाधिकानि ३,३१३। एतेभ्यस्त्रिभिः सहस्रैः द्व्यशीत्यधिकैरनु-राधान्तानि नक्षत्राणि शुद्धानि, शेषे तिष्ठतो द्वे शते एकत्रिंशदधिके २३१। ततः सप्तषष्ट्या ज्येष्ठा शुद्धा, स्थि[ता](तं) चतुःषष्ट्याधिकं शतं १६४। ततोऽपि चतुस्त्रिंशेन शतेन मूलनक्षत्रं शुद्धं, स्थिता पश्चात् (त्रिंशत्) ३०। आगतं पूर्वाषाढानक्षत्रस्य त्रिंशतं चतुस्त्रिंशदधिकशतभागानामवगाह्य चन्द्रो द्व्युत्तरचतुःशततमं स्वमृतुं परिनिष्ठापयति। तदेवमुक्तं सूर्यर्त्तुपरिमाणं [च काले] चन्द्रर्त्तुपरिमाणं च। सम्प्रति लोकरूढ्या यावदेकैकस्मिन्चन्द्रर्त्तौ परिमाणं तावदाह- '**ता सव्वेवि ण**'मित्यादि। '**ता**' इति पूर्ववत्, **सर्वेप्येते** षट्सङ्ख्या ऋतवः प्रावृडादयः प्रत्येकं **चन्द्रर्त्तवः** सन्[तौ](तो) **द्वौ द्वौ मासौ** वेदितव्यौ। तौ च किम्प्रमाणावित्याह- '**तिचउप्पण्णेण**'मित्यादि। त्रीणि (शतानि) चतुःपञ्चाशदधिकानि रात्रिन्दिवानां द्वादश च द्वाषष्टिभागा रात्रिन्दिवस्येति शेषः, इत्येवंरूपेण **आदानेन** इत्येवंरूपं

संवत्सरप्रमाणमादायेत्यर्थः **गण्यमानौ** द्वौ द्वौ मासौ **सातिरेकाणि** मनागधिकानि द्वाभ्यां द्वाभ्यां रात्रिन्दिवस्य (द्वा)षष्टिभागाभ्यामधिकानीति भावः **एकोनषष्टि-रेकोनषष्टिः रात्रिन्दिवानि रात्रिन्दिवाग्रेण** रात्रिन्दिवपरिमाणेनाऽऽ**ख्यातानी**ति वदेत्। तथाहि - द्विद्विमासप्रमाणाः षट् ऋतव इति त्रयाणां चतुःपञ्चाशदधिकानां षड्भिर्भागे हृते लब्धा एकोनषष्टिरहोरात्रा द्वादशानां च द्वाषष्टिभागानां षड्भिर्भागे हृते द्वौ द्वाषष्टिभागाविति।

एवं च सति कर्ममासापेक्षया एकैकस्मिनृतौ लौकिकमेकैकं चन्द्रर्त्तुमधिकृत्य व्यवहारत एकैकोऽवमरात्रो भवति, सकले तु कर्मसंवत्सरे षट् अवमरात्राः, तथा चाह -

**मू० तत्थ खलु इमे छ ओमरत्ता पण्णत्ता, तं जहा ततीए पव्वे सत्तमे पव्वे एक्कारसमे पव्वे पण्णरसमे पव्वे एगूणवीसतिमे पव्वे तेवीसइमे पव्वे।**

**टी०** '**तत्थे**'त्यादि। तत्र कर्मसंवत्सरे चन्द्रसंवत्सरमधिकृत्य व्यवहारतः खल्विमे [१]वक्ष्यमाणक्रमाः षट् अवमरात्राः प्रज्ञप्तास्तद्यथा '**ततीये पव्वे**' इत्यादि सुगमम्। इयमत्र भावना - इह कालस्य सूर्यादिक्रियात उपलक्षितस्याऽनादिप्रवाहपतितप्रति-नियतस्वभावस्य न स्वरूपतः कापि हानिर्नापि कश्चिदपि स्वरूपोपचयः यत्त्विदमवम-रात्रातिरात्रप्रतिपादनं तत्परस्परं मासचिन्तापेक्षया, तथाहि - कर्ममासमपेक्ष्य चन्द्र-मासस्य चिन्तायामवमरात्रसम्भवः सूर्यमासमपेक्ष्य कर्ममासचिन्तायामतिरात्रकल्पना, तथा चोक्तं - '**कालस्स उ नवि हाणी नवि वड्ढि वा अ[वि](व)ट्ठिओ कालो। जायइ वड्ढोवुड्ढी मासाणं एक्कमेक्काउ॥११९॥**' **(जो.प.)** तत्रावमरात्रभावना[य]-करणार्थमिदं पूर्वाचार्योपदर्शितं गाथाद्वयं - '**चंदउऊमासाणं अंसा जे दिस्सए विसेसंमि। ते ओमरत्तभागा हवंति मासस्स नायव्वा॥१२०॥ बावट्ठिभागमेकं**

१. वक्ष्यमाणरूपाः - H, T।

**दिवसे संजाइ ओमरत्तस्स। बावट्ठीए दिवसेहिं ओमरत्तं तओ हवइ॥१२१॥' (जो.प.)** अनयोर्व्याख्या- कर्म्ममासः परिपूर्णत्रिंशदहोरात्रप्रमाणः, चन्द्रमास एकोनत्रिंशदहोरात्रा द्वात्रिंशच्च द्वाषष्टिभागा अहोरात्रस्य, ततश्चन्द्रमासस्य चन्द्रमास-परिमाणस्य ऋतुमासस्य च कर्ममासस्य च कर्ममासपरिमाणस्य चेत्यर्थः परस्पर-विश्लेषः क्रियते, विश्लेषे च कृते सति ये अंशा उद्धरिता दृश्यन्ते त्रिंशत् द्वाषष्टिभागरूपास्तेऽवमरात्रस्य भागाः, तद्ध्यवमरात्रं परिपूर्णं भवति मासद्वयपर्यन्ते, ततस्तस्य सत्कास्ते भागा मासस्यावसाने द्रष्टव्याः। यदि त्रिंशति दिवसेषु त्रिंशत् द्वाषष्टिभागा अवमरात्रस्य प्राप्यन्ते तत एकस्मिन्दिवसे कति भागाः प्राप्यन्ते ? राशित्रयस्थापना ३०।३०।१। अत्रान्त्येन राशिना एकलक्षणेन मध्यमस्य राशेस्त्रि-शद्रूपस्य गुणनम्, एकेन गुणितं तदेव भवतीति जाता त्रिंशदेव, तस्यादिराशिना त्रिंशता भागे हृते लब्ध एकः। आगतं प्रतिदिवसमेकैको द्वाषष्टिभागो लभ्यते॥१२०॥ तथा चाह - '**बावट्ठी**'त्यादि। **द्वाषष्टिभाग एकै**[के](**को**) दिवसे (**दिवसे**) जायते **अवमरात्रस्य,** गाथायामेकशब्दो दिवसशब्दश्चागृहीतवीप्सोऽपि सामर्थ्याद्वीप्सां गमयति, नपुंसकनिर्देशश्च प्राकृतलक्षणात्। तदेवं यत एकैकस्मिन्**दिवसे** एकैको द्वाषष्टिभागो अमवरात्रस्य सम्बन्धी प्राप्यते ततो **द्वाषष्ट्या दिवसैरेकोऽवमरात्रो भवति**। किमुक्तं भवति ? दिवसे २ अवमरात्रसत्कैकैकद्वाषष्टिभागवृद्ध्या द्वाषष्टि-तमदिवसे मूलत एव त्रिषष्टितमा तिथिः प्रवर्त्तत इति। एवं च सति य एकषष्टि-तमोऽहोरात्रस्तस्मिन्नेकषष्टितमा द्वाषष्टितमा च तिथिर्निधनमुपगतेति द्वाषष्टितमा तिथिर्लोके पतितेति व्यवह्रियते, उक्तञ्च '**एक्कंमि अहोरत्ते दो वि तिही जत्थ। निहणमे[से](ज्जा)सु सोत्थ तिही परिहायइ॥१२२॥' (जो.प.)** इति॥१२१॥

तत्र वर्षाकालस्य चतुर्मासप्रमाणस्य श्रावणादेस्तृतीये पर्वणि प्रथमोऽवमरात्रः तस्यैव वर्षाकालस्य सम्बन्धि[नो](नि) सप्तमे पर्वणि द्वितीयोऽवमरात्रस्तदनन्तरं शीतकालस्य तृतीये पर्वणि मूलापेक्षया एकादशे तृतीयोऽवमरात्रस्तस्यैव शीतकालस्य सप्तमे पर्वणि

मूलात्पञ्चदशे चतुर्थस्तदनन्तरं ग्रीष्मकालस्य तृतीये पर्वणि मूलापेक्षया एकोनविंशतितमे पञ्चमस्तस्यैव ग्रीष्मकालस्य सप्तमे पर्वणि मूलापेक्षया त्रयोविंशतितमे षष्[ठे](ठः), तथा चोक्तं - **'तइयंमि ओमरत्तं कायव्वं सत्तमंमि पव्वम्मि। वासहिमगिम्हकाले चउमासे विधियते॥१२३॥' (जो.प.)** इहाषाढाद्या लोके ऋतवः प्रसिद्धिमैयरुस्त[था](तो) लौकिकव्यवहारमपेक्ष्य आषाढादारभ्य प्रतिदिवसमेकैकद्वाषष्टिभागहान्या वर्षाकालादिगतेषु तृतीयादिषु पर्वसु यथोक्ता अवमरात्राः प्रतिपाद्यन्ते, परमार्थतः पुनः श्रावणबहुलपक्षप्रतिपत्लक्षणात् युगादित आरभ्य (चतुश्)चतुःपर्वातिक्रमे वेदितव्याः। अथ युगादितः (कति) पर्वातिक्रमे कस्यां तिथाववमरात्रीभूतायां तया सह का तिथिः परिसमाप्तिमुपयास्यतीति चिन्तायामिमाः पूर्वाचार्योपदर्शिताः प्रश्ननिर्वचनरूपा गाथाः - **'पडिवयओमरत्ते कइया[ए वि]-(बिइ)या समप्पिहीइ तिही। बिइयाए वा तइया तइयाए वा चउत्थी उ॥१२४॥ सेसासु चेव काहिइ तिहीसु ववहारगणियदिट्ठासु। सुहुमेण परिल्लतिही संजायइ कम्मि पव्वम्मि॥१२५॥ रूवाहिगा उ ओया बिगुणा पव्वा हवंति कायव्वा। एमेव हवइ जुम्मे एक्कत्तीसा [चु](जु)या पव्वा॥१२६॥' (जो.प.)** एतासां व्याख्या - इह प्रतिपद आरभ्य यावत्पञ्चदशी तावत्यस्तिथयस्तासां च मध्ये कस्मिन्पर्वणि पक्षेऽतिक्रान्ते प्रतिपद्यवमरात्रीभूतायां **द्वितीया तिथिः समाप्(स्)यति**प्रतिपदा सह एकस्मिन्नहोरात्रे समाप्तिमुपयास्यति, **द्वितीयायां वा** तिथाववमरात्रीभूतायां कस्मिन्पर्वणि गते **तृतीया** समाप्तिमे[व](ष्यति) **तृतीयायां वा** तिथाववमरात्रीसम्पन्नायां कस्मिन्पर्वणि **चतुर्थी** तृतीयया सह नि[बन्]धनमुपयास्यति ॥१२४॥ एवं **शेषास्वपि तिथिषु व्यवहारगणितदृष्टासु**-लो[के](क)प्रसिद्धव्यवहारगणितपरिभावितासु पञ्चमी षष्ठी सप्तम्यष्टमी नवमी दशम्येकादशी द्वादशी त्रयोदशी चतुर्दशी पञ्चदशीरूपासु शिष्यः प्रश्नं करिष्यति यथा - **सूक्ष्मेण** प्रतिदिवसमेकैकेन द्वाषष्टि[तम](भाग)रूपेण श्लक्ष्णेन भागेन

परिहीयमानायां तिथौ पूर्वस्याः पूर्वस्या अवमरात्रीभूतायास्तिथेः आनन्तर्येण परा **परा तिथिः कस्मिन्पर्वणि** गते **सञ्जायते** समाप्ता? एतदुक्तं भवति- कस्मिन्पर्वणि गते चतुर्थ्यामवमरात्रीभूतायां पञ्चमी समाप्तिमुपैति पञ्चम्यां वा षष्ठी, एवं यावत्पञ्चदश्यां तिथाववमरात्रीभूतायां कस्मिन्पर्वणि प्रतिपद्रूपा तिथिः समाप्नोतीति॥१२५॥ एवं शिष्यस्य प्रश्नमवधार्य निर्वचनमाह - '**रूवाहिगा**' इत्यादि। इह याः शिष्येण प्रश्नं कुर्व्वता तिथय उद्दिष्टास्ता द्विविधास्तद्यथा ओजोरूपा युग्मरूपाश्च। ओजो विषमम्, समं युग्मम्। तत्र या **ओजो**रूपास्ताः प्रथमतो **रूपाधिकाः** क्रियन्ते, ततो [द्वौ] **द्विगुणाः**, तथा च सति तस्यास्तस्यास्तिथेर्युग्मपर्वाणि निर्वचनरूपाणि समागतानि भवन्ति। '**एमेव हवइ जुम्मे**' इति, या अपि युग्मरूपास्तिथयस्तास्वपि **एव**मेव पूर्वोक्तेनैव प्रकारेण करणं प्रवर्त्तनीयं, नवरं द्विगुणीकरणानन्तरं **एकत्रिंशद्युताः** सत्यः **पर्वाणि** निर्वचनरूपाणि भवन्ति ॥१२६॥' इयमत्र भावना - यदायं प्रश्नः कस्मिन्पर्वणि प्रतिपद्यवमरात्रीभूतायां द्वितीया समाप्नोति? इति, तदा प्रतिपत् [का](कि)लोद्दिष्टा, सा च प्रथमा तिथिरित्येको ध्रियते। स रूपाधिकः क्रियते, जाते द्वे रूपे। ते अपि द्विगुणीक्रियेते, जाताश्चत्वारः। आगतानि चत्वारि पर्वाणि। ततोऽयमर्थो-युगादितश्चतुर्थे पर्वणि गते प्रतिपद्यवमरात्रीभूतायां द्वितीया समाप्तिमुपयातीति। युक्तं चैतत्, तथाहि- प्रतिपद्युद्दिष्टायां चत्वारि पर्वाणि लब्धानि, पर्व च पञ्चदशतिथ्यात्मकं, ततः पञ्चदश चतुर्भिर्गुण्यन्ते, जाता षष्टिः, प्रतिपदि द्वितीया समाप[त](य)तीति द्वे रूपे तत्राधिके प्रक्षिप्ते, जाता द्वाषष्टिः, सा च द्वाषष्ट्या भज्यमाना निरंशं भागं [1]यच्छति, लब्ध एक इत्यागतः प्रथमोऽवमरात्र इत्यविसंवादि करणम्। यदा तु कस्मिन्पर्वणि द्वितीयायामवमरात्रीभूतायां तृतीया समाप्नोतीति प्रश्नस्तदा द्वितीया किल परेणोद्दिष्टेति द्विको ध्रियते। स रूपाधिकः क्रियते, जातानि त्रीणि रूपाणि, तानि द्विगुणीक्रियन्ते जाताः षट्, द्वितीया च तिथिः समेति षट्

१. ... प्रयच्छति - T।

एकत्रिंशद्युताः क्रियन्ते, जाताः सप्तत्रिंशत्। आगता(नि) निर्वचनरूपाणि सप्तत्रिंशत्पर्वाणि। किमुक्तं भवति ? युगादितः सप्तत्रिंशत्तमे पर्वणि गते द्वितीयायामवमरात्रीभूतायां तृतीया समाप्नोतीति। इदमपि करणं समीचीनम्, तथाहि- द्वितीयायामुद्दिष्टायां सप्तत्रिंशत्पर्वाणि समाप्तानि। ततः सप्तत्रिंशत्पञ्चदशभिर्गुण्यते, जातानि पञ्च शतानि पञ्चपञ्चाशदधिकानि ५५५। द्वितीया नष्टा तृतीया जा[तानि](तेति) त्रीणि रूपाणि तत्र प्रक्षिप्यन्ते, जातानि पञ्चशतान्यष्टापञ्चाशदधिकानि ५५८। एषोऽपि राशिर्द्वाषष्ट्या भज्यमानो निरंशं भागं प्रयच्छति, लब्धाश्च नवेत्यागतो नवमोऽवमरात्र इति समीचीनं करणम्। एवं सर्वास्वपि तिथिषु करणभावना करणसमीचीनत्वभावना अवमरात्रसङ्ख्या च स्वयं भावनीया, पर्वनिर्देशमात्रं तु क्रियते। तत्र तृती(या)यां चतुर्थी समापयत्यष्टमे पर्वणि गते, चतुर्थ्यां पञ्चमी एकचत्वारिंशत्तमे पर्व्वणि, पञ्चम्यां षष्ठी द्वादशे पर्वणि, षष्ठ्यां सप्तमी पञ्चचत्वारिंशत्तमे पर्वणि, सप्तम्यामष्टमी षोडशे, अष्टम्यां नवमी एकोनपञ्चाशत्तमे, नवम्यां दशमी विंशतितमे, दशम्यां एकादशी त्रिपञ्चाशत्तमे, एकादश्यां द्वादशी चतुर्विंशतित[मो](मे), द्वादश्यां त्रयोदशी [त्रि](सप्त)पञ्चाशत्तमे, त्रयोदश्यां चतुर्दशी अष्टाविंशतितमे, चतुर्दश्यां पञ्चदशी एकषष्टि[भागे](तमे), पञ्चदश्यां प्रतिपद् द्वात्रिंशत्तमे इति। एवमेता युगे पूर्वार्द्धे। एवं युगोत्तरार्द्धेऽपि द्रष्टव्याः।

तदेवमुक्ता अवमरात्राः। सम्प्रत्यतिरात्रप्रतिपादनार्थमाह -

**मू० तत्थ खलु इमे छ अतिरत्ता पण्णत्ता तं० चउत्थे पव्वे अट्ठमे पव्वे दुवालसमे पव्वे सोलसमे पव्वे विसतिमे पव्वे चउव्वीसतिमे पव्वे। छच्चेव [ओमरत्ता](य अतिरत्ता) आतिच्चाउ भवंति माणाहि। छच्चेव[य अतिरत्ता] (ओमरत्ता) चंदाहि भवंति माणाहि॥**

**टी०** 'तत्थे'त्यादि। तत्रैकस्मिन्संवत्सरे **खल्विमे षट् अतिरात्राः प्रज्ञप्तास्तद्यथा 'चउत्थे पव्वे'** इत्यादि। इह कर्ममासमपेक्ष्य सूर्यमासचिन्ताया-

मेकैकसूर्यर्त्तुपरिसमाप्तावेकैकोऽधिकोऽहोरात्रः प्राप्यते, तथाहि-त्रिंशता अहोरात्रैरेकः कर्म्ममासः सार्द्धत्रिंशता अहोरात्रैरेकः सूर्यमासो मासद्वयात्मकश्च ऋतुः। तत एकसूर्यर्त्तुपरिसमाप्तौ कर्म्ममासद्वयमपेक्ष्यैकोऽधिकोऽहोरात्रः प्राप्यते, सूर्यर्त्तुश्चा-(षाढादिकस्तत आ)षाढादारभ्य **चतुर्थे पर्वणि** (गते) एकोऽधिको अहोरात्रो भवत्य**ष्टमे पर्वणि** गते द्विती[ये](यः) तृतीयो **द्वादशे पर्वणि** चतुर्थः **षोडशे** पञ्चमो **विंशतितमे** षष्ठश्च**तुर्विंशतितमे** इति। अवमरात्रश्च कर्म्ममासद्वयमपेक्ष्यचन्द्रमास-चिन्तायां, चन्द्रमासाश्च श्रावणाद्यास्ततो वर्षाकालस्य श्रावणा[दि](दे)रित्युक्तं प्राक्। सम्प्रति यमपेक्ष्यातिरात्रा यं चापेक्ष्यावमरात्रा भवन्ति तदेतत्प्रतिपादयति - '**छच्चेव य अइरत्ता आइच्चाउ हवंति [जा](मा)णाहि। छच्चेव ओमरत्ता चंदाहि हवंति माणाहि॥**' **अतिरात्रा भवन्ति आदित्यात्** आदित्यमपेक्ष्य, किमुक्तं भवति ? आदित्यमासानपेक्ष्य कर्ममासचिन्तायां प्रतिवर्षं षट् अतिरात्रा भवन्तीति '**मा[सा]-(णा)हि**' - जा[ना](नी)हि, तथा **षट् अवमरात्रा भवन्ति चन्द्रात्**-चन्द्रमपेक्ष्य चन्द्रमासमधिकृत्य कर्ममासचिन्तायां प्रतिसंवत्सरं षट् अवमरात्रा भवन्तीत्यर्थ इति '**माणाहि**' - **जानीहि**।

तदेवमुक्ता अवमरात्रा अतिरात्राश्च। सम्प्रत्या[व](वृ)त्तीर्विवक्षुरिदमाह-[१]

**मू० तत्थ खलु इमातो पंच वासिकीओ पंच हेमंतीओ आउट्टीओ पण्णत्तातो। ता एएसि णं पंचण्हं संवच्छराणं पढमं वासिकिं आउट्टिं चंदे केणं णक्खत्तेणं जोएति ? ता अभितिणा,अभितिस्स णं पढमसमए, तं समतं च णं सूरे केणं णक्खत्तेणं जोगं जोएति ? ता पूसेणं, पूसस्स णं एगूणवीसं मुहुत्ता तेतालीसं च बावट्ठिभागा मुहुत्तस्स बावट्ठिभागं च सत्तट्ठिहा छेत्ता तेत्तीसं चुण्णिया भागा सेसा।**

**टी०** '**तत्थ खलु**' इत्यादि। **तत्र** युगे **खल्विमाः**- वक्ष्यमाणस्वरूपाः **पञ्च**

१. ....विवक्षुराह - C।

**वार्षिक्यः** (वर्षाकालभाविन्यः) **पञ्च हेमन्त्यः** - शीतकालभाविन्यः सर्वसङ्ख्यया दश **आवृत्तयः** सूर्यस्य **प्रज्ञप्ताः**। इयमत्र भावना-आवृत्तयो नाम भूयो भूयो दक्षिणोत्तरगमनरूपास्ताश्च द्विविधाः, तद्यथा एकाः सूर्यस्यावृत्तयोऽपराश्चन्द्रमसः। तत्र युगे सूर्यस्यावृत्तयो दश भवन्ति, चतुस्त्रि(शं च) शतमावृत्तीनां चन्द्रमसः, उक्तञ्च '**सूरस्स य अयणसमा आउट्टीओ [स](जु)गम्मि दस होंति। चंदस्स य आउट्टीसयं च चोत्तीसयं चेव॥२४६॥**' **(जो.प.)** अथ कथमवसीयते सूर्यस्यावृत्तयो युगे दश भवन्ति चन्द्रमसश्चावृत्तीनां चतुस्त्रिंशं शतमिति ? उच्यते, उक्तं नाम आवृत्तयः [सूर्या](भूयो) भूयो दक्षिणोत्तरगमनरूपाः। ततः सूर्यस्य चन्द्रमसो वा यावन्त्ययनानि तावत्य आवृत्तयः, सूर्यस्य चायनानि दश, एतच्चावसीयते त्रैराशिकबलात्, तथाहि - यदि त्र्यशीत्यधिकेन शतेन दिवसानामेकमयनं भवति, ततोऽष्टादशभिः शतैः त्रिंशदधिकैः कति अयनानि लभ्यन्ते ? राशित्रयस्थापना १८३।१।१,८३०। अत्रान्त्येन राशिना मध्यमस्य राशेर्गुणनं, [1]एकस्य च गुणने तदेव भवतीति जातान्यष्टादशशतानि त्रिंशदधिकानि १,८३०। तेषामाद्येन राशिना त्र्यशीत्यधिकेन शतेन भागहरणं, लब्धा दश। आगतं युगमध्ये सूर्यस्य दश अयनानि भवन्तीत्यावृत्तयो(ऽपि दश। तथा यदि त्रयो)दशभिर्दिवसैश्चतुश्चत्वारिंशता च सप्तषष्टिभागैरेकं चन्द्रस्यायनं भवति, ततोऽष्टादशभिर्दिवसशतैस्त्रिंशदधिकैः कति चन्द्रायणानि भवन्ति? राशित्रयस्थापना - १३ ४४/६७।१।१८३०। तत्राद्ये राशौ सवर्ण्णनार्थं त्रयोदशापि सप्तषष्ट्या गुण्यन्ते गुणयित्वा चोपरितनाश्चतुश्चत्वारिंशत्सप्तषष्टिभागाः प्रक्षिप्यन्ते, जातानि नव शतानि पञ्चदशोत्तराणि ९१५, यानि चाष्टादशशतानि त्रिंशदधिकानि ता(नि) अपि सवर्ण्णनाकरणार्थं सप्तषष्ट्या गुण्यन्ते, [जातानि द्वादशलक्षाणि द्वे सहस्रे] (जातमेकं लक्षं द्वाविंशति सहस्राणि) षट् शतानि दशोत्तराणि [१२,०२,६१०](१,२२,६१०)। तत्रैवंरू[पा](पे)णान[ते](त्ये)न राशिना

---

१. - एकस्य गुणने - J।

मध्यमस्य राशेरे[कै](क)करूपस्य गुणनम्, एकस्य च गुणने तदेव भवतीति एतावानेव राशिर्जातस्तस्य नवभिः शतैः पञ्चदशोत्तरैर्भागो ह्रियते, लब्धं चतुस्त्रिंशं शतं १३४। एतावन्ति चन्द्रायणानि युगमध्ये भवन्तीत्येतावन्त्यश्चन्द्रमस आवृत्तयः। सम्प्रति का सूर्यस्यावृत्तिः कस्यां तिथौ भवतीति चिन्तायां यत्पूर्व्वाचार्यैरुपदर्शितं करणं तदुपदर्श्यते - **'आउट्टिहिं एगूणियाहिं गुणियं सयं तु तेसीयं। जेण गुणं तं तिगुणं रूवहियं पक्खिवे तत्थ॥२५३॥ पन्नरसभाइयम्मि उ जं लद्धं तं तइसु होइ पव्वेसु। जे अंसा ते दिवसा आउट्टी [ए](त)त्थ बोद्धव्वा॥२५४॥' (जो.प.)** अनयोर्व्याख्या - **आवृत्ति(भि)रेकोनकाभिर्गुणितं शतं** त्र्यशीत्यधिकम्, किमुक्तं भवति ? या आवृत्तिर्विशिष्टतिथियुक्ता ज्ञातुमिष्टा तत्सङ्ख्या एकोनिका क्रियते। ततस्तया त्र्यशीत्यधिकं शतं गुण्यते, गुणयित्वा च **येनाङ्केन** गुणितं त्र्यशीत्यधिकं शतं **तदङ्**कस्थानं **त्रिगुणं** कृत्वा **रूपाधिकं** सत् **तत्र** पूर्वराशौ प्रक्षिप्यन्ते॥२५३॥ ततः पञ्चदशभिर्भागो ह्रियते, हृते च भागे **यत् लब्धं त[त्तिथि]-(ति)षु** तावत्सङ्ख्याकेषु **पर्वस्व**तिक्रान्तेषु **सा** विवक्षिता आवृत्ति**र्भवति, ये त्वंशाः** पश्चादुद्धरितास्ते **दिवसाः, तत्र** तेषु दिवसेषु मध्ये चरमदिवसे **आवृत्ति**र्भवति इति भावः॥२५४॥ इहावृत्तीनामेवंक्रमो- युगे प्रथ[म](मा) आवृत्तिः श्रावणे मासे, द्वितीया माघे मासे, तृतीया भूयः श्रावणे मासे, चतुर्थी माघमासे, पुनरपि पञ्चमी श्रावणे, षष्ठी माघमासे, भूयः सप्तमी श्रावणे, अष्टमी माघमासे, नवमी [१]श्रावणे मासे, दशमी माघमासे इति। तत्र प्रथमा किल आवृत्तिः कस्यां तिथौ भवतीति यदि जिज्ञासा तदा प्रथमावृत्तिस्थाने [२]एकको ध्रियते, स रूपोनः क्रियते इति न किमपि पश्चात् रूपं प्राप्यते। ततः पाश्चात्ययुगभाविनी या दशमी आवृत्तिः तत्सङ्ख्या दशकरूपा ध्रियते तया त्र्यशीत्यधिकं शतं गुण्यते, जातान्यष्टादशशतानि त्रिंशदधिकानि १,८३०। दशकेन किल गुणितं त्र्यशीत्यधिकशतमिति [तत्](ते)

---

१. श्रावणमासे - J, M। २. एको - T।

दश (त्रि)भिर्गुण्यन्ते, जाता त्रिंशत्। सा रूपाधिका विधेया, जाता एकत्रिंशत्। सा पूर्वराशौ प्रक्षिप्यते, जातान्यष्टादशशतान्येकषष्ट्यधिकानि १,८६१। तेषां पञ्चदशभिर्भागो ह्रियते, लब्धं चतुर्विंशं शतम्, शेषं तिष्ठति एकं रूपम्। आगतं चतुर्विंशत्यधिकपर्वशतात्मके [१]पाश्चात्ययुगेऽतिक्रान्ते अभिनवे युगे प्रवर्त्तमाने प्रथमा आवृत्तिः प्रथमायां तिथौ प्रतिपदि भवतीति। तथा कस्यां तिथौ द्वितीया माघमासभाविनी आवृत्तिर्भवतीति यदि जिज्ञासा ततो द्विको ध्रियते। स रूपोनः कृत इति जात एककस्तेन त्र्यशीत्यधिकं शतं गुण्यते, एकेन च गुणितं तदेव भवतीति, जातं त्र्यशीत्यधिकमेव शतम्। एकेन गुणितं किल त्र्यशीत्यधिकं शतमिति एकस्त्रिगुणीक्रियते, जातस्त्रिकः। स रूपाधिकः क्रियते, जाताश्चत्वारस्ते पूर्वराशौ प्रक्षिप्यन्ते, जातं सप्ताशीत्यधिकं शतं १८७। तस्य पञ्चदशभिर्भागो ह्रियते, लब्धा (द्वादश शेषास्तिष्ठन्ति सप्त। आगतं युगे) द्वादशसु पर्वस्वतिक्रान्तेषु माघमासे (बहुलपक्षे सप्तम्यां तिथौ द्वितीया माघमास)भाविनी(नां) तु मध्ये प्रथमा आवृत्तिरिति। तथा तृतीया आवृत्तिः कस्यां तिथौ भवतीति जिज्ञासायां त्रिको ध्रियते। स रूपोनः क्रियते इति जातो द्विकस्तेन त्र्यशीत्यधिकं (शतं) गुण्यते, जातानि त्रीणि शतानि षट्षष्ट्यधिकानि ३६६। द्विकेन किल गुणितं त्र्यशीत्यधिकं शतमिति द्विकस्त्रिगुणीक्रियते, जाताः षट्। ते रूपाधिकाः क्रियन्ते, जाताः सप्त। ते पूर्वराशौ प्रक्षिप्यन्ते, जातानि त्रीणि शतानि त्रिसप्तत्यधिकानि ३७३। तेषां पञ्चदशभिर्भागो ह्रियते, लब्धा चतुर्विंशतिः २४ (शेषास्तिष्ठन्ति त्रयोदशांशाः।) आगतं युगे तृतीया आवृत्तिः श्रावणमासभाविनीनां तु मध्ये द्वितीया चतुर्विंशतिपर्वात्मके प्रथमे संवत्सरेऽतिक्रान्ते [२]श्रावणस्य बहुलपक्षे (त्रयोदश्यां तिथौ भवतीति। एवमन्यास्वप्यावृत्तिषु करणवशाद्विवक्षितास्तिथयः आनेतव्याः। ताश्चेमा युगे चतुर्था माघमासभाविनीनां तु मध्ये द्वितीया शुक्लपक्षे चतुर्थ्यां, पञ्चमी श्रावणमासभाविनीनां तु

---

१. पाश्चात्ये युगे - T। २. श्रावणमासे - G, M, श्रावणमासि - B, C।

मध्ये तृतीया शुक्लपक्षे दशम्यां, षष्ठी माघमासभाविनीनां तु मध्ये तृतीया माघमासे बहुलपक्षे) प्रतिपदि, सप्तमी श्रावणमासभाविनीनां तु मध्ये चतुर्थी श्रावणमास-बहुलसप्तम्यां, अष्टमी माघमासभाविनीनां तु मध्ये चतुर्थी माघमासे बहुलपक्षे त्रयोदश्यां, नवमी श्रावणमासभाविनीनां तु मध्ये पञ्चमी श्रावणमासे शुक्लपक्षे चतुर्थ्यां, दशमी माघमासभाविनीनां तु मध्ये पञ्चमी माघमासशुक्लपक्षे दशम्याम्। तथा च एता (ए)व[न्तं] पञ्चानां श्रावणमासभाविनीनां पञ्चानां तु माघमासभाविनीनां तिथयोऽन्यत्राप्युक्ताः '**पढमा बहुलपडिवए बिइया बहुलस्स तेरसी दिवसे। सुद्धस्स य दसमीए बहुलस्स य [द]स(त्त)मीए उ।।२४७।। सुद्धस्स चउत्थीए पवत्तए पंचमी उ आउट्टी। एता आउट्टीओ सव्वाओ सावणे मासे।।२४८।। बहुलस्स सत्तमीए पढमा सुद्धस्स तो चउत्थीए। बहुलस्स य पडिवए बहुलस्स य तेरसीदिवसे।।२५०।। सुद्धस्स य दसमीए पवत्तए पंचमी उ आउट्टी। एयाओ आउट्टीओ सव्वाओ माघमासम्मि।।२५१।।**' (जो.प.) एतासु च सूर्यावृत्तिषु (चन्द्र)नक्षत्रयोगपरिज्ञानार्थमिदं करणं - '**पंच सया पडिपुण्णा तिसत्तरा नियमसो मुहुत्ताणं। छत्तीस[त्ती य](बिसट्ठि)भागा छच्चेव य चुन्निया भागा।।२५५।। आउट्टिहिं एगूणियाहिं गुणि[अ](ओ) हवेज्ज धुवरासी। एयं मुहुत्तगणियं एत्तो वोच्छामि सोहणगं।।२५३।। अभिइस्स नव मुहुत्ता बिसट्ठिभागा य हुंति चउवीसं। छावट्ठीय समग्गा भागा सत्तट्ठिछेयकया।।२५७।। उगुणट्ठं पोट्ठवया तिसु चेव नवोत्तरेषु रोहिणिया। तिसु नवनउएसु भवे पुणव्वसु उत्तराफग्गू।।२५८।। पंचेव अउणपन्ना सयाइं इगुणत्तराइं छच्चेव। सो[जा]-(ज्झा)णि विसाहासु मूले सत्तेव चोयाला।।२५९।। अट्ठ सयमुगुणवीसा सोहणगं उत्तरआसाढाणं। चउवीसं खलु भागा छावट्ठी [1]चुन्निया भागा।।२६०।। एयाइं [2]सोहेइत्ता जं सेसं तं [3]हविज्ज नक्खत्तं। चंदेण समाउत्तं आउट्टिए उ**

१. चुण्णियाओ य - इति मुद्रितज्योतिष्करण्डकप्रकीर्णके पाठः। २. सोहइत्ता - C, G, T। ३. हवेज्ज - C।

**बोद्धव्[वा](वं) ॥२६१॥' (जो.प.)** एतासां व्याख्या- **पञ्च शतानि त्रिसप्(त)तानि**-त्रिसप्तत्यधिकानि **परिपूर्णानि मुहुर्त्तानां** भवन्ति **षट्त्रिंशच्च द्वाषष्टिभागाः षट् चैव चूर्ण्णिका भागा** एकस्य द्वाषष्टिभागस्य सत्काः षट् सप्तषष्टिभागाः, एतावान् विवक्षितकरणध्रुवराशिः। कथमस्योत्पत्तिरिति चेत् ? उच्यते, इह यदि दशभिः सूर्यायनैः सप्तषष्टिश्चन्द्रनक्षत्रपर्याया लभ्यन्ते त[त्](त) एकेन सूर्यायनेन किं लभामहे ? राशित्रयस्थापना १०।६७।१। अत्रान्त्येन राशिना एककेन मध्यमस्य राशेः सप्तषष्टिलक्षणस्य गुणना, एकेन च गुणितं तदेव भवति इति जाताः सप्तषष्टिः ६७। तस्य दशभिर्भागहारे लब्धाः षट् पर्यायाः एकस्य च पर्यायस्य सप्त दशभागाः, ये च सप्तमस्य पर्यायस्य सप्त दशभागास्तद्गतमुहूर्त्तपरिमाणमधिकृत-गाथायामुपन्यस्तम्। कथमेतदवसीयते यथै[व]तावन्तस्तत्र मुहूर्त्ता इति चेत् ? उच्यते, त्रैराशिककर्म्मावतारणलब्धाः, तथाहि - यदि दशभिर्भागैः सप्तविंशतिर्दिनानि एकस्य च दिनस्य एकविंशतिः सप्तषष्टिभागा लभ्यन्ते सप्तभिर्भागैः किं लभामहे ? राशित्रयस्थापना १०।२७$\frac{२१}{६७}$।७। अत्रान्त्येन राशिना सप्तकलक्षणेन मध्यस्य राशेर्मध्ये सप्तविंशतिदिनानि गुण्यन्ते, जातं नवाशीत्यधिकं शतं १८९। तस्याद्येन राशिना दशकलक्षणेन भागे हृते लब्धा अष्टादश दिवसाः ते च मुहूर्त्तानयनाय त्रिंशता गुण्यन्ते, जातानि पञ्च शतानि चत्वारिंशदधिकानि मुहूर्त्ता[नि](नां) ५४०। शेषा उपरि तिष्ठन्ति नव, ते मुहूर्त्तकरणार्थं त्रिंशता गुण्यन्ते, जाते द्वे शते सप्तत्यधिके २७०। तयोर्दशभिर्भागे हृते लब्धाः सप्तविंशतिमुहूर्त्ताः २७। ते पूर्वस्मिन् मुहूर्त्तराशौ प्रक्षिप्यन्ते जातानि [१]पञ्च शतानि सप्तषष्ट्यधिकानि ५६७, येऽपि च एकविंशतिः सप्तषष्टिभागाः दिनस्य तेऽपि मुहूर्त्तभागकरणार्थं त्रिंशता गुण्यन्ते, जातानि षट् शतानि त्रिंशदधिकानि ६३०। तानि सप्तभिर्गुण्यन्ते, जातानि [२]चतुश्चत्वारिंशत् शतानि दशोत्तराणि ४,४१०। तेषां दशभिर्भागे हृते लब्धानि चत्वारि शतानि

१. सप्तषष्ट्यधिकानि पञ्च शतानि - G। २. चतुश्चत्वारिंशच्छतानि दशोत्तराणि- D, G, F।

एकचत्वारिंशदधिकानि ४४१। तेषां सप्तषष्ट्या भागे हृते लब्धाः षट् मुहूर्त्ताः, ते पूर्वमुहूर्त्तराशौ प्रक्षिप्यन्ते, जातानि मुहूर्त्तानां पञ्चशतानि त्रिसप्तत्यधिकानि ५७३, शेषा चोद्धरति एकोनचत्वारिंशत्, सा द्वाषष्ट्या गुण्यते, जातानि चतुर्विंशतिशतानि अष्टादशाधिकानि २,४१८। तेषां सप्तषष्ट्या भागो ह्रियते, लब्धा षट्त्रिंशत् द्वाषष्टिभागाः शेषास्तिष्ठन्ति षट् [ते षट्त्रिंश] ते च एकस्य च द्वाषष्टिभागस्य सत्काः सप्तषष्टिभागाः, एते च श्लक्ष्णरूपा भागा इति चूर्णिकाभागा इति व्यपदिश्यन्ते॥२५५॥ तदेवमुक्तो ध्रुवराशिः। सम्प्रति करणगाथा- '**आउट्टीहिं**' इत्यादि। यस्यां यस्यामावृत्तौ नक्षत्रयोगो ज्ञातुमिष्यते तया तया **आवृत्त्या एकोनिकया** एकरूपहीनया **गुणितो (ध्रुवराशिः)** अनन्तरोक्तस्वरूपो **भवेत्** यावान् **एतत् (मुहूर्त्तगणितं)** मुहूर्त्तपरिमाण**मत** ऊर्द्ध्वं **वक्ष्यामि शोधनकम्**॥२५६॥ तत्र प्रथमतोऽभिजितो नक्षत्रस्य शोधनकमाह- '**अभिइस्से**'त्यादि। **अभिजितो** अभिजिन्नक्षत्रस्य शोधनकं **नव मुहूर्त्ता** एकस्य च मुहूर्त्तस्य **चतुर्विंशतिः द्वाषष्टिभागा** एकस्य च मुहूर्त्तगतस्य (द्वाषष्टिभागस्य) सत्काः **(सप्त)षष्टिच्छेदकृताः समग्राः**-परिपूर्णा **षट्षष्टिभागाः**। कथमेतस्योत्पत्तिरिति चेत् ? उच्यते, इहाभिजितोऽहोरात्रसत्का एकविंशतिः सप्तषष्टिभागाश्च[न्द्रमास](न्द्रेण) योगः, तत्राहोरा[त्रि](त्रे) त्रिंशत् मुहूर्त्ता इति मुहूर्त्तभागकरणार्थं सा एक[त्रिं](विं)शतिः त्रिंशता गुण्यते, जातानि षट् शतानि त्रिंशदधिकानि ६३०। तेषां सप्तषष्ट्या भागो ह्रियते, लब्धा नव मुहूर्त्ताः, शेषास्तिष्ठन्ति सप्तविंशतिः। ते द्वाषष्टिभागकरणार्थं द्वाषष्ट्या गुण्यन्ते, जातानि [षट्](षोडश)शतानि चतुःसप्तत्यधिकानि १,६७४। तेषां सप्तषष्ट्या भागो ह्रियते, लब्धाश्चतु[स्त्रिं](र्विं)शतिर्द्वाषष्टिभागाः॥२५७॥ सम्प्रति शेषनक्षत्राणां शोधनकानि उच्यन्ते- '**उगुणट्ठ**'मित्यादि गाथात्रयम्। **एकोनष[ष्टि](ष्ट)म्**- एकोनषष्ट्यधिकं शतं **प्रोष्ठपदा** उत्तरभद्रपदा, किमुक्तं भवत्ये[के](को)नषष्ट्यधिकेन शतेनाभिजिदादीन्युत्तरभद्रपदान्तानि नक्षत्राणि शुध्यन्ति, तथाहि - नवमुहूर्त्ता अभिजितस्त्रिंशत्

श्रवणस्य त्रिंशत् धनिष्ठायाः पञ्चदश शतभिषजस्त्रिशत् पूर्वभद्रपदायाः पञ्चचत्वारिंशत् उत्तरभद्रपदाया इति शुध्यन्त्येकोनषष्ट्यधिकेन शतेनोत्तरभद्रपदान्तानि नक्षत्राणि। तथा **त्रिषु नवोत्तरशतेषु रोहिणिका**-रोहिणिकान्तानि शुध्यन्ति, तथाहि - एकोन-षष्ट्यधिकेन शतेनोत्तरभद्रपदान्तानि शुध्यन्ति ततस्त्रिशता मुहूर्त्तै रेवती त्रिंशता अश्विनी पञ्चदशभिर्भरणी त्रिंशता कृत्तिका पञ्चचत्वारिंशता रोहिणीकेति। तथा **त्रिषु नवनवत्यधिकेषु शतेषु पुनर्वसुः**-पुनर्वस्वन्तानि शुध्यन्ति। तत्र त्रिभिः शतैर्नवोत्तरैः रोहिणिका (रोहिणिकान्तानि) शुध्य(न्)ति, ततस्त्रिशता मुहूर्त्तैर्मृगशिरः पञ्चदशभिरार्द्रा पञ्चचत्वारिंशता पुनर्वसुरिति॥२५८॥ तथा **पञ्च शतान्येकोनपञ्चाशदधिकानि उत्तरफाल्गुनी**पर्यन्तानि, किमुक्तं भवति ? पञ्चभिः शतैरेकोनपञ्चाशदधिकैरुत्तर-फाल्गुन्यन्तानि नक्षत्राणि शुध्यन्ति, तथाहि - त्रिभिः शतैर्नव(नव)त्यधिकैः पुनर्व-स्वन्तानि शुध्यन्ति, ततस्त्रिशता मुहूर्तैः पुष्यः पञ्चदशभिरश्लेषा त्रिंशता मघा त्रिंशता (पूर्व)फाल्गुनी पञ्चचत्वारिंशता [१] उत्तरफाल्गुनीति। (तथा) **षट्शतान्येकोनसप्त-तानि** - एकोनसप्तत्यधिकानि **विशाखानां**-विशाखापर्यन्तानां नक्षत्राणां **शोध्यानि**, तथाहि - उत्तरफाल्गुन्यन्तानां पञ्च शतानि एकोनपञ्चाशदधिकानि शोध्यानि, ततस्त्रिशन्मुहूर्त्ता हस्तस्य त्रिंशन्मुहूर्त्ता चित्राया पञ्चदश स्वातेः पञ्चचत्वारिंशत् विशाखाया इति। तथा **मूले** - मूलनक्षत्रे शोध्यानि **सप्त शतानि चतुश्चत्वारिंशद-धिकानि** ७४४। तत्र षट् शतानि एकोनसप्तत्यधिकानि ६६९ विशाखा(न्ता)नां नक्षत्राणां शोध्यानि, ततस्त्रिशत् मुहूर्त्ता अनुराधायाः पञ्चदश ज्येष्ठायाः त्रिंशत् मूलस्येति॥२५९॥ तथाऽष्टौ शतानि समाहृतानि **अष्टशतमेकोनविंशत्यधिकम्**, किमुक्तं भवति ? अष्टौ शतान्येकोनविंशत्यधिकानि **उत्तराषाढान्तानां** नक्षत्राणां **शोधनकम्**, तथाहि - मूलान्तानां नक्षत्राणां शोध्यानि सप्तशतानि चतुश्चत्वारिंशद-धिकानि ७४४, तत्र त्रिंशत् मुहूर्त्ताः पूर्वाषाढानक्षत्रस्य पञ्चचत्वारिंशदुत्तराषाढा-

---

१. उत्तरफाल्गुनी - ।।

नामिति। तथा सर्वेषामपि चामीषां शोधनकानामुपरि अभिजितः सम्बन्धिन-**श्चतुर्विंशतिः** द्वाषष्टि**भागाः** शोध्या एकस्य च द्वाषष्टिभागस्य सत्काः **षट्षष्टिः चूर्णिका भागाः**॥२६०॥ **'एयाइं'** इत्यादि। **एतानि** अनन्तरोदितानि शोधनकानि यथासम्भवं **शोधयित्वा यत् शेष**[मपूरन्ति](मुद्धरति), तत्र यथायोगमपान्तरालवर्त्तिषु नक्षत्रेषु शोधितेषु यन्नक्षत्रं न शुध्यति **तत् नक्षत्रं चन्द्रेण समायुक्तं** विवक्षिताया**मावृत्तौ** वेदितव्यम्॥२६१॥ तत्र प्रथमायामावृत्तौ प्रथमतः प्रवर्त्तमानायां केन नक्षत्रेण युक्तश्चन्द्रः ? इति यदि जिज्ञासा तत्प्रथमावृत्तिस्थाने एकको ध्रियते। स रूपोनः क्रियत इति न किमपि पश्चात् रूपमवतिष्ठते। ततः पाश्चात्य-युगभाविनीनामावृत्तीनां मध्ये या दशमी आवृत्तिस्तत्सङ्ख्या दशकरूपा ध्रियते। तया प्राचीनः समस्तोऽपि ध्रुवराशिः पञ्च शतानि त्रिसप्तत्यधिकानि मुहूर्त्तानामेकस्य मुहूर्त्तस्य षट्त्रिंशत् द्वाषष्टिभागा एकस्य च द्वाषष्टिभागस्य षट् सप्तषष्टिभागाः ५७३ ३६/६२ ६/६७ इत्येवम्प्रमाणो गुण्यते। तत्र मुहूर्त्तराशौ दशभिर्गुणिते जातानि सप्तपञ्चाशत् शतानि त्रिंशदधिकानि ५,७३०। येपि च षट्त्रिंशत् द्वाषष्टिभागास्तेऽपि दशभिर्गुणि[ते](ताः), जातानि त्रीणि शतानि षष्ट्यधिकानि ३६०। एतेषां द्वाषष्ट्या भागे हृते लब्धाः पञ्च मुहूर्त्तास्ते पूर्वराशौ प्रक्षिप्यन्ते, जातः पूर्वराशिः सप्तपञ्चाशत् शतानि पञ्चत्रिंशदधिकानि ५,७३५। शेषास्तिष्ठन्ति द्वाषष्टिभागाः पञ्चाशत् ५०। येऽपि षट् चूर्णिका भागास्तेऽपि दशभिर्गुणिता जाता षष्टिः। तत एतस्मात् शोधनकानि शोध्यन्ते। तत्रोत्तराषाढान्तानां नक्षत्राणां शोधनकमष्टौ शतान्येकोनविंशत्यधिकानि ८१९। एतानि किल यथोदितराशेः सप्तकृत्वः शुद्धिमाप्नुवन्तीति सप्तभिर्गुण्यन्ते, जातानि सप्तपञ्चाशत् शतानि त्रयस्त्रिंशदधिकानि ५७३३। तानि (सप्त)पञ्चाशत्शतेभ्यः पञ्चत्रिंशदधिकेभ्यः पात्यन्ते, स्थितौ पश्चात् द्वौ मुहूर्त्तौ। तौ द्वाषष्टिभागकरणार्थं द्वाषष्ट्या गुण्येते, जातं चतुर्विंशतं शतं द्वाषष्टिभागानां १२४। तत् प्राक्तने पञ्चाशल्लक्षणे द्वाषष्टिभा[गे](ग)राशौ प्रक्षिप्यते, जातं चतुःसप्तत्यधिकं शतं १७४

द्वाषष्टिभागानाम्। [य](त)था ये अभिजितः सम्बन्धिनश्चतु[स्त्रि](र्विं)शतिर्द्वाषष्टिभागाः शोध्यास्ते सप्तभिर्गुण्यन्ते, जातमष्टषष्ट्यधिकं शतं १६८। तत् चतुःसप्तत्यधिकात्शतात्शोध्यते, स्थिताः शेषाः षट् द्वाषष्टिभागाः। ते च चूर्णिकाभागकरणार्थं सप्तषष्ट्या गुण्यन्ते गुणयित्वा च ये प्राक्तनाः (षष्टिः सप्तषष्टिभागा)स्ते तत्र प्रक्षिप्यन्ते, जातानि चत्वारि शतानि द्वाषष्ट्यधिकानि ४६२। ततो ये अभिजितः सम्बन्धिनः षट्षष्टिः चूर्णिका भागाः शोध्यास्ते सप्तभिर्गुण्यन्ते, जातानि चत्वारि शतानि द्वाषष्ट्यधिकानि ४६२ तान्यनन्तरोदितराशेः शोध्यन्ते, स्थितं पश्चात् शून्यम्। त(त्)(त) आगतं साकल्येन उत्तराषाढानक्षत्रे चन्द्रेण भुक्ते सति तदनन्तरस्याभिजितो नक्षत्रस्य प्रथमसमये युगे प्रथमा आवृत्तिः प्रवर्त्तते। एतदेव प्रश्ननिर्वचनरीत्या प्रतिपादयति - '**(ता) एएसि ण**'मित्यादि। **एतेषामनन्तरोदितानां पञ्चानां** चन्द्रादीनां **संवत्सराणां** मध्ये **प्रथमां वार्षिकीं**-वर्षाकालसम्बन्धिनीमित्यर्थः श्रावणमासभाविनीमित्यर्थः **आवृत्तिं चन्द्रः केन नक्षत्रेण युनक्ति**-केन नक्षत्रेण सह योगमुपागतः सन् प्रवर्त्तयति ? एवं गौतमेन प्रश्ने कृते भगवानाह- '**ता अभिइणा**' इत्यादि। **अभिजिता** नक्षत्रेण युनक्ति। एतदेव विशेषत आचष्टे- **अभिजितो** नक्षत्रस्य **प्रथमसमये** युनक्ति। तदेवं चन्द्रनक्षत्रमवबुध्य सूर्यनक्षत्रविषयं प्रश्नमाह- '**तं समयं च ण**'मित्यादि। **तस्मिंश्च समये** '**ण**'मिति वाक्यालङ्कारे **सूर्यः केन नक्षत्रेण युनक्ति** केन नक्षत्रेण सह सूर्यो योगमुपागतः सन् तां [१]प्रथमामावृत्तिं प्रवर्त्तयतीति ? भगवानाह- '**ता पूसेण**'मित्यादि। '**ता**' इति पूर्ववत्, **पुष्येण** युक्तस्तां प्रथमामावृत्तिं युनक्ति। एतदेव सविशेषमाचष्टे, तदानीं **पुष्यस्य *एकोनविंशतिमुहूर्त्तास्त्रिचत्वारिंशच्च द्वाषष्टिभागा मुहूर्त्तस्य*** एकं च **द्वाषष्टिभागं सप्तषष्टिधा छित्त्वा** तस्य सत्का**स्त्रयस्त्रिंशत् चूर्णिका भागाः शेषाः**। कथमेतदवसीयते इति चेत् ? उच्यते, त्रैराशिकबलात्, तथाहि - दशभिरयनैः पञ्च

---

१. प्रथमावृत्तिं - D, T।

सूर्यकृतान्नक्षत्रपर्यायान्लभामहे तत एकेनायनेन किं लभामहे ? राशित्रयस्थापना- १०।५।१। अत्रान्त्येन राशिना [1]एककलक्षणेन [2]मध्यस्य राशेः पञ्चरूपस्य गुणनम्, जाताः पञ्चैव। तेषां दशभिर्भागो ह्रियते, लब्धमर्द्धं पर्यायस्य। तत्र नक्षत्रपर्याय[स्य](ः) सप्तषष्टिभागरूपोऽष्टादशशतानि त्रिंशदधिकानि १,८३०, तथाहि - षट् नक्षत्राणि शतभिषक्प्रभृतीनि अर्द्धक्षेत्राणि। ततस्तेषां प्रत्येकं सार्द्धास्त्रयस्त्रिंशत् सप्तषष्टिभागास्ते सार्द्धास्त्रयस्त्रिंशत् षड्भिर्गुण्यन्ते, जाते द्वे शते एकोत्तरे २०१। षड् नक्षत्राण्युत्तर-भद्रपदादीनि द्व्यर्द्धक्षेत्राणि। ततस्तेषां प्रत्येकमेकं शतं सप्तषष्टिभागानामेकस्य च सप्तषष्टिभागस्यार्द्धम्। एतत् षड्भिर्गुण्यते, जातानि षट् शतानि त्र्युत्तराणि ६०३। शेषाणि पञ्चदश नक्षत्राणि समक्षेत्राणि। तेषां प्रत्येकं सप्तषष्टिभागाः। ततः सप्तषष्टिः पञ्चदशभिर्गुण्यते, जातं पञ्चोत्तरं सहस्रं १,००५। एकविंशतिश्चाभिजितः सप्तषष्टि-भागाः। सर्वसङ्ख्यया सप्तषष्टिभागानामष्टादशशतानि त्रिंशदधिकानि १,८३०। एष परिपूर्णः सप्तषष्टिभागात्मको नक्षत्रपर्यायः। एतस्यार्द्धे नव शतानि पञ्चदशोत्तराणि ९१५। तेभ्य एकविंशतिरभिजितः सम्बन्धिनी शुद्धा, शेषाणि तिष्ठन्त्यष्टौ शतानि चतुर्नवत्यधिकानि ८९४। तेषां सप्तषष्ट्या भागो ह्रियते लब्धास्त्रयोदश १३, शेषास्तिष्ठन्ति त्रयोविंशतिस्त्रयोदशभिश्च पुनर्वस्वन्तानि नक्षत्राणि शुद्धानि, ये च शेषास्तिष्ठन्ति त्रयोविंशतिः सप्तषष्टिभागाः ते मुहूर्त्तकरणार्थं त्रिंशता गुण्यन्ते जातानि षट् शतानि नवत्यधिकानि ६९०। तेषां सप्तषष्ट्या भागो ह्रियते (ग्रन्थाग्रं ७,०००), लब्धा दश मुहूर्त्ताः १० शेषास्तिष्ठन्ति विंशतिः। सा द्वाषष्टिभागकरणार्थं द्वाषष्ट्या गुण्यते, जातानि द्वादशशतानि चत्वारिंशदधिकानि १,२४०। तेषां सप्तषष्ट्या भागो ह्रियते, लब्धा अष्टादश द्वाषष्टिभागाः, शेषास्तिष्ठन्ति चतुस्त्रिंशत् द्वाषष्टिभागस्य सप्तषष्टिभागाः। तत आगतं पुष्यस्य दशसु मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्याष्टादशसु द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्य चतुस्त्रिंशति सप्तषष्टिभागेषु गतेषु एकोनविंशतौ

---

१. एकलक्षणेन - D, J, T। २. मध्यमस्य - D, J।

च मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य त्रिचत्वारिंशति द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्य त्रयस्त्रिंशति सप्तषष्टिभागेषु प्रथमा श्रावणमासभाविन्यावृत्तिः प्रवर्त्तते इति।

(अथ द्वितीयश्रावणमासभाव्यावृत्तिविषयं प्रश्नसूत्रमाह-)

**मू० ता एएसि णं पंचण्हं संवच्छराणं दोच्चं वासिकिं आउट्टिं चंदे [१] केण न० जुंजइ ? ता संठाणाहिं, संठाणाणं सो चेव अभिलावो एक्कारस० उयालीसं० तेपण्णं चेव चुण्णिया०। तं समतं च णं [२] सूरे पुच्छा ? ता पूसेणं पूसस्स णं तं चेव।**

टी० **'ता एएसि ण'**मित्यादि। **'ता'** इति पूर्ववत्, **एतेषां** अनन्तरोदितानां **पञ्चानां संवत्सराणां** मध्ये **द्वितीयां** वार्षिकीं श्रावणमासभाविनीमा**वृत्तिं चन्द्रः केन नक्षत्रेण युनक्ति** - केन नक्षत्रेण युक्तः सन् चन्द्रो द्वितीयामावृत्तिं प्रारम्भयति ? एवं प्रश्ने कृते सति भगवानाह - **'ता संठाणाहिं'** इत्यादि। **'ता'** इति पूर्ववत्, **संस्थानाभिः** - संस्थानाशब्देन मृगशिरोनक्षत्रमभिधीयते,तथा च प्रवचने प्रसिद्धेः, ततो मृगशिरोनक्षत्रेण युक्तश्चन्द्रमा द्वितीयां श्रावणमासभाविनीमावृत्तिं प्रवर्त्तयति, तदानीञ्च [३] **मृगशिरोनक्षत्रस्य एकादशमुहूर्त्ता** एकस्य च **मुहूर्त्तस्य एकोनचत्वारिंशत् द्वाषष्टिभागा** एकस्य च द्वाषष्टिभागस्य [षट्](**त्रिपञ्चाशत्**) **सप्तषष्टिभागाः शेषास्तथाहि** - इह या द्वितीया श्रावणमासभाविन्यावृत्तिः सा प्राक्प्रदर्शित[म]-(क्रमा)पेक्षया तृतीया। ततस्तत्स्थाने त्रिको ध्रियते। स रूपोनः क्रियत इति, जातो द्विकस्तेन प्राक्तनो ध्रुवराशिः पञ्च शतानि त्रिसप्तत्यधिकानि मुहूर्त्तानामेकस्य च मुहूर्त्तस्य षट्त्रिंशत् द्वाषष्टिभागा (एकस्य च) द्वाषष्टिभागस्य षट् सप्तषष्टिभागाः ५७३ ३६/६२ ६/६७ इत्येवम्प्रमाणो गुण्यते, जातानि एकादश शतानि षट्चत्वारिंश-दधिकानि (मुहूर्त्तानां) १,१४६ द्वासप्तति(रे)कस्य मुहूर्त्तस्य सत्का द्वाषष्टिभागाः

---

१. केणं पुच्छा - U। २. सूरे केणं णक्खत्तेणं जोएति पुच्छा- U, V। ३. संठाणाणं सो चेव अभिलावो एक्कारस०......... मूले।

७२/६२ एकस्य च द्वाषष्टिभागस्य द्वादश सप्तषष्टिभागाः १२/६७। तत एतेभ्यो मुहूर्त्तानामष्टभिः शतैरेकोनविंशत्यधिकैरेकस्य च मुहूर्त्तस्य चतुर्विंशत्या द्वाषष्टिभागैरेकस्य च द्वाषष्टिभागस्य षट्षष्ट्या सप्तषष्टिभागैरेकः परिपूर्णो नक्षत्रपर्यायः शुद्धः, स्थितानि पश्चात् मुहूर्त्तानां त्रीणि शतानि सप्तविंशत्यधिकानि एकस्य च मुहूर्त्तस्य सप्तचत्वारिंशत् द्वाषष्टिभागा एकस्य च द्वाषष्टिभागस्य त्रयोदश सप्तषष्टिभागाः ३२७।४७।१३। तत एतेभ्यस्त्रिभिर्मुहूर्त्तशतैर्नवोत्तरैरेकस्य च मुहूर्त्तस्य चतुर्विंशत्या द्वाषष्टिभागैरेकस्य च द्वाषष्टिभागस्य षट्षष्ट्या सप्तषष्टिभागैरभिजिदादीनि रोहिणिकापर्यन्तानि नक्षत्राणि शुद्धानि '**तिसु चेव नवोत्तरेसु रोहिणिया**' इत्यादिप्रागुक्तवचनात्। ततः स्थिताः पश्चादष्टादशमुहूर्त्ता एकस्य च मुहूर्त्तस्य द्वाविंशतिर्द्वाषष्टिभागा एकस्य च द्वाषष्टिभागस्य चतुर्दश सप्तषष्टिभागाः १८ २२/६२ १४/६७, एतावता च मृगशिरो न शुध्यति। तत आगतं मृगशिरो नक्षत्रमेकादशमुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य एकोनचत्वारिंशत् द्वाषष्टिभागेषु एकस्य च द्वाषष्टिभागस्य त्रिपञ्चाशति सप्तषष्टिभागेषु शेषेषु द्वितीयां श्रावणमासभाविनीमावृत्तिं प्रवर्त्तयति। (सम्प्रति सूर्यनक्षत्रविषयं प्रश्नसूत्रं चाह-) '**तं समयं च ण**'मित्यादि।[१] **तस्मिंश्च समये सूर्यः केन नक्षत्रेण** सह **योग**मुपागतस्तां द्वितीयां वार्षिकीमावृत्तिं **युनक्ति**? भगवानाह- '**ता पूसेण**'-मित्यादि। '**ता**' इति पूर्ववत् **पुष्येण** युक्तः, '**तं चेव**' इति सामर्थ्यादिदं द्रष्टव्यं '**पुस्सस्स एगुणवीसं मुहुत्ता तेयालीसं च बावट्ठीभागा मुहुत्तस्स बावट्ठिभागं च सत्तट्ठिहा छेत्ता तेत्तीसं चुण्णिया भागा सेसा**' इति। इह सूर्यस्य दशभिरयनैः पञ्च सूर्यनक्षत्रपर्याया लभ्यन्ते द्वाभ्यां चायनाभ्यामेकः। तत्रोत्तरायणं कुर्वन् सर्वदैवाभिजिता नक्षत्रेण सह योगमुपागच्छति, दक्षिणायनं कुर्वन् पुष्येण, तस्य च पुष्यस्य एकोनविंशतौ मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य [द्वि](त्रि)चत्वारिंशति द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्य त्रयस्त्रिंशति सप्तषष्टिभागेषु शेषेसु, तथा चोक्तं -

१. तं समयं च णं सूरे पुच्छा ? - मूले।

**'अब्भिंतराहिं निंतो आइच्चो पुस्सजोग[म](मु)वगम्म। सव्वा आउट्टीओ करेइ सो सावणे मासे॥२६२॥' (जो.प.)** इत्यादि। ततः '**पूसेण**'मित्याद्युक्तम्।

सम्प्रति तृतीयश्रावणमासभाविन्यावृत्तिविषयं प्रश्नसूत्रमाह -

**मू० ता एएसि णं पंचण्हं संवच्छराणं तच्चं वासिकिं आउट्टिं चंदे केणं णक्खत्तेणं पु० ? ता विसाहाहिं, विसाहाणं तेणं चेव अभिलावेणं तेरस मुहुत्ता चउप्पण्णं बावट्ठिभागा मुहुत्तस्स बावट्ठिभागं च सत्तट्ठिहा छेत्ता चत्तालीसं चुण्णिया भागा सेसा, तं समतं च णं सूरे केणं णक्खत्तेणं० ? ता पूसेणं, पूसस्स णं तं चेव।**

**टी० 'ता एएसि ण'**मित्यादि सुगमम्। भगवानाह- '**ता विसाहाहिं**' इत्यादि। '**ता**' इति पूर्ववत्, विशाखानक्षत्रेण युक्तः सन् चन्द्रमास्तृतीयां[1] श्रावणमासभाविनी-मावृत्तिं प्रवर्त्तयति, तदानीं च तृतीयावृत्तिप्रवर्त्तनसमये **विशाखानां**[2] विशाखानक्षत्रस्य **त्रयोदश मुहूर्त्ता** एकस्य च **मुहूर्त्तस्य चतुष्पञ्चाशत्** [सप्त](द्वा)**षष्टिभागा** एकं च **द्वाषष्टिभागं सप्तषष्टिधा छित्त्वा** तस्य सत्का**श्चत्वारिंशच्चूर्णिकाभागाः शेषाः**, तथाहि - तृतीया श्रावणमासभाविन्यावृत्तिः पूर्वप्रदर्शितक्रमापेक्षया पञ्चमी, तत-स्तत्स्थाने पञ्चको ध्रियते। स रूपोनः कार्य इति जातश्चतुष्कस्तेन प्राक्तनो ध्रुवराशिः ५७३ ३६/६२ ६/६७ गुण्यते, जातानि द्वाविंशतिशतानि (द्वि)नवत्यधिकानि मुहूर्त्तानां चतुश्चत्वारिंशं शतं मुहूर्त्तगतानां द्वाषष्टिभागानामेकस्य च द्वाषष्टिभागस्य चतुर्विंशतिः सप्तषष्टिभागाः २२९२।१४४।२४। तत एतेभ्यः षोडशभिर्मुहूर्त्तशतैरष्टा-त्रिंशदधिकैरष्टाचत्वारिंशता च द्वाषष्टिभागैर्मुहूर्त्तस्य द्वाषष्टिभागगतानां च सप्तषष्टि-भागानां द्वात्रिंशेन शतेन द्वौ पूर्णौ नक्षत्रपर्यायौ शुद्धौ, स्थितानि पश्चात् षट् शतानि चतुष्पञ्चाशदधिकानि मुहूर्त्तानां मुहूर्त्तगतानां च द्वाषष्टिभागानां चतुर्नवतिरेकस्य[3] च

---

१. .....तृतीयश्रावणमासभाविनी.....- I, T। २. विसाहाणं तेणं चेव अभिलावेणं तेरस मुहुत्ता.....मूले।
३. ....रेकस्य द्वाषष्टि....- I।

द्वाषष्टिभागस्य (षड्)विंशतिः सप्तषष्टिभागाः ६५४।९४।२६। तत एतेभ्यः पञ्चभिः शतैरेकोनपञ्चाशदधिकैर्मुहूर्त्तानामेकस्य च मुहूर्त्तस्य चतुर्विंशत्या द्वाषष्टिभागैरेकस्य च द्वाषष्टिभागस्य षट्षष्ट्या सप्तषष्टिभागैरभिजिदादीन्युत्तरफाल्गुनीपर्यन्तानि नक्षत्राणि शुद्धानि, स्थितं पश्चात् पञ्चोत्तरं (मुहूर्त्त)शतं मुहूर्त्तगतानां च द्वाषष्टिभागानामेकोनसप्ततिरेकस्य च द्वा[त्रिंशत](षष्टि)भागस्य सप्तविंशतिः सप्तषष्टिभागाः। तत्र द्वाषष्ट्या द्वाषष्टिभागैरेको मुहूर्त्तो लब्धः, स्थिताः पश्चात् सप्त द्वाषष्टिभागाः, लब्धश्च मुहूर्त्तो मुहूर्त्तराशौ प्रक्षिप्यते, जातं षडुत्तरं मुहूर्त्तशतं १०६ ७/६२ २७/६७। ततः पञ्चसप्तत्या मुहूर्त्तैः हस्तादीनि स्वातिपर्यन्तानि नक्षत्राणि शुद्धानि, स्थिताः शेषाः एकत्रिंशत् मुहूर्त्ताः। आगतं विशाखानक्षत्रस्य त्रयोदशमुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य चतुष्पञ्चाशति द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभा(गस्य चत्वारिंशति सप्तषष्टिभा)गेषु शेषेषु चन्द्रस्तृतीयां श्रावणमासभाविनीमावृत्तिं प्रवर्त्तयति। सम्प्रति सूर्यनक्षत्रविषयं प्रश्नसूत्रं निर्वचनसूत्रं चाह- '**तं समयं च ण**'मित्यादि सुगमम्।

अधुना चतुर्थावृत्तिविषयं प्रश्नसूत्रमाह-

**मू० ता एएसि णं पंचण्हं संवच्छराणं चउत्थिं वासिकिं आउट्टिं चंदे केणं णक्खत्तेणं० ? ता रेवतीहिं, रेवतीणं पणुवीसं मुहुत्ता बत्तीसं (बावट्ठि)भागा मुहुत्तस्स बावट्ठिभागं च सत्तट्ठिहा छेत्ता छव्वीसं च चुण्णिया०, तं समतं च णं सूरे केणं णक्खत्ते० ? ता पूसेणं, पूसस्स णं तं चेव।**

**टी०** '**ता एएसि ण**'मित्यादि सुगमम्। भगवानाह- '**ता रेवईहिं**' इत्यादि। रेवत्या युक्तश्चन्द्रश्चतुर्थीं श्रावणमासभाविनीमावृत्तिं प्रवर्त्तयति, तदानीं च **रेवती-नक्षत्रस्य** [१]**पञ्चविंशतिः मुहूर्त्ता** एकस्य च मुहूर्त्तस्य **द्वात्रिंशत् द्वाषष्टिभागा** एकं च **द्वाषष्टिभागं सप्तषष्टिधा छित्त्वा** तस्य सत्काः **षड्विंशतिः चूर्णिका भागाः**

१. पञ्चविंशतिमुहूर्त्ताः - G, K, T।

**शेषाः**, तथाहि प्रागुपदर्शितक्रमापेक्षया चतुर्थी श्रावणमासभाविन्यावृत्तिः सप्तमी। ततः सप्तको ध्रियते। स रूपोनः कार्य इति जातः षट्कः। तेन प्राक्तनो ध्रुवराशिः ५७३ ३६/६२ ६/६७ गुण्यते, जातानि चतुस्त्रिशत् शतानि अष्टात्रिंशदधिकानि ३,४३८ मुहूर्त्तानां, मुहूर्त्तगतानां च द्वाषष्टिभागानां द्वे शते षोडशोत्तरे २१६ एकस्य च द्वाषष्टिभागस्य षट्त्रिंशत्सप्तषष्टिभागाः ३६। तत एतेभ्यो द्वात्रिंशता शतैः षट्सप्तत्यधिकैर्मुहूर्त्तानां (मुहूर्त्तगतानां) च द्वाषष्टिभागानां षण्णवत्या द्वाषष्टिभाग-सत्कानां च सप्तषष्टिभागानां द्वाभ्यां (शताभ्यां) चतुःषष्टिसहिताभ्यां चत्वारो नक्षत्रपर्यायाः शुद्धाः, स्थितं पश्चादेकं (द्वाषष्ट्यधिकं मुहूर्त्तशतं) मुहूर्त्तगतानां च द्वाषष्टिभागानां षोडशोत्तरं शतमेकस्य च द्वाषष्टिभागस्य चत्वारिंशत् सप्तषष्टिभागाः १६२।११६।४०। तत एकोनषष्ट्यधिकेन मुहूर्त्तशतेन एकस्य च मुहूर्त्तस्य चतुर्विंश[ति](त्या) द्वाषष्टिभागैरेकस्य च द्वाषष्टिभागस्य षट्षष्ट्या सप्तषष्टिभागैः १५९।२४।६६ अभिजिदादीन्युत्तरभद्रपदापर्यन्तानि नक्षत्राणि भूयः शुद्धानि, स्थिताः पश्चात् त्रयो (मुहूर्त्ताः) मुहूर्त्तगतानां च द्वाषष्टिभागानामेकनवतिरेकस्य च द्वाषष्टि-भागस्य एकचत्वारिंशत्सप्तषष्टिभागाः, द्वाषष्ट्या च द्वाषष्टिभागैरेको मुहूर्त्तो लब्धः, स मुहूर्त्तराशौ प्रक्षिप्यते जाताश्चत्वारो मुहूर्त्ताः, एकस्य च मुहूर्त्तस्य एकोन[चत्वारिं]-(त्रिं)शत् द्वाषष्टिभागाः (एकस्य च द्वाषष्टिभागस्यैकचत्वारिंशत् सप्तषष्टिभागाः) ४।२९।४१। तत आगतं रेवतीनक्षत्रं पञ्चविंशतौ मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य द्वा[विं](त्रिं)शति द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्य षड्विंशतौ सप्तषष्टिभागेषु (शेषेसु) चतुर्थीं श्रावणमासभाविनीमावृत्तिं प्रवर्त्तयति। '**तं समयं च ण**'मित्यादि सूर्यनक्षत्रविषयं प्रश्नसूत्रं निर्वचनसूत्रं च प्राग्वद्भावनीयम्।

साम्प्रतं पञ्चमश्रावणमासभाविन्यावृत्तिविषयं प्रश्नसूत्रमाह -

**मू० ता एएसि णं पंचण्हं संवच्छराणं पंचमं वासिकिं आउट्टिं चंदे केणं ण० ? ता पुव्वाहिं फग्गुणीहिं, पुव्वाणं फग्गुणीणं बारस०**

**सीतालीसा० तेरसेव य चुण्णिया०। तं समतं च णं सूरे केणं ण०? ता पूसेणं पूसस्स णं एक्कूणवीसा तेतालिसा तेतीसं चेव चुण्णिया।**

टी० '**ता एएसि ण**'मित्यादि सुगमम्। भगवानाह - '**ता पुव्वाहिं फग्गुणीहिं**' इत्यादि। '**ता**' इति पूर्व्ववत्, **पूर्वाभ्यां फाल्गुनीभ्यां** युक्तश्चन्द्रः पञ्चमीं श्रावणमासभाविनीमावृत्तिं प्रवर्त्तयति। तदानीञ्च तस्य **पूर्वफाल्गुनीनक्षत्रस्य द्वादश मुहूर्त्ता** एकस्य च **मुहूर्त्तस्य सप्तचत्वारिंशद् द्वाषष्टिभागा** एकं च **द्वाषष्टिभागं सप्तषष्टिधा छित्त्वा** तस्य सत्का**स्त्रयोदश चूर्णिका भागाः शेषा**स्तथाहि - पञ्चमी श्रावणमासभाविन्यावृत्तिः प्रागुपदर्शितक्रमापेक्षया नवमी। ततस्तत्स्थाने नवको ध्रियते। स रूपोनः कार्य इति जाता अष्टौ। तैः प्रागुक्तो ध्रुवराशिः ५७३ ३६/६२ ६/६७ गुण्यते, जातानि पञ्चचत्वारिंशत् शतानि चतुरशीत्यधिकानि मुहूर्त्तानां मुहूर्त्तगतानां च द्वाषष्टिभागानां द्वे शते अष्टाशीत्यधिके एकस्य च द्वाषष्टिभागस्याष्टाचत्वारिंशत् सप्तषष्टिभागाः ४,५८४।२८८।४८। तत एतेभ्यश्चत्वा-रिंश[त्](ता) मुहूर्त्तशतैः पञ्चनवत्यधिकैर्मुहूर्त्तगतानां च द्वाषष्टिभागानां विंशत्यधिकेन शतेन एकस्य च द्वाषष्टिभागस्य सत्कानां सप्तषष्टिभागानां त्रिंशदधिकैस्त्रिभिः शतैः पञ्च नक्षत्रपर्यायाः शुद्धाः, स्थितानि पश्चात् मुहूर्त्तानां चत्वारि शतानि एकोननवत्य-धिकानि मुहूर्त्तगतानां च द्वाषष्टिभागानां शतं त्रिषष्ट्यधिकं एकस्य च द्वाषष्टिभागस्य त्रिपञ्चाशत् सप्तषष्टिभागाः ४८९।१६३।५३। तत एतेभ्यो भूयस्त्रिभिः शतैर्नवन-वत्यधिकैर्मुहूर्त्तानामेकस्य च मुहूर्त्तस्य चतुर्विंशत्या द्वाषष्टिभागैरेकस्य च द्वाषष्टिभागस्य षट्षष्ट्या सप्तषष्टिभागैरभिजिदादीनि पुनर्वसुपर्यन्तानि नक्षत्राणि शुद्धानि, स्थिता पश्चात् मुहूर्त्तानां नवतिर्मुहूर्त्तगतानां द्वाषष्टिभागानामष्टात्रिंशदधिकं शतं एकस्य च द्वाषष्टिभागस्य चतुष्पञ्चाशत् सप्तषष्टिभागाः ९०।१३८।५४। तत्र चतुर्विंशत्यधिकेन द्वाषष्टिभागशतेन द्वौ मुहूर्त्तौ लब्धौ, पश्चात् स्थिता द्वाषष्टिभागाश्चतुर्दश, लब्धौ च मुहूर्त्तौ मुहूर्त्तराशौ प्रक्षिप्येते, जाता मुहूर्त्तानां द्वानवतिः ९२।१४।५४। तत्र

प[र्यन्ता](श्च)सप्तत्या मुहूर्त्तैः पुष्यादीनि मघापर्यन्तानि नक्षत्राणि शुद्धानि, स्थिताः पश्चात् सप्तदश मुहूर्त्ताः १७।१४।५४, न चैतावता पूर्वफाल्गुनी शुध्यति। तत आगतं पूर्वफाल्गुनीनक्षत्रस्य द्वादशमुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य सप्तचत्वारिंशति द्वाषष्टिभागेषु एकस्य च द्वाषष्टिभागस्य त्रयोदशसु सप्तषष्टिभागेषु (शेषेषु) पञ्चमी श्रावणमासभाविन्यावृत्तिः प्रवर्त्तते। सूर्यनक्षत्रविषयं प्रश्नसूत्रं निर्वचनसूत्रं च प्राग्वद्भावनीयम्।

तदेवं चन्द्रनक्षत्रयोगविषये (सूर्यनक्षत्रयोगविषये) च पञ्चापि वार्षिकीरावृत्तिः प्रतिपाद्य सम्प्रति हैमन्तीः प्रतिपिपादयिषुस्तद्गतप्रथमावृत्तिविषयं प्रश्नसूत्रमाह-

**मू० ता एएसि णं पंचण्हं संवच्छराणं पढमं हेमंतिं आउट्टिं चंदे केण णक्खत्तेणं० ? ता हत्थेणं, हत्थस्स णं पंच मुहुत्ता पण्णासं च बावट्ठिभागा मुहुत्तस्स बावट्ठिभागं च सत्तट्ठिहा छेत्ता सट्ठिं चुण्णिया भागा सेसा, तं समतं च णं सूरे केणं ण०? ता उत्तराहिं आसाढाहिं उत्तराणं आसाढाणं चरिमसमए।**

**टी०** '**ता एएसि ण**'मित्यादि। '**ता**' इति पूर्ववत्, **(ए)तेषामनन्तरोदितानां पञ्चानां** चन्द्रादीनां **संवत्सराणां** मध्ये **प्रथमां हैमन्तीमावृत्तिं चन्द्रः केन नक्षत्रेण** (युनक्ति ? - केन नक्षत्रेण) सह योगमुपागतः सन् प्रवर्त्तयतीति ? भगवानाह- '**ता हत्थेण**'मित्यादि। '**ता**' इति पूर्ववत् **हस्तेन** हस्तनक्षत्रेण युक्तश्चन्द्रः प्रवर्त्तयति, तदानीं च हस्तनक्षत्रस्य **पञ्च मुहूर्त्ता** एकस्य च **मुहूर्त्तस्य पञ्चाशत् द्वाषष्टिभागा** एकं च **द्वाषष्टिभागं सप्तषष्टिधा छित्त्वा** तस्य सत्काः **षष्टिः चूर्ण्णिका भागाः** शेषाः, तथाहि - [1]हैमन्ती प्रथमावृत्तिः प्रागुक्तक्रमापेक्षया द्वितीया। ततस्तत्स्थाने द्विको ध्रियते। स रूपोनः कार्य इति जात एकस्तेन प्रागुक्तो ध्रुवराशिः ५७३।३६।६ गुण्यते, एकेन च गुणितं तदेव भवतीति, जातस्तावानेव ध्रुवराशिः। तत एतस्मात् पञ्चभिः शतैरेकोनपञ्चाशदधिकैः मुहूर्त्तानामेकस्य च मुहूर्त्तस्य चतुर्विंशत्या द्वाषष्टि-

---

१. हैमन्ती च - E।

भागैरेकस्य च द्वाषष्टिभागस्य षट्षष्ट्या सप्तषष्टिभागैरभिजिदादीनि उत्तरफाल्गुनी-पर्यन्तानि नक्षत्राणि शुद्धानि, स्थिताः पश्चात् चतुर्विंशति(र्मुहूर्त्ता एकस्य च) मुहूर्त्तस्य एकादश द्वाषष्टिभागा एकस्य च द्वाषष्टिभागस्य (सप्त) सप्तषष्टिभागाः २४।११।७। तत आगतं (हस्त)नक्षत्रं पञ्चमुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य पञ्चाशति द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्य षष्टौ सप्तषष्टिभागेषु शेषेषु प्रथमां हैमन्तीमावृत्तिं प्रवर्त्तयति। सूर्यनक्षत्रविषयं प्रश्नसूत्रमाह- '**तं समयं च ण**'मित्यादि। तस्मिंश्च समये सूर्यः केन नक्षत्रेण युक्तस्तां प्रथमां हैमन्तीमावृत्तिं युनक्ति प्रवर्त्तयति ? भगवानाह- '**ता उत्तराहिं**' इत्यादि। **उत्तराभ्यां आषाढाभ्यां** तदानीं चोत्तराषाढयोश्चरमसमयः सकल-मुत्तराषाढानक्षत्रमुपभुज्याभिजितो नक्षत्रस्य प्रथमसमये प्रथमां हैमन्तीमावृत्तिं सूर्यः प्रवर्त्तयतीति भावः, तथाहि - यदि दशभिरयनैः पञ्च सूर्यकृतान्नक्षत्रपर्यायान्लभामहे तत एकेनायनेन किं लभामहे ? राशित्रयस्थापना १०।५।१। अत्रान्त्येन राशिना एकलक्षणेन [1]मध्यस्य पञ्चकरूपस्य राशेर्गुणनम्, जाताः पञ्चैव। तेषां दशभिर्भागे हृते लब्धमेकमर्द्धं पर्यायस्य अर्द्धं च पर्यायस्य सप्तषष्टिभागरूपाणि नव शतानि पञ्चदशोत्तराणि ९१५। तत्र त्रयोविंशतिः सप्तषष्टिभागाः पाश्चात्येऽयने पुष्यस्य (गताः) [पञ्चाशत् द्वाषष्टि] शेषाश्चतुश्चत्वारिंशत्सप्तषष्टिभागाः स्थिताः। ते साम्प्रतमितो राशेः शोध्यन्ते, स्थितानि शेषाण्यष्टौ शतान्येकसप्तत्यधिकानि ८७१। तेषां सप्तषष्ट्या भागे हृते लब्धास्त्रयोदश पश्चान्न किमपि तिष्ठति, त्रयोदशभिश्चाश्लेषादीन्युत्तराषाढा-पर्यन्तानि नक्षत्राणि शुद्धानि। तत आगतमभिजितो नक्षत्रस्य प्रथमसमये माघमा[से](स)भाविन्यावृत्तिः प्रवर्त्तते। एवं सर्व्वा अपि माघमासभाविन्य आवृत्तयः सूर्यनक्षत्रयोगमधिकृत्य वेदितव्याः, उक्तञ्च- '**बाहिरओ पविसंतो आइच्चो अभिइजोगमुवगम्म। सव्वा आउट्टीओ करेइ सो माघमासम्मि ॥२६३॥**' **(जो.प.)**

---

१. मध्यमस्य - E।

द्वितीयहेमन्तावृत्तिविषयप्रश्नसूत्रमाह -

**मू० ता एएसि णं पंचण्हं संवच्छराणं दोच्चं [१]हेमंतीं आउट्टिं चंदे केणं ण० ? ता सतभिसताहिं, सतभिसताणं दो चेव० अट्ठावीसा० छत्तालीसं च चुण्णिता०। तं समयं च णं सूरे केणं ण०? ता उत्तराहिं आसाढाहिं, उत्तराणं आसाढाणं चरिमसमए।**

**टी०** '**ता एएसि ण**'मित्यादि सुगमम्। भगवानाह - '**ता सयभिसयाहिं**' इत्यादि। '**ता**' इति पूर्ववत्, **शतभिषजा** युक्तश्चन्द्रो द्वितीयां हैमन्तीमावृत्तिं प्रवर्त्तयति। तदानीञ्च **शतभिषजो** नक्षत्रस्य **द्वौ मुहूर्त्तावे**कस्य च **मुहूर्त्तस्याष्टाविंशतिर्द्वाषष्टिभागा** एकं च **द्वाषष्टिभागं सप्तषष्टिधा छित्त्वा** तस्य सत्काः **षट्चत्वारिंशत् चूर्णिका भागाः शेषाः**, तथाहि- प्रागुपदर्शितक्रमापेक्षया द्वितीया माघमासभाविन्यावृत्तिश्चतुर्थी। ततस्तस्याः स्थाने चतुष्को ध्रियते। स रूपोनः कार्य इति जातस्त्रिकः। तेन प्राक्तनो ध्रुवराशिः ५७३।३६।६ गुण्यते, जातानि सप्तदशशतान्येकोनविंशत्यधिकानि मुहूर्त्तानां मुहूर्त्तगतानां च द्वाषष्टिभागानामष्टोत्तरं शतं एकस्य च द्वाषष्टिभागस्याष्टादश सप्तषष्टिभागाः १,७१९।१०८।१८। तत एतेभ्यः षोडशभिः शतैरष्टात्रिंशदधिकैः मुहूर्त्तानामेकस्य च मुहूर्त्तस्याष्टाचत्वारिंशता द्वाषष्टिभागैरेकस्य च द्वाषष्टिभागस्य सम्बन्धिनां (सप्तषष्टिभागानां) द्वात्रिंशदधिकेन शतेन द्वौ [क्षे](नक्ष)त्रपर्यायौ शुद्धौ, स्थिताः पश्चादेकाशीतिः मुहूर्त्तानामेकस्य च मुहूर्त्तस्याष्टापञ्चाशत् द्वाषष्टिभागा एकस्य च द्वाषष्टिभागस्य [२]विंशतिः सप्तषष्टिभागाः ८१।५८।२०। ततो भूयो नवभिर्मुहूर्तैरेकस्य च मुहूर्त्तस्य चतुर्विंशत्या द्वाषष्टिभागैरेकस्य च द्वाषष्टि भागस्य षट्षष्ट्या सप्तषष्टिभागैरभिजिन्नक्षत्रं शुद्धम्, स्थिताः पश्चात् द्वासप्ततिर्मुहूर्त्ता एकस्य च मुहूर्त्तस्य त्रयस्त्रिंशत् द्वाषष्टिभागा एकस्य च द्वाषष्टिभागस्य एकविंशतिः सप्तषष्टिभागाः ७२।३३।२१। ततस्त्रिंशता मुहूर्त्तैः श्रवणः शुद्धस्त्रिंशता

---

१. हेमंतीयं - H। २. विंशतिसप्तषष्टिभागाः - K, M।

धनिष्ठा पश्चादवतिष्ठन्ते द्वादश मुहूर्त्ताः, [अश्लेषा](शतभिषक्) नक्षत्रं चार्द्धक्षेत्रम्। तत आगतं [अश्लेषा](शतभिषजो) नक्षत्रस्य द्वयोर्मुहूर्त्तयोरेकस्य च मुहूर्त्तस्याष्टाविंशतौ द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्य षट्चत्वारिंशति [1] सप्तषष्टिभागेषु शेषेसु द्वितीया हैमन्ती आवृत्तिः प्रवर्त्तते। सूर्यनक्षत्रयोगविषयं प्रश्नसूत्रं निर्वचनसूत्रं सुगमम्, प्रागेव भावितत्वात्।

अधुना तृती[या](य)माघमासभाविन्यावृत्तिविषयं प्रश्नसूत्रमाह -

**मू० ता एएसि णं पंचण्हं संवच्छराणं तच्चं हेमंतीं आउट्टिं चंदे केण० ? ता पूसेणं, पूसस्स णं एकूणवीस० तेयाला० तेत्तीसं चुण्णिया०। तं समयं च णं सूरे केणं ण० ? ता उत्तराहिं आसाढाहिं, उत्तराणं आसाढाणं चरिमसमए।**

**टी०** '**ता एएसि ण**'मित्यादि सुगमम्। भगवानाह - '**ता पूसेण**'मित्यादि। '**ता**' इति प्राग्वत्, **पुष्येण** युक्तश्चन्द्रः तृतीयां माघमासभाविनीमावृत्तिं प्रवर्त्तयति, तदानीं च **पुष्यस्य** एकोन[षष्टि](विंशति)र्मुहूर्त्ता एकस्य च मुहूर्त्तस्य त्रिचत्वारिंशत् द्वाषष्टिभा[गं](गा) एकं च द्वाषष्टिभागं सप्तषष्टिधा छित्त्वा तस्य सत्कास्त्रयस्त्रिशत् चूर्णिका भागाः शेषाः, तथाहि - प्रागुपदर्शितक्रमापेक्षया माघमासभाविन्यावृत्तिः षष्ठी। ततस्तस्याः स्थाने षट्को ध्रियते। स रूपोनः कार्य इति जातः पञ्चकः। तेन स प्राक्तनध्रुवराशिः ५७३। ३६/६२ । ६/६७ गुण्यते, जातान्यष्टाविं[2]शतिः शतानि पञ्चषष्ट्यधिकानि मुहूर्त्तानां मुहूर्त्तगतानां च द्वाषष्टिभागानामशीत्यधिकं शतमेकस्य च द्वाषष्टिभागस्य त्रिंशत् सप्तषष्टिभागाः २,८६५।१८०।३०। तत एतेभ्यः सप्तपञ्चाशदधिकैश्चतुर्विंशतिशतैर्मुहूर्त्तानामेक[स्य]मुहूर्त्तगतानाञ्च द्वाषष्टिभागानां द्विसप्तत्या एकस्य च द्वाषष्टिभागस्य सत्कानां सप्तषष्टिभागानामष्टानवत्यधिकेन शतेन २,४५७।७२।१९८ त्रयो नक्षत्रपर्यायाः शुद्धाः, स्थितानि पश्चात् चत्वारि मुहूर्त्तशतानि

१. षट्चत्वारिंशत्सप्तषष्टिभागेषु- K, T। २. .....विंशतिशतानि - K।

अष्टोत्तराणि मुहूर्त्तगतानां च द्वाषष्टिभागानां पञ्चोत्तरं शतमेकस्य च द्वाषष्टिभागस्य त्रयस्त्रिंशत्सप्तषष्टिभागाः ४०८।१०५।३३। तत एतेभ्यस्त्रिभिः शतैर्नवनवत्यधिकैर्मुहूर्त्तानामेकस्य च मुहूर्त्तस्य चतुर्विंशत्या द्वाषष्टिभागैरेकस्य च द्वाषष्टिभागस्य षट्षष्ट्या सप्तषष्टिभागैरभिजिदादीनि पुनर्वसुपर्यन्तानि नक्षत्राणि शुध्यन्ति, स्थिताः पश्चान्नव मुहूर्त्ता[नां] मुहूर्त्तगतानां च द्वाषष्टिभागानामशीतिरेकस्य च द्वाषष्टिभागस्य चतुस्त्रिंशत्सप्तषष्टिभागाः, द्वाषष्ट्या च द्वाषष्टिभागैरेको मुहूर्त्तो लब्धः। (स) मुहूर्त्तराशौ प्रक्षिप्यते, जाता दश मुहूर्त्ताः, शेषास्तिष्ठन्ति द्वाषष्टिभागा अष्टादश १०।१८।३४। तत आगतं पुष्यस्य एकोनविंशतौ मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य त्रिचत्वारिंशति द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्य त्रयस्त्रिंशति सप्तषष्टिभागेषु शेषेषु तृतीया माघमासभाविनी आवृत्तिः प्रवर्त्तते। सूर्यनक्षत्रयोगविषयं प्रश्नसूत्रं निर्वचनसूत्रं च सुगमम्।

चतुर्थ(माघ)मासभाविन्यावृत्तिविषयं प्रश्नसूत्रमाह -

**मू० ता एएसि णं पंचण्हं संवच्छराणं चउत्थिं हेमंतिं आउट्टिं चंदे केणं णक्खत्तेणं० ? ता मूलेणं, मूलस्स णं छच्चेवट्ठापण्णा० वीसं चेव चुण्णिया०। तं समतं च णं सूरे केणं णक्खत्तेणं० ? ता उत्तराहिं आसाढाहिं, उत्तराणं आसाढाणं चरिमसमए।**

**टी० 'ता एएसि ण'**मित्यादि सुगमम्। भगवानाह - **'ता मूलेण'**मित्यादि। **'ता'** इति प्राग्वत् **मूलेन** युक्तश्चन्द्रश्चतुर्थी हैमन्तीमावृत्तिं प्रवर्तयति, तदानीञ्च **मूलस्य** - मूलनक्षत्रस्य **षट् मुहूर्त्ता** ए[कै]कस्य च **मुहूर्त्तस्याष्टापञ्चाशत् द्वाषष्टिभागा** एकं च **द्वाषष्टिभागं सप्तषष्टिधा छित्त्वा** तस्य सत्का **विंशतिश्चूर्णिका भागाः शेषाः**, तथाहि चतुर्थी माघमासभाविन्यावृत्तिः पूर्वप्रदर्शितक्रमापेक्षयाऽष्टमी। तस्याः स्थानेऽष्टको ध्रियते। स रूपोनः कार्य इति जातः सप्तकस्तेन स प्राक्तनो ध्रुवराशिः ५७३। ३६/६२। ६/६७ गुण्यते, जातान्येकादशोत्तराणि चत्वारिंशत्

मुहूर्त्तशतानि मुहूर्त्तगतानां च द्वाषष्टिभागानां द्वे शते द्विपञ्चाशदधिके (एकस्य च) द्वाषष्टिभागस्य द्विचत्वारिंशत् सप्तषष्टिभागाः ४,०११।२५२।४२। तत एतेभ्यः षट्सप्तत्यधिकैः द्वा[द](त्रिं)श(त)शतैर्मुहूर्त्तगतानां च द्वाषष्टिभागानां षण्णवत्या द्वाषष्टिभागसत्कानां च सप्तषष्टिभागानां द्वाभ्यां शताभ्यां (चतुः)षष्ट्यधिकाभ्यां चत्वारो नक्षत्रपर्यायाः शुद्धाः, स्थितानि पश्चात् मुहूर्त्तानां सप्तशतानि पञ्चत्रिंशदधिकानि मुहूर्त्तगतानां [तु](च) द्वाषष्टिभागानां द्वापञ्चाशदधिकं शतं एकस्य च द्वाषष्टिभागस्य षट्चत्वारिंशत् सप्तषष्टिभागाः ७३५।१५२।४६। तत एतेभ्यो भूयः षड्भिर्मुहूर्त्तशतैरेकोनसप्तत्यधिकैरेकस्य च मुहूर्त्तस्य चतुर्विंशत्या द्वाषष्टिभागैरेकस्य च द्वाषष्टिभागस्य षट्षष्ट्या सप्तषष्टिभागैरभिजिदादीनि विशाखापर्यन्तानि नक्षत्राणि शुद्धानि, स्थिताः पश्चात् (षट्)षष्टिमुहूर्त्ता मुहूर्त्तगतानां च द्वाषष्टिभागानां सप्तविंशत्यधिकं शतं एकस्य च द्वाषष्टिभागस्य सप्तचत्वारिंशत् सप्तषष्टिभागाः, चतुर्विंशत्यधिकेन च द्वाषष्टिभागशतेन द्वौ मुहूर्त्तौ लब्धौ, तौ मुहूर्त्तराशौ प्रक्षि[प्य](प्ये)ते, जाता अष्टषष्टिमुहूर्त्ताः ६८।३।४७। ततः पञ्चचत्वारिंशत्मुहूर्त्तैरनुराधाज्येष्ठे शुद्धे, शेषाः स्थितास्त्रयोविंशतिर्मुहूर्त्ताः २३।३।४७। तत आगतं मूलस्य षण्मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्याष्टापञ्चाशति द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्य विंशतौ सप्तषष्टिभागेषु शेषेषु चतुर्थी माघमासभाविन्यावृत्तिः प्रवर्त्तते। सूर्यनक्षत्रयोगविषयं प्रश्नसूत्रं निर्वचनसूत्रं च सुगमम्।

पञ्चममाघमासभाविन्यावृत्तिविषयं प्रश्नसूत्रमाह -

**मू० ता एएसि णं पंचण्हं संवच्छराणं पंचमं हेमंतिं आउट्टिं चंदे केणं णक्खत्तेणं जोएति ? ता कत्तियाहिं, कत्तियाणं अट्ठारसमुहुत्ते छत्तीसं च बावट्ठिभागा मुहुत्तस्स बावट्ठिभागं च सत्तट्ठिहा छेत्ता छ चुण्णिया भागा सेसा। तं समतं च णं सूरे केणं णक्खत्तेणं जोएति ? ता उत्तराहिं आसाढाहिं, उत्तराणं आसाढाणं चरिमसमते।**

**टी०** '**ता एएसि ण**'मित्यादि सुगमम्। भगवानाह '**(ता) कत्तियाहिं**' इत्यादि।

'**ता**' इति पूर्ववत्, **कृत्तिकाभिर्युक्तश्चन्द्रः** पञ्चमीं हैमन्तीमावृत्तिं प्रवर्त्तयति, तदानीञ्च कृत्तिकानक्षत्रस्या**ष्टादशमूहूर्त्ता** एकस्य च **मुहूर्त्तस्य षट्त्रिंशद् द्वाषष्टिभागा** एकं च **द्वाषष्टिभागं सप्तषष्टिधा छित्त्वा** तस्य सत्काः **षट् चूर्णिकाभागाः शेषाः**, तथाहि- पञ्चमी माघमासभाविन्यावृत्तिः प्रागुपदर्शितक्रमापेक्षया दशमी। ततस्तस्याः स्थाने दशको ध्रियते। स रूपोनः कार्य इति जातो नवकः। तेन प्राक्तनो ध्रुवराशिः ५७३।३६।६ गुण्यते, जातान्येकपञ्चाशत् शतानि सप्तपञ्चाशदधिकानि मुहूर्त्तानां मुहूर्त्तगतानां च द्वाषष्टिभागानां त्रीणि शतानि चतुर्विंशत्यधिकानि एकस्य च द्वाषष्टिभागस्य चतुष्पञ्चाशत् सप्तषष्टिभागाः ५,१५७।३२४।५४। तत एतेभ्य एकोन-पञ्चाशन्मुहूर्त्तशतैः चतुर्दशाधिकैर्मुहूर्त्तगतानां च द्वाषष्टिभागानां चतुश्चत्वारिंशदधिकेन शतेन द्वाषष्टिभाग[श](ग)तानां च सप्तषष्टिभागानां त्रिभिः शतैः षण्णवत्यधिकैः षट् नक्षत्रपर्यायाः शुद्धाः, स्थिते पश्चात् मुहूर्त्तानां द्वे शते त्रिचत्वारिंशदधिके मुहूर्त्तगतानां च द्वाषष्टिभागानां (चतुःसप्तत्यधिकं शतं एकस्य च द्वाषष्टिभागस्य षष्टिः सप्तषष्टिभागाः २४३।१७४।६०।) तत एकोनषष्ट्यधिकेन मुहूर्त्तशतेन एकस्य च मुहूर्त्तस्य चतुर्विंशत्या द्वाषष्टिभागैरेकस्य च द्वाषष्टिभागस्य षट्षष्ट्या सप्तषष्टिभागैर-भिजिदादीन्युत्तरभद्रपदापर्यन्तानि नक्षत्राणि शुद्धानि, (स्थितानि) पश्चात् मुहूर्त्तानां चतुरशीतिर्मुहूर्त्तगतानां च द्वाषष्टिभागानां शतमेकोनपञ्चाशदधिकं एकस्य च द्वाषष्टि-भागस्य एकषष्टिः सप्तषष्टिभागाः ८४।१४९।६१। तत द्वाषष्टिभागानां चतुर्विंशत्य-धिकेन शतेन द्वौ मुहूर्त्तौ लब्धौ, पश्चात् स्थिताः पञ्च[पञ्चा](विं)शतिर्द्वाषष्टिभागाः, लब्धौ च मुहूर्त्तौ मुहूर्त्तराशौ प्रक्षिप्येते, जाताः षडशीतिर्मुहूर्त्तानाम्। ततः पञ्चसप्तत्या मुहूर्त्तानां रेवत्यश्वि[न्य](नी)भरण्यः शुद्धाः, स्थिताः पश्चादेकादशमुहूर्त्ताः शेषं तथैव ११।२५।६१। तत आगतं कृत्तिकानक्षत्रस्याष्टादशमुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य षट्त्रिंशति द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्य षट्(सु) सप्तषष्टिभागेषु शेषेषु पञ्चमी हैमन्ती आवृत्तिः (प्रवर्त्त)ते। सूर्यनक्षत्रयोगविषये प्रश्ननिर्वचनसूत्रे सुगमे।

तदेवमुक्ता दशापि नक्षत्रयोगमधिकृत्य सूर्यस्यावृत्तयः। सम्प्रति चन्द्रस्य वक्तव्यास्तत्र यस्मिन्नेव नक्षत्रे वर्त्तमानः सूर्यो दक्षिणा उत्तरा वा आवृत्तीः करोति, तस्मिन्नेव नक्षत्रे वर्त्तमानश्चन्द्रोऽपि दक्षिणा उत्तरा वा आवृत्तीः कुरुते, ततो या उत्तराभिमु[ख्य](खा) आवृत्तयो युगे चन्द्रस्य दृष्टास्ताः सर्वा अपि नियतमभिजिता नक्षत्रेण सह योगे द्रष्टव्या याश्च दक्षिणाभिमुखास्ताः पुष्येण चन्द्रयोगे, उक्तञ्च '**चंदस्स वि नायव्वा आउट्टीओ जुगम्मि जा [चि](दि)ट्ठा। अभिइए(णं) पुस्सेण य निययं नक्खत्तसे[सा](से)णं॥२६६॥**' **(जो.प.)** [आउ०](अत्र) '**नक्खत्तसेसेणं**' ति नक्षत्रार्द्धमासेन, शेषं सुगमम्। तत्राभिजित्युत्तरा[षाढा](भि)मुखा आवृत्तयो भाव्यन्ते। यदि चतुस्त्रिंशदधिकेनायनशतेन चन्द्रस्य सप्तषष्टिनक्षत्रपर्याया लभ्यन्ते, ततः प्रथमेऽयने किं लभ्यते ? राशित्रयस्थापना १३४।६७।१। अत्रान्त्येन राशिना [1]एकलक्षणेन [2]मध्यस्य राशेः सप्तषष्टिरूपस्य गुणनम्, जाता सप्तषष्टिरेव, एकेन गुणने तदेव भवतीति वचनात्, तस्याश्च सप्तष[ष्टि](ष्टे)श्चतुस्त्रिंशदधिकेन शतेन भागे हृते लब्धमर्द्धमेकं पर्यायस्य तस्मिंश्चार्द्धे नवशतानि पञ्चदशोत्तराणि सप्तषष्टिभागानां भवन्ति। तत्र त्रयोविंशतौ सप्तषष्टिभागेषु पुष्यस्य नक्षत्रस्य भुक्तेषु दक्षिणायनं चन्द्रः कृतवान्। ततः शेषाश्चतुश्चत्वारिंशत्सप्तषष्टिभागा अनन्तरोदितराशेः शोध्यन्ते, स्थितानि शेषाणि अष्टौ शतान्येकसप्तत्यधिकानि ८७१। तेषां सप्तषष्ट्या भागो ह्रियते, इह कानिचित् नक्षत्राणि अर्द्धक्षेत्राणि तानि सार्द्धत्रयस्त्रिंशत् सप्तषष्टिभागप्रमाणानि, कानिचित् समक्षेत्राणि तानि परिपूर्णसप्तषष्टिभागप्रमाणानि, कानिचित् द्व्यर्द्धक्षेत्राणि तान्यर्द्धभागाधिकशतसङ्ख्यसप्तषष्टिभागप्रमाणानि, गात्रं त्वधिकृत्य सप्तषष्ट्या शुध्यन्ति, ततः सप्तषष्ट्या भागहरणं, लब्धास्त्रयोदश, राशिश्चोपरितनो निर्लेपतः शुद्धः, तैश्च त्रयोदशभिरश्लेषादीनि उत्तराषाढापर्यन्तानि शुद्धानि। तत आगतं अभिजितो नक्षत्रस्य प्रथमसमये चन्द्र उत्तरायणं करोति।

---

१. एककलक्षणेन - C, E, T। २. मध्यमस्य - C, E, T।

एवं सर्वाण्यपि चन्द्रस्योत्तरायणानि वेदितव्यानि, उक्तञ्च **'पन्नरसेव मुहुत्ते जोइत्ता उत्तरासाढाओ। [1]एक्कं च अहोरत्तं पविसइ अब्भिंतरे चंदो॥२६७॥'** (जो.प.) अधुना पुष्ये दक्षिणावृत्तयो भाव्यन्ते - यदि चतुस्त्रिंशदधिकेनायनशतेन सप्तषष्टिश्चन्द्रस्य पर्याया लभ्यन्ते। तत एकेनायनेन किं लभामहे ? राशित्रयस्थापना १३४।६७।१। अत्रान्त्येन राशिना एकलक्षणेन मध्यरा[शि](शेः) सप्तषष्टिरूपस्य गुणनम्, जाताः सप्तषष्टिरेव। तस्याश्चतुस्त्रिंशेन शतेन भागहरणं, लब्धमेकमर्द्धपर्यायस्य, तच्च सप्तषष्टिभागरूपाणि नवशतानि पञ्चदशोत्तराणि ९१५। तत एकविंशतिरभिजितः सम्बन्धिनः सप्तषष्टिभागाः शोध्यन्ते, स्थितानि पश्चादष्टौ शतानि चतुर्नवत्यधिकानि ८९४। तेषां सप्तषष्ट्या भागो ह्रियते लब्धास्त्रयोदश, तैश्च त्रयोदशभिः पुनर्वस्वन्तानि नक्षत्राणि शुद्धानि, शेषास्तिष्ठन्ति त्रयोविंशतिः। एते च किल सप्तषष्टिभागा अहोरात्रस्य। ततो मुहूर्त्तकरणार्थं त्रिंशता गुण्यन्ते, जातानि षट् शतानि नवत्यधिकानि ६९०। तेषां सप्तषष्ट्या भागे हृते लब्धा दश मुहूर्त्ताः शेषास्तिष्ठन्ति (विंशतिः) सप्तषष्टिभागास्तत इदमागतं पुनर्वसुनक्षत्रे सर्वात्मना भुक्ते पुष्यस्य च दशसु मुहुर्त्तेष्वेकस्य च मुहूर्त्तस्य विंशतौ सप्तषष्टिभागेषु युक्तेषु सर्वाभ्यन्तरात् मण्डलाद्बहिर्निष्क्रामति चन्द्रः। एवं सर्वाण्यपि दक्षिणायनानि भावनीयानि, उक्तञ्च **'दस य मुहुत्ते सगले मुहुत्तभागे य वीसई चेव। पुस्सविसयमइगओ बहिया अभिनिक्खमइ चंदो॥२६८॥'** (जो.प.)

तदेवमुक्ता नक्षत्रयोगमधिकृत्य चन्द्रस्यावृत्तयः। सम्प्रति योगमेव सामान्यतः प्ररूपयति -

**मू० तत्थ खलु इमे दसविहे जोए पण्णत्ते, तं जहा - वसहाणु(जो)ते वेणुयाणु(जो)ते मंचे मंचातिमंचे छत्ते छत्तातिछत्ते जुगणद्धे [2]घणे पीणिते मंडूकप्पुए णामं दसमे।**

---

१. इक्कं - E, T। २. घणसंमद्दे - S।

**टी०** '**तत्थ खलु**' इत्यादि। **तत्र** युगे **खल्वयं** वक्ष्यमाणो **दशविधो योगः प्रज्ञप्तस्तद्यथा - वृषभानुजातः**, (अत्र अनुजात)शब्दः सदृशवचनो, वृषभस्यानुजातः (सदृशो वृषभानुजातः) वृषभाकारेण चन्द्रसूर्यनक्षत्राणि यस्मिन्योगेऽवतिष्ठन्ते स वृषभानुजातः इति भावना। एवं सर्वत्रापि भावयितव्यम्। वेणुर्वंशस्तदनुजातः तत्सदृशो **वेणुकानुजातो**, **(मञ्चो-)**मञ्चसदृशः, मञ्चात् व्यवहारप्रसिद्धात् द्वित्रादिभूमिकाभावतो अतिशायी मञ्चो मञ्चातिमञ्चः तत्सदृशो योगोऽपि **मञ्चातिमञ्चः**, छत्रं प्रसिद्धं तदाकारो (योगो)ऽपि **छत्रम्**, छत्रा[ति](त्) सामान्यरूपात् उपर्यन्यच्छत्रभावतोऽतिशायि छत्रं छत्रातिछत्रम्, तदाकारो योगोऽपि **छत्रातिछत्रम्**, युगमिव न[द्धा](द्धो) **युगनद्धः**, यथा युगं वृषस्कन्धयोरारोपितं वर्त्तते तद्वत् यो योगः प्रतिभा[सितयुगेन ब]ति स युगनद्ध इत्युच्यते, **घनः** सम्मर्दः यत्र चन्द्रः सूर्यो वा ग्रहस्य नक्षत्रस्य वा मध्ये गच्छति, **प्रीणितः** - उपचयं नीतः (यः) प्रथमतश्चन्द्रमसः सूर्यस्य वा एकतरस्य ग्र[ह](हे)ण नक्षत्रेण वा एकतरेण जातस्तदनन्तरं द्वितीयेन सूर्यादिना सह उपचयं गतः स प्रीणित इत्यर्थः, **मण्डूकप्लुतो दशमः**, तत्र मण्डूकप्लुत्या यो [जि](जा)तो योगः स मण्डूकप्लुतो योगः, स [र्व](च) ग्रहेण सह वेदितव्योऽन्यस्य मण्डूकप्लुतिना गमनासम्भवात्, उक्तञ्च - '**चन्द्रसूर्यनक्षत्राणि प्रतिनियतगतीनि ग्रहास्त्वनियतगतयः।**' (    ) इति। तदित्थं यथावबोधं दशानामपि योगानां स्वरूपमात्रभावना कृता यथासम्प्रदायं त्वन्यथा वा वाच्याः।

तत्र युगे छत्रातिछत्रवर्ज्जाः शेषा नवापि योगाः प्रायो बहुशो बहुषु च देशेषु भवन्ति छत्रातिछत्रयोगस्तु कदाचित् कस्मिंश्चिदेव देशे। ततस्तद्विषयं प्रश्नसूत्रमाह -

**मू० ता एएसि णं पंचण्हं संवच्छराणं छत्तातिछत्तं जोगं चंदे कंसि देसंसि जोएइ ? ता जंबुद्दीवस्स २ पातिणपडिणात[त]-(ताए) उदीणदाहिणाययाए जीवाए मंडलं चउव्वीसेणं सतेणं छेत्ता दाहिणपुरच्छिमिल्लंसि चउभागमंडलंसि सत्तावीसं भागे**

**[१]उवाइणावेत्ता अट्ठावीसतिभागं वीसहा छेत्ता अट्ठारसभागे उवाइणावेत्ता तिहिं भागेहिं दोहि य कलाहिं [२]दाहिणपच्चच्छिमं चउभागमंडलमसंपत्ते [३]इत्थ णं से चंदे छत्तातिछत्तं जोगं जोएति, उप्पिं चंदे, [४]मज्झे णक्खत्ते, हेट्ठा आदिच्चे, तं समतं च णं चंदे केणं णक्खत्तेणं जोएति ? ता चित्ताहिं, चित्ताणं चरमसमए।**

**बारसमं पाहुडं समत्तं १२।**

टी० '**ता एएसि ण**'मित्यादि। '**ता**' इति पूर्ववत्, **एतेषामनन्तरोदितानां** (**पञ्चानां**) **संवत्सराणां** मध्ये **छत्रातिछत्रं योगं चन्द्रः कस्मिन्देशे युनक्ति** - करोति ? भगवानाह - '**ता**' इत्यादि। '**ता**' इति पूर्ववत्, **जम्बूद्वीपस्योपरि प्राचीनापाचीनायतया उदग्दक्षिणायतया** च, अत्र चशब्दो अनु[ज्ञा](क्त)तः (द्रष्टव्यः) यदि वा भिन्नविभक्तिनिर्देशादेव समुच्चयो लब्ध इति चशब[दे](दो) नोक्तः, यथा '**अहरहर्नयमानो गामश्वं पुरुषं पशुं[श्]। वैवस्वतो न तृप्यति सुराया इव दुर्मदी॥**'(      ) इत्यत्र, चादयो हि पदान्तराभिहितमेवार्थं स्पष्टयन्ति न पुनः स्वातन्त्र्येणैकमप्यर्थमभिदधते इति निर्णीतमेतत् [५]**स्वोपज्ञशब्दानुशासने जीवया** प्रत्यञ्चया दवरिकया इत्यर्थः, **मण्डलं चतुर्विंशत्यधिकेन शतेन** (**छित्त्वा**) विभज्य, इयमत्र भावना - एकया दवरिकया बुद्ध्या कल्पितया पूर्वापरायतया एकया च दक्षिणोत्तरायतया मण्डलं समकालं विभज्यते विभक्तश्च सत् चतुर्भागतया जातम्, तद्यथा - एको भाग उत्तरपूर्वस्यामेको दक्षिणपूर्वस्यामे(को दक्षिणापरस्यामे)-कोऽपरोत्तरस्यामिति तत्र **दक्षिणपौरस्त्ये** - दक्षिणपू[र्व](र्वे) **चतुर्भा[गे](ग)मण्डले** - च[उ]तुःभागमात्रे मण्डले मण्डलचतुर्भाग इत्यर्थः, एकत्रिंशद्भागप्रमाणे **सप्तविंशतिभागानुपादाय** गृहीत्वा आक्रम्य इत्यर्थः, **अष्टाविंशतितमं** च **भागं**

---

१. उवचिणावेत्ता - U। २. 'दाहिणपुरच्छिमिल्लं' इति मुद्रितसूर्यप्रज्ञप्तौ पाठः, स तु न समीचीनो भाति।
३. एत्थ - U। ४. णक्खत्ते मज्झे - U। ५. स्वोपन्यस्त... - H।

**विंशतिधा छित्त्वा** तत्सत्कान्**भागान् अष्टादश**सङ्ख्या**नुपादाया**क्रम्य **शेषैस्त्रिभिरे**कत्रिंशत्सत्कै**र्भागैर्द्वाभ्यां च कलाभ्यामे**कस्य[1] एकत्रिंशत्सत्कस्य भागस्य सत्काभ्यां द्वाभ्यां विंशतितमाभ्यां भागाभ्यां **दक्षिणपश्चि[मभागं](मं) चतुर्भागमण्डलं** (मण्डल)चतुर्भागम**सम्प्राप्तो**ऽस्मिन्प्रदेशे **(स) चन्द्रः** छत्रातिछत्ररूपं **योगं युनक्ति** - करोति। एवमेव च [2]**तद्यथे**त्यादिना भावयति - **उपरि चन्द्रो मध्ये नक्षत्रं अधस्ताच्चादित्य** इति। इह मध्ये नक्षत्रमित्युक्तं ततो नक्षत्रविशेषप्रतिपत्त्यर्थं प्रश्नं करोति- '**तं समयं च ण**'मित्यादि। **तस्मिन्**[चन्द्र]**समये चन्द्रः केन नक्षत्रेण युनक्ति** - योगं करोति ? भगवानाह - '**ता**' इत्यादि। '**ता**' इति पूर्ववत्, तस्मिन्समये **चित्रया** सह योगं करोति। तदानीं च **चित्रायाः चरमसमयः**।

इति श्रीमलयगिरिविरचितायां चन्द्रप्रज्ञप्तिटीकायां द्वादशं प्राभृतं समाप्तम्।

* * * * *

*वशं मनो यस्य समाहितं स्यात्,*
*किं तस्य कार्यं नियमैर्यमैश्च ?।*
*हतं मनो यस्य च दुर्विकल्पैः,*
*किं तस्य कार्यं नियमैर्यमैश्च ?।।*
*यदि नामाऽप्रियं दुःखं, सुखं च यदि वा प्रियम्।*
*ततः कुरुत सद्धर्मं, जिनानां जितजन्मनाम्।।*

---

१. ....कस्य च एक.... - J। २. मूले 'तं जहा' इति पाठो नास्ति।

## त्रयोदशं प्राभृतम्

तदेवमुक्तं द्वादशं प्राभृतम्। सम्प्रति त्रयोदशमारभ्यते। तस्य चायमर्थाधिकारो - यथा चन्द्रमसो वृद्ध्यपवृद्धी वक्त[व्यमि](व्ये इ)ति। ततस्तद्विषयं प्रश्नसूत्रमाह-

**मू० ता कहं ते चंदमसो वड्ढोवड्ढी आहिताति वदेज्जा?**

**टी०** '**ता कहं ते**' इत्यादि। '**ता**' इति पूर्ववत्, **कथं**-केन प्रकारेण **त्वया** भगवन् ! **चन्द्रमसो वृद्ध्यपवृद्धी आख्याते इति वदेत्** ? किमुक्तं भवति ? कियन्तं कालं यावच्चन्द्रमसो वृद्धिः कियन्तं कालं यावदपवृद्धिस्त्वया भगवन् ! आख्याता इति वदेत् ?

एवमुक्ते भगवानाह -

**मू० ता अट्ठपंचासीते मुहुत्तसते तीसं च बावट्ठिभागे मुहुत्तस्स आहिताति वदेज्जा। ता दोसिणापक्खातो अंधकारपक्खं अयमाणे चंदे चत्तारि बाताले मुहुत्तसते छत्तालीसं च बावट्ठिभागे मुहुत्तस्स जाइं चंदे रज्जति, तं० पढमाते पढमं [1] भागं बितियाए बितियं भागं जाव पण्णरसीए पण्णरसमं भागं, चरिमे समते चंदे रत्ते भवति, अवसेसे समते चंदे रत्ते य विरत्ते (य) भवति, [अ](इ)यण्णं अमाव-[सं](सा)। एत्थ णं पढमे पव्वे अमावसा। ता अंधकारपक्खातो णं दोसिणापक्खं अयमाणे चंदे चत्तारि बायाले मुहुत्तसए छायालीसं च बावट्ठिभागे मुहुत्तस्स जाइं चंदे विरज्जइ, तं० पढमाए पढमं भागं जाव पण्णरसिए पण्णरसमं भागं चरिमे समते चंदे विरत्ते भवति, अवसेसे समये चंदे रत्ते य विरत्ते य भवति, [अ](इ)यण्णं पुण्ण-मासिणी, एत्थ णं दोच्चे पव्वे पुण्णमासिणी।**

**टी०** '**(ता) अट्ठे**'त्यादि। '**ता**' इति पूर्ववत्, **अष्टौ मुहूर्त्तशतानि**

---

१. भागं जाव पण्णरसीए - U।

पञ्चाशीत्यधिकानि एकस्य च **मुहूर्त्तस्य त्रिंशतं द्वाषष्टिभागान्** यावत् वृद्ध्यपवृद्धी **समुदायेनाख्याते इति वदेत्**। तथाहि- एकस्य चन्द्रमासस्य मध्ये एकस्मिन्पक्षे चन्द्र[मास](मसो) वृद्धिरेकस्मिँश्चापवृद्धिः। चन्द्रमासस्य परिमाणमेकोनत्रिंशत् रात्रिन्दिवानि एकस्य च [1]रात्रिन्दिवस्य द्वात्रिंशत् द्वाषष्टिभागा, रात्रिन्दिवं च त्रिंशत्मुहूर्त्तकरणार्थमेकोनत्रिंशत् त्रिंशता गुण्यते, जातान्यष्टौ शतानि सप्तत्यधिकानि ८७० मुहूर्त्तानां येऽपि च द्वाषष्टिभागा रात्रिन्दिवस्य तेऽपि मुहूर्त्तसत्कभागकरणार्थं त्रिंशता गुण्यन्ते जातानि नव शतानि षष्ट्यधिकानि ९६०, तेषां द्वाषष्ट्या भागो ह्रियते, लब्धाः पञ्चदश मुहूर्त्ताः १५, ते मुहूर्त्तराशौ प्रक्षिप्यन्ते, जातानि मुहूर्त्तानामष्टौ शतानि पञ्चाशीत्यधिकानि ८८५; शेषाश्चोद्धरन्ति त्रिंशत् द्वाषष्टिभागा मुहूर्त्तस्य। एतदेव प्रतिविशेषावबोधार्थं वैवि[त्र्येण](क्त्येन) स्पष्टयति- '**ता** [2]**दोसिणाओ**' [मि](इ)त्यादि। '**ता**' इति पूर्ववत्, ज्योत्स्नाप्रधानः पक्षो (ज्योत्स्ना)पक्षः शुक्लपक्ष इत्यर्थः तस्मात् **अन्धकारपक्षमयमानो** - गच्छन् **चन्द्रः चत्वारि मुहूर्त्तशतानि** द्विचत्वारिंशदधिकानि **षट्चत्वारिंशतं च द्वाषष्टिभागान् मुहूर्त्तस्य** यावदपवृद्धिं गच्छतीति वाक्यशेषः, **यानि** यथोक्तसङ्ख्यानि मुहूर्त्तशतानि यावत् **चन्द्रो** राहुविमानप्रभया **रज्यते**। कथं रज्यते (इ)ति तमेव रागप्रकारं **तद्यथे**त्यादिना प्रकटयति - **प्रथमायां** प्रतिपल्लक्षणायां तिथौ परिसमाप्नुवत्यां **प्रथमं** - परिपूर्णं पञ्चदशभागं यावत् रज्यते, **द्वितीयायां** परिसमाप्नुवत्यां तिथौ परिपूर्णं **द्वितीयं** पञ्चदशभागं यावत्, (एवं **यावत्**) **पञ्चदश्यां** तिथौ परिसमाप्नुवत्यां परिपूर्णं (**पञ्चदशं**) पञ्चदशभागं यावत्, तस्याश्च पञ्चदश्याः तिथेः **चरमसमये चन्द्रः** सर्वात्मना राहुविमानप्रभया **रक्तो भवति**, तिरोहितो भवतीति तात्पर्यार्थः, यस्तु षोडशो भागो द्वाषष्टिभागद्वयात्मकोऽनावृतस्तिष्ठति स स्तोकत्वाददृश्यत्वाच्च न गण्यते। '**अवसेसे**'त्यादि। पञ्चदश्यास्तिथेश्चरमसमयं मुक्त्वा शेषेषु सर्वेष्वपि समयेषु

---

१. रात्रिन्दिवसस्य - N। २. मूले तु 'दोसिणापक्खातो'इति पाठः।

**चन्द्रो रक्तो भवति विरक्तश्च**, कियानंशस्तस्य राहुणा आवृतो भवति कियांश्चानावृत इति भावः। अन्धकारपक्षवक्तव्यतोपसंहारमाह- **'इय'**मन्धकारपक्षे पञ्चदशी तिथिः **'ण'**मिति वाक्यालङ्कारे**ऽमावास्या**- अमावास्याना(म्नी), [त](अ)त्र च युगे **प्रथमं पर्व अमावास्या**। इह मुख्यवृत्त्या पर्वशब्दस्याभिधेयममावास्या पौर्णमासी च, उपचारात् पक्षे पर्वशब्दस्य प्रवृत्तिः, तत उक्तं **'इत्थ[1] णं पढमे पव्वे अमावासे'** (इ)ति। अथ कथं चत्वारि मुहूर्त्तशतानि (द्वि)चत्वारिंशदधिकानि षट्चत्वारिंशच्च द्वाषष्टिभागा मुहूर्त्तस्य ? उच्यते, इह शुक्लपक्षः कृष्णपक्षो वा चन्द्रमासस्यार्द्धम्, ततः पक्षस्य प्रमाणं चतुर्द्दश रात्रिन्दि[वस्य](वं) सप्तचत्वारिंशत् द्वाषष्टिभागाः। रात्रिन्दिवस्य परिमाणं त्रिंशत् मुहूर्त्ता इति चतुर्द्दश त्रिंशता गुण्यन्ते, जातानि मुहूर्त्तानां चत्वारि शतानि विंशत्यधिकानि ४२०। येऽपि च सप्तचत्वारिंशत् द्वाषष्टिभागा रात्रिन्दिवस्य तेऽपि मुहूर्त्तभागकरणार्थं त्रिंशता गुण्यन्ते, जातानि चतुर्द्दश शतानि [पञ्च]दशोत्तराणि १,४१०। तेषां द्वाषष्ट्या भागो ह्रियते, लब्धा द्वाविंशतिमुहूर्त्तास्ते मुहूर्त्तराशौ प्रक्षिप्यन्ते, जातानि मुहूर्त्तानां चत्वारि शतानि द्वाचत्वारिंशदधिकानि ४४२, शेषास्तिष्ठन्ति षट्चत्वारिंशत् द्वाषष्टिभागा मुहूर्त्तस्य ४६। तदेवं यावन्तं कालं चन्द्रमसोऽपवृद्धिः तावत्कालप्रतिपादनं कृतम्। (अथ यावन्तं कालं) वृद्धिस्तावन्तमभिधित्सुराह - **'अंधकारपक्खातो ण'**मित्यादि। **'ता'** इति पूर्ववत्, **अन्धकारपक्षात् 'ण'**मिति वाक्यालङ्कारे **ज्योत्स्नापक्षं** शुक्लपक्ष**मयमानश्चन्द्रश्चत्वारि द्विचत्वारिंशदधिकानि मुहूर्त्तशनानि षट्चत्वारिंश(तं च) द्वाषष्टिभागा(न्) मुहूर्त्तस्य** यावत् वृद्धिमुपागच्छति इति वाक्यशेषः। **यानि** - यथोक्तसङ्ख्यानि मुहूर्त्तशतानि याव**च्चन्द्रः** (शनैः) शनै**र्विरज्यते** - राहु[र्वि](वि)मानेनाऽनावृतो भवतीति। विरागप्रकारमेवाह - **'तं जहे'**त्यादि। **तद्यथे**[त्यादि](ति) विरागप्रकारोपद[र्श्यते](र्शने) **प्रथमायां** प्रतिपल्लक्षणायां तिथौ **प्रथमं** पञ्चदशभागं

---

१. मूले तु 'एत्थ' इति पाठः।

यावत् चन्द्रो विरज्यते, [तृ](द्वि)तीयायां द्वितीयं पञ्चदशभागं यावत्, (एवं) **पञ्चदश्यां पञ्चदशं भागं** (यावत्), तस्याश्च पञ्चदश्यास्तिथेः पौर्ण्णमासीरूपाया-**श्चरमसमये चन्द्रो विरक्तो भवति** सर्वात्मना राहुविमानेनानावृतो भवतीति भावः। तं च पञ्चदश्याश्चरमसमयं मुक्त्वा शुक्लपक्षप्रथमसमयादारभ्य[ते] शेषेषु समयेषु **चन्द्रो रक्तश्च भवति विरक्तश्च** (देशतो रक्तो भवति) देशतो विरक्तश्चेति भावः, मुहूर्त्त-सङ्ख्याभावना च प्राग्वत् कर्त्तव्या। शुक्लपक्षवक्तव्यतोपसंहारमाह -'**इयण्ण**'-मित्यादि। **इयम**नन्तरोदिता पञ्चदशी तिथिः **पौर्ण्णमासी**नामा। **अत्र** च युगे '**ण**'मिति पूर्ववत् **द्वितीयं पर्व पौर्ण्णमासी**।

अथैवंरूपा युगे कियन्त्योऽमावास्याः कियन्त्यश्च पौर्ण्णमास्य इति [युगे] तद्गतसर्वसङ्ख्यामाह-

**मू० तत्थ खलु इमातो बावट्ठिं पुण्णिमातो बावट्ठिं अमावासातो पण्णत्ताओ, बावट्ठिं एए कसिणा रागा बावट्ठिं एए कसिणा विरागा, एए चउव्वीसे पव्वसए, एए चउव्वीसे कसिणे रागविरागसए, जावतिता णं पंचण्हं संवच्छराणं समता एगेणं चउव्वीसेणं सतेणं ऊणगा एवतिता णं परित्ता असंखेज्जा देसरागविरागस(म)ता भवंति ति मक्खाता।**

**टी०** '**तत्थ खलु**' इत्यादि। **तत्र** युगे **खल्विमा** एवंस्वरूपा **द्वाषष्टिः पौर्ण्णमास्यो द्वाषष्टिश्चामावास्याः प्रज्ञप्ताः**। तथा युगे चन्द्रमस **एते**ऽनन्तरो-दितस्वरूपाः **कृत्स्नाः** परिपूर्ण्णा **रागा द्वाषष्टिर**मावास्यानां युगे द्वाषष्टिसङ्ख्या-प्रमाणत्वात्, तास्वेव चन्द्रमसः परिपूर्ण्णरागसम्भवात्, **एते** अनन्तरोदितस्वरूपा युगे चन्द्रमसः **कृत्स्ना विरागाः** सर्वात्मना रागाभावा **द्वाषष्टिः**, युगे पौर्ण्णमासीनां द्वाषष्टिसङ्ख्यात्मकत्वात्तास्वेव चन्द्रमसः परिपूर्ण्णविरागसम्भवात्। तथा युगे सर्व-सङ्ख्यया एकं **चतुर्विंशत्यधिकं पर्वशतं** अमावास्यापौर्ण्णमासीनामेव पर्वशब्द-

वाच्यत्वात् तासां च पृथक् पृथक् द्वाषष्टिसङ्ख्यानां एकत्र मीलने चतुर्विंशत्यधिकशतत्वात्, एवमेव युगमध्ये सर्वसङ्कलनया **चतुर्विंशत्यधिकं कृत्स्नं *रागविरागशतम्।*** ‘***जा[वेय](वइया) ण***’*मित्यादि।* ***यावन्तः पञ्चानां*** चन्द्र-चन्द्राऽभिवर्द्धितचन्द्राभिवर्द्धितरूपाणां (**संवत्सराणां**) **समया एकेन चतुर्विंशत्यधिकेन समयशतेन** (**ऊना**) **एतावन्तः परिताः** परिमिता **असङ्ख्याता देशरागविरागसमयाः**, एतेषु सर्वेष्वपि चन्द्रमसो देशतो रागविरागभावात्, यत्तु चतुर्विंशत्यधिकं समयशतं तत्र द्वाषष्टिसमयेषु कृत्स्नो रागो द्वाष[ष्टि](ष्टौ) च समयेषु कृत्स्नो विरागस्तेन तद्वर्जन**मित्याख्यातं** मयेति गम्यते। भगवद्वचनमेतत्, ततः सम्यक् श्रद्धेयम्।

सम्प्रति कियत्सु मुहूर्त्तेषु गतेषु अमावास्यातो अनन्त[रराग](रं पौर्ण्णमासी कियत्सु मुहूर्त्तेषु गतेषु) पौर्ण्णमास्या अनन्तरममावास्या इत्यादि निरूपयति-

**मू० ता अमावासातो णं पुण्णिमासिणी चत्तारि बाताले मुहुत्तसते छातालीसं च बावट्ठिभागे मुहुत्तस्स आहितात्ति वदेज्जा। ता अमावासाओ णं अमावासा अट्ठ पंचासीते मुहुत्तसते तीसं च बावट्ठिभागे मुहुत्तस्स आहिता ति वदेज्जा। ता पुण्णिमासिणीतो णं अमावासं चत्तारि बाताले मुहुत्तसते तं चेव। ता पुण्णमासिणीतो णं पुण्णमासिणी अट्ठ पंचासीते मुहुत्तसते तीसं च बावट्ठिभागे मुहुत्तस्स आहिता। एस णं एवतिते चंदमासे। एस णं एवतिते सगले जुगे।**

**टी०** ‘**ता अमावासातो ण**’मित्यादि सुगमम्। नवरं अमावास्याया अनन्तरं चन्द्रमासस्यार्द्धेन पौर्ण्णमासी पौर्ण्णमास्या अनन्तरमर्द्धमासेन चन्द्रमासस्यामावास्या, अमावास्यायाश्चामावास्या परिपूर्ण्णेन चन्द्रमासेन, पौर्ण्णमास्या अपि पौर्ण्णमासी परिपूर्ण्णेन चन्द्रमासे[न](नेति) भवति यथोक्ता मुहूर्त्तसङ्ख्या। उपसंहारमाह - ‘**एस**

**ण**'मित्यादि। **एष** अष्टौ मुहूर्त्तशतानि पञ्चाशीत्यधिकानि [द्वा]त्रिंशच्च द्वाषष्टिभागा मुहूर्त्तस्येति **(ए)तावान्** एतावत्प्रमाणश्चन्द्र**मासः**। **(ए)त[त](त्)** एतावत्प्रमाणं **शकलं** खण्डरूपं **युगं** चन्द्रमासप्र[ति]मितं युगं [स](श)कलमेतदित्यर्थः।

सम्प्रति चन्द्रो यावन्ति मण्डलानि चन्द्रार्द्धमासेन चरति तन्निरूपणार्थं प्रश्नसूत्रमाह-

**मू० ता चंदेणं (अद्ध)मासेणं चंदे कति मंडलाइं चरति ? (ता) चउदस सचउभागाइं मंडलाइं चरइ एगं चउवीससतभागं मंडलस्स। ता आइच्चेणं (अद्ध)मासेणं चंदे कति मंडलाइं चरति ? ता सोलसमंडलाइं चरति। ता सोलसमंडलचारी तदा अवराइं खलु दुवे अट्ठगाइं जाइं चंदे केणइ असामण्णाइं सयमेव पविसित्ता २ चारं चरति।**

**टी० 'ता चंदे(णं) अद्धमासेण'**मित्यादि। **'ता'** इति पूर्ववत्, [च]**(चा)न्द्रेण अर्द्धमासेन** प्रागुक्तस्वरू[पाणि](पेण) **चन्द्रः** [कियन्ति]**(कति) मण्डलानि चरति** ? भगवानाह - **'ता चोद्दस'**[1] इत्यादि। **चतुर्द्दशसचतु[र्द्दशभा](र्भा)गमण्डलानि** - (पञ्चदशस्य मण्डलस्य) चतु[र्द्दशभा](र्भा)गसहितानि मण्डलानि **चरति, एकं** (च) **चतुर्विंशशतभागं**[2] **मण्डलस्य**। किमुक्तं भवति ? परिपूर्णानि चतुर्दश मण्डलानि पञ्चदशस्य चतुर्भागं चतुर्विंशत्यधिकशतसत्कैकत्रिंशद्भागप्रमाणमेकं (च) चतुर्विंशत्यधिकशतस्य भागं सर्वसङ्ख्यया द्वात्रिंशतं पञ्चदशस्य मण्डलस्य चतुर्विंशत्यधिकशतभागान् चरतीति। कथमेतदवसीयते इति चेत् ? उच्यते, त्रैराशिकबलात्, तथाहि- यदि चतुर्विंशत्यधिकेन पर्वशतेन सप्तदशशतान्यष्टषष्ट्यधिकानि मण्डलानां लभ्यन्ते तत एकेन पर्वणा किं लभामहे ? राशित्रयस्थापना - १२४।१, ७६८।१। अत्रान्त्येन राशिना मध्यराशिर्गुण्यते, जातः स तावानेव। तत्राद्येन राशिना

१. चदउस - मूले। २. .....विंशं शतभागं - A।

भागहरणम्। लब्धाश्चतुर्दश, शेषास्तिष्ठन्ति द्वात्रिंशत् १४ ३२/१२४। तत्र छेद्यछेदकराश्योर्द्विकेनाऽपवर्त्तना क्रियते। तत इदमागच्छति - चतुर्दशमण्डलानि पञ्चदशस्य मण्डलस्य षोडश द्वाषष्टिभागाः १४ १६।६२, उक्तश्चैतदन्यत्रापि **'चोद्दस मंडलाइं बिसट्ठिभागा य सोलस हवेज्जा। मासद्धेण उडुवई एत्तियमेत्तं चरइ खेत्तं॥३५२॥'** (जो.प.) **'ता** [पुव्वेण](**आइच्चेण**)'मित्यादि। **'ता'** इति पूर्व्ववत्, **आदित्येनार्द्धमासेन चन्द्रः कति मण्डलानि चरति ?** भगवानाह - **'ता सोलसे'**-त्यादि। **षोडश मण्डलानि चरति। षोडशमण्डलचारी** च **तदा अपरे खलु द्वे अष्टके** चतुर्विंशत्यधिकशतसत्कभागाष्टकप्रमा[ण](णे) [ए](ये) **केनाप्यसामान्ये** केनाप्यनाचीर्ण्णपूर्वे **चन्द्रः स्वयमेव प्रविश्य चारं चरति।**

**मू० कयराइं खलु ताइं दुवे अट्ठगाइं जाइं चंदे के० जाव पविसित्ता चारं चरति ? ता इमाइं खलु दुवे अट्ठगाइं[1] जाइं चंदे केणइ असामन्नगाइं चारं चरइ - तं० निक्खममाणे चेव अमाव[सए](संते)णं पविसमाणे चेव पुण्णमा[सेए](संते)णं, एयाइं जाव चरइ। ता पढमातणगते चंदे दाहिणाते भागाए पविसमाणे सत्तद्धमंडलाइं जाइं चंदे दाहिणाए भागाए पविसमाणे चारं चरइ। कतराइं खलु ताइं सत्तद्धमंडलाइं जाइं चंदे दाहिणाते भागाते पविसमाणे चारं चरति ? इमाइं (खलु) ताइं [खलु] सत्तद्धमंडलाइं जाव पविसमाणे चारं चरति, तं० दोच्चे अद्धमण्डले चउत्थे अद्धमंडले छट्ठे अट्ठमे दसमे बारसमे चउद्दसमे अद्धमंडले, एताणि खलु ताणि सत्तद्धमंडलाणि[2] जाइं चंदे दाहिणाए भागाए पविसमाणे चारं चरति।**

**टी० 'कयराइं खलु दुवे'** इत्यादि (प्रश्नसूत्रं) सुगमम् [सूत्रं]। भगवानाह - **इमे खलु द्वेऽष्टके (ये के)- नाप्यसामान्ये** केनाप्यनाचीर्ण्णपूर्वे **चन्द्रः** स्वयमेव

१. अट्ठगाइं जाव चारं - H। २. ...मंडलाणि जाव पवि... - H।

प्रविश्य **चारं चरति, तद्यथा-** सर्वाभ्यन्तरात् मण्डलाद्बहि**र्निष्क्रामन्नेवा-मावास्यान्ते** एकमष्टकं केनाप्यनाचीर्ण्णं चन्द्रः प्रविश्य चारं चरति सर्वबाह्याच्च मण्डलादभ्यन्तरं **प्रविशन्नेव पौर्णमास्यन्ते** द्वितीयमष्टकं केनाप्यनाचीर्ण्णपूर्व्वं प्रविश्य चन्द्रश्चारं चरति। '[१]**एयाइं खलु दुवे अट्ठगा**'इत्यादि उपसंहारवाक्यं सुगमम्। इह परमार्थतो द्वौ चन्द्रौ एकेन चान्द्रेणार्द्धमासेन चतुर्द्दशमण्डलानि पञ्चदशस्य मण्डलस्य द्वात्रिंशतं चतुर्विंशत्यधिकशतभागान् भ्रमणेन पूरयतः परं लोकरूढ्या व्यक्तिभेदमनपेक्ष्य जातिभेदमेव केवलमाश्रित्य चन्द्रश्चतुर्द्दशमण्डलानि पञ्चदशस्य च मण्डलस्य द्वात्रिंशतं चतुर्विंशत्यधिकशतभागान् चरतीत्युक्तम्। अधुना एकश्चन्द्रमा एकस्मिन्नयने कति अर्द्धमण्डलानि दक्षिणभागे कति उत्तरभागे (भ्र)म्या पूरयतीति प्रतिपिपादयिषुर्भगवानाह - '**ता पढमायणगए चंदे**' इत्यादि। '**ता**' इति पूर्ववत्, **प्रथमायनगते** [२]प्रथममयनं प्रविष्टे **चन्द्रे दक्षिणस्माद्भागादभ्यन्तरं** प्रविशति **सप्त अर्द्धमण्डलानि** भवन्ति **यानि चन्द्रो दक्षिणस्माद्भागादभ्यन्तरं प्रविशन्नाक्रम्य चारं चरति**। '**कइराइं खलु**' इत्यादि प्रश्नसूत्रं सुगमम्। भगवानाह- '**इमाइं खलु**' इत्यादि। **इमानि खलु सप्तार्द्धमण्डलानि** चन्द्रो **दक्षिणस्माद्भागाद**भ्यन्तरं **प्रविशन्नाक्रम्य चारं चरति, तद्यथा- द्वितीयमर्द्धमण्डल**मित्यादि सुगमम्, नवरमियमत्र भावना - सर्वबाह्ये पञ्चदशे मण्डले परिभ्रमणेन पूरणमधिकृत्य परिपूण[र्णा](र्णे) पाश्चात्ययुगपरिसमाप्तिर्भवति, ततोऽप[रं](र)युगप्रथमायनप्र[भृ](वृ)त्तौ प्रथमेऽहोरात्रे एकश्चन्द्रमा दक्षिणभागादभ्यन्तरं प्रविशन् द्वितीयमण्डलमाक्रम्य चारं चरति, स च पाश्चात्ययुगपरिसमाप्तिदिवसे उत्तरस्यां दिशि चारं चरति - (चारं) चरितवान् स वेदितव्यः। ततस्तस्मात् द्वितीयमण्डलात् शनैः अभ्यन्तरं प्रविश्य [अष्टमर्द्ध-मण्डलमष्टे] (द्वितीये)ऽहोरात्र उत्तरस्यां दिशि सर्वबाह्यात् मण्डलादभ्यन्तरं तृतीयमण्डलमाक्रम्य चारं चरति, तृतीयेऽहोरात्रे दक्षिणस्यां दिशि चतुर्थ(मर्द्ध)मण्डलं,

१. एयाइं जाव चरइ - मूले। २. प्रथमायनं - T।

चतुर्थेऽहोरात्रे उत्तरस्यां दिशि पञ्चममर्द्धमण्डलं, पञ्चमेऽहोरात्रे दक्षिणस्यां दिशि षष्ठमर्द्धमण्डलं, षष्ठेऽहोरात्रे [दक्षिण](उत्तर)स्यां दिशि सप्तममर्द्धमण्डलं, सप्तमेऽहोरात्रे दक्षिणस्यां दिशि अष्टममर्द्धमण्डलं, अष्टमेऽहोरात्रे उत्तरस्यां दिशि नवममर्द्धमण्डलं, नवमेऽहोरात्रे दक्षिणस्यां दिशि दशममर्द्धमण्डलं, दशमेऽहोरात्रे उत्तरस्यां दिशि एकादशमर्द्धमण्डलमेकादशेऽहोरात्रे दक्षिणस्यां दिशि द्वादशमर्द्धमण्डलं, द्वादशेऽहोरात्रे उत्तरस्यां दिशि त्रयोदशमर्द्धमण्डलं, त्रयोदशे अहोरात्रे दक्षिणस्यां दिशि चतुर्द्दश-मर्द्धमण्डलं, चतुर्द्दशेऽहोरात्रे उत्तरस्यां दिशि पञ्चदशस्यार्द्धमण्डलस्य त्रयोदश सप्तषष्टिभागानाक्रम्य चारं चरति। [१]एतावता च कालेन चन्द्रस्यायनं परिसमाप्तं, चन्द्रायणं हि नक्षत्रार्द्धमासप्रमाणं, तेन च नक्षत्रार्द्धमासेन चन्द्र[सा](चा)रे सामान्य-तस्त्रयोदश मण्डलानि चतुर्द्दशस्य च मण्डलस्य त्रयोदश सप्तषष्टिभागा लभ्यन्ते, तथाहि - चतुस्त्रिंशदधिकेन अयनशतेन सप्तदश शतान्यष्टषष्टिसहितानि मण्डलानां लभ्यन्ते, तत एकेनायनेन किं लभामहे ? राशित्रयस्थापना - १३४।१,७६८।१। अत्रान्त्येन राशिना एककलक्षणेन मध्यराशिर्गुण्यते, जातः स तावानेव। ततस्तस्याद्येन राशिना चतुस्त्रिंशदधिकशतरूपेण भागहरणम्, लब्धास्त्रयोदश, शेषास्तिष्ठन्ति षड्विंशतिः। तत्र च्छेद्यछेदकरा[शि](श्यो)र्द्विकेनापवर्त्त[मा]ना[त्], लब्धास्त्रयोदश सप्तषष्टिभागा इति, उक्तञ्च - **'[२]तेरस य मंडलाणि य तेरस सत्तट्ठि चेव भागा य। अयणेण चरइ सोमो नक्खत्तेणद्धमासेणं ॥३५१॥'** **(जो.प.)** एतच्च [तत्]सामान्यत उक्तम्, विशेषचिन्तायां चैकस्य चन्द्रमसो युगस्य प्रथमेऽयने यथोक्तेन प्रकारेण दक्षिणभागादभ्यन्तरं प्रवेशे द्वितीयादीन्येकान्तरितानि चतुर्द्दशपर्यन्तानि सप्तार्द्धमण्डलानि लभ्यन्ते उत्तरभागादभ्य[३]न्तरं प्रवेशे तृतीयादीन्येकान्तरितानि त्रयोदश-पर्यन्तानि षट् परिपूर्णान्यर्द्धमण्डलानि सप्तमस्य तु पञ्चदशमण्डलगतस्यार्द्धमण्डलस्य त्रयोदश सप्तषष्टिभागाः, एतावता च [यावत्](यद्) वक्ष्यति उत्तरभागादभ्यन्तरप्रवेश-

---

१. एतावता कालेन - D। २. तेरस य - J। ३. .......भ्यन्तरप्रवेशे - D, T।

चिन्तायां '**तइए अद्धमंडले**' इत्यादि सूत्रं तदपि भावितमेव। सम्प्रति दक्षिणभागादभ्यन्तरप्रवेशे यानि सप्तार्द्धमण्डलानि उक्तानि तदुपसंहारमाह - '**एयाइं**' इत्यादि सुगमम्।

अधुना तस्यैव चन्द्रमसस्तस्मिन्नेव प्रथमेऽयने उत्तरभागादभ्यन्तर[1]प्रवेशे यावन्त्यर्द्धमण्डलानि भवन्ति तावन्ति विवक्षुराह -

**मू० ता पढमातणगते चंदे उत्तराते भागाते पविसमाणे छ अद्धमंडलाइं तेरस त सत्तट्ठिभागाइं अद्धमंडलस्स जाइं चंदे उत्तराते भागाते पविसमाणे चारं चरति। कतराइं खलु ताइं छ अद्धमंडलाइं अद्धमंडलस्स तेरस य सत्त० जाव पविसमाणे चारं चरति ? इमाणि खलु ताइं छ अद्धमंडलाइं जाव चारं चरति, तं० ततिए अद्धमंडले पंचमे अद्धमंडले सत्तमे अद्धमंडले नवमे अद्धमंडले एक्कारसमे अद्धमंडले तेरसमे अद्धमंडले पण्णरसमस्स अद्धमंडलस्स तेरस सत्तट्ठिभागाइं, एआणि खलु ताइं छ अद्धमंडलाइं तेरस [सट्ठाइं](य सत्तट्ठिभागाइं) अद्धमंडलस्स जाइं चंदे उत्तराए भागाते पविसमाणे चारं चरति। एतावता पढमे चंदायणे सम[ग्ग](त्ते) भवति।**

**टी०** '**ता पढमायणगए**' इत्यादि। '**ता**' इति पूर्ववत्, **प्रथमायनगते** युगस्यादौ प्रथममयनं प्रविष्टे[न] **चन्द्रे उत्तरभागादभ्यन्तरं** प्रविशति **षट् अर्द्धमण्डलानि** भवन्ति, सप्तमस्य **चार्द्धमण्डलस्य त्रयोदश सप्तषष्टिभागा यानि चन्द्र** उत्तरभागादभ्यन्तरं **प्रविशन्** आक्रम्य **चारं चरति**। '**कयरा(इं) खलु**' इत्यादि प्रश्नसूत्रं सुगमम्। '**इ[ह](माइं) खलु**' इत्यादि निर्वचनसूत्रम्, एतच्च प्रागेव भावितम्। '**एयाइं खलु**'इत्यादि निगमनवाक्यं निगदसिद्धम्। '**एतावता**' इत्यादि। **एतावता** कालेन **प्रथमं चन्द्रस्यायनं (समाप्तं) भवति**, एतदपि प्राग्भावितम्।

---

१. .....न्तरं प्रवेशे - D।

तदेवं पाश्चात्ययु[गे](ग)परिसमाप्तिचरमदिवसे य उत्तरस्यां दिशि चारं चरितवान् तस्याभिनवयुगसत्कप्रथमेऽयने यावन्ति दक्षिणभागादभ्यन्तरप्रवेशे अर्द्धमण्डलानि यावन्ति चोत्तरभागादभ्यन्तरप्रवेशे तावन्ति साक्षादुक्तानि। एतदनुसारेण द्वितीयस्यापि चन्द्रमसस्तस्मिन्नेव प्रथमे चन्द्रायणे अर्द्धमण्डलानि वक्तव्यानि तानि चैवं - स पाश्चात्ययु[गे](ग)परिसमाप्तिचरमदिवसे दक्षिणदिग्भागे सर्वबाह्ये मण्डले चारं चरित्वा अभिनवस्य युगस्यादिमेऽयने प्रथमेऽहोरात्रे उत्तरस्यां दिशि द्वितीयमर्द्धमण्डलं प्रविश्य चारं चरति, द्वितीयेऽहोरात्रे दक्षिणस्यां दिशि सर्वबाह्यात् तृतीयमर्द्धमण्डलं प्रविश्य चारं चरति, तृतीये अहोरात्रे उत्तरस्यां दिशि चतुर्थमर्द्धमण्डलमित्यादि प्रागुक्तानुसारेण सकलमपि वक्तव्यम्। तदेवमस्य चन्द्रमसः प्रथमेऽयने उत्तरभागादभ्यन्तरप्रवेशचिन्तायां द्वितीयादीन्येकान्तरितानि (चतुर्दशपर्यन्तानि) सप्तार्द्धमण्डलानि भवन्ति, दक्षिणभागादभ्यन्तरप्रवेशचिन्तायां तृतीयादीन्येकान्तरितानि त्रयोदशपर्यन्तानि षट् अर्द्धमण्डलानि भवन्ति, पञ्चदशस्य चार्द्धमण्डलस्य त्रयोदश सप्तषष्टिभागाः।

एवं च सति यावान् चन्द्रस्यार्द्धमासस्तावान्नक्षत्रस्यार्द्धमासो न भवति किन्तु ततो न्यून इति सामर्थ्यात् द्रष्टव्यम्। तथा चाह -

**मू० ता णक्खत्ते अद्धमासे णो चंदे अद्धमासे नो (चंदे अद्धमासे) णक्खत्ते अद्धमासे, (ता) नक्खत्ता(ओ अद्धमासातो ते) चंदे चंदेणं अद्धमासेणं किमधियं चरति ? ता एगं अद्धमंडलं चरति चत्तारि य सत्तट्ठिभागाइं अद्धमंडलस्स सत्तट्ठिभागं च एकतीसहा छेत्ता णव भागाइं। ता दोच्चायणगते चंदे पुरच्छिमाए भागाए णिक्खममाणे सत्त चउप्पण्णभागाइं जाइं चंदे परस्स चिन्नं पडिचरति सत्त तेरसगाइं जाइं चंदे अप्पणो चेव चिण्णं पडिचरति। ता दोच्चातणगते चंदे पच्चच्छिमाते भागाते णिक्खममाणे छ चउप्पण्णगाइं जाइं चंदे परस्स चिण्णं पडिचरति छ तेरसगाइं जाइं चंदे अप्पणो चेव चिण्णं**

**पडिचरति, अवराणि खलु दुवे तेरसगाइं जाइं चंदे केणति असामण्णातिं सतमेव पविठित्ता चारं चरति। कयराणि खलु ताइं दुवे तेरसभागाइं जाव चारं चरति ? इमाणि खलु दुवे तेरसभागाइं जाव पविठित्ता चारं चरति, तं जहा सव्वब्भंतरे चेव मंडले सव्वबाहिरे चेव मंडले, एताणि खलु ताणि दुवे तेरसभागाइं जाइं चंदे केणति असामण्णाइं सयमेव पविठित्ता चारं चरति। एतावता दोच्चे चंदायणे समत्ते भवति। ता णक्खत्ते मासे णो चंदे मासे चंदे मासे णो णक्खत्ते मासे। ता णक्खत्ताओ मासाओ चंदे चंदेणं मासेणं किमहियं चरति ? ता दो अद्धमंडलाइं चरइ अट्ठ य सत्तट्ठिभागाइं अद्धमंडलस्स सत्तट्ठिभागं च एक्कतीसहा छेत्ता अट्ठारसभागाइं।**

**टी०** '**ता नक्खत्ते**' इत्यादि। यद्येवमेकस्मिन्नयने नक्षत्रार्द्धमासरूपे सामान्यतश्चन्द्रमसस्त्रयोदशमण्डलानि चतुर्द्दशस्य च मण्डलस्य त्रयोदश सप्तषष्टिभागाः, '**ता**' इति **ततो [न](नाक्ष)[त्रा](त्रोऽ)र्द्ध(मासश्चान्द्रोऽर्ध)मासो न** भवति, चान्द्रेऽर्द्धमासे चतुर्द्दशानां मण्डलानां पञ्चदशस्य च मण्डलस्य द्वात्रिंश[त्](तश्)-चतुर्विंशत्यधिकशतभागानां प्राप्यमाणत्वात्। इह [न](ना)क्षत्रोऽर्द्धमासश्[च](चा)न्द्रो अर्द्धमासो न भवतीत्युक्तौ नक्षत्रार्द्धमासश्[च](चा)न्द्रो अर्द्धमासो न भवति, (यस्तु) [च](चा)न्द्रो अर्द्धमासः स कदाचित् [न](ना)क्षत्रोप्यर्द्धमासः स्यात्, यथा परमाणुरप्रदेश इत्युक्तौ परमाणुरप्रदेश (एव) यस्त्वप्रदेश स परमाणुरपि भवत्यपरमाणुश्च क्षेत्रप्रदेशादिरिति (शङ्का स्यात्), ततस्तदपनोदार्थमाह **चान्द्रोऽर्द्धमासो (नाक्षत्रोऽर्धमासो) न** भवति। इत्युक्ते भगवान्गौतमो [न](ना)क्षत्रार्द्धमास[श्]चान्द्रार्द्धमासयोर्विशेषपरिज्ञानार्थमाह - '**ता नक्खत्ताओ अद्धमासाओ**' इत्यादि। '**ता**' इति पूर्ववत्, [1] **[न](ना)क्षत्रादर्द्धमासात् ते** - तव मतेन (भगवन् ! **चन्द्रश्चान्द्रेणार्द्ध-**

१. नक्षत्रार्द्धमासात्ते - H।

**मासेन किमधिकं चरति** ? भगवानाह - '**ता एग**'मित्यादि। **एकमर्द्ध)मण्ड**-[लस्य](लं) द्वितीयस्या**र्द्धमण्डलस्य चतुरः सप्तषष्टिभागाने**कस्य च सप्तषष्टिभागस्य एकत्रिंशद्धा विभिन्नस्य सत्कान् **नवभागान**धिकं **चरति**। कथमेतदवसीयते इति चेत् ? उच्यते, त्रैराशिकबलात्, तथाहि - यदि चतुर्विंशत्यधिकेन पर्वशतेन सप्तदश शतानि अष्टषष्ट्यधिकानि मण्डलानां लभ्यन्ते तत एकेन पर्वणा किं लभामहे ? राशित्रयस्थापना - १२४।१,७६८।१। अत्रान्त्येन राशिना मध्यराशिर्गुण्यते, जातः स तावानेव। तत आद्येन चतुर्विंशत्यधिकशतरूपेण राशिना भागहरणम्, छेद्यछेद-कराश्योश्चतुष्केनापवर्त्तना, लब्धानि चतुर्द्दशमण्डलानि अष्टौ च एकत्रिंशद्भागाः। एतस्मान्नक्षत्रार्द्धमासगम्यं [नक्ष](क्षे)त्रं त्रयोदश मण्डलानि एकस्य च मण्डलस्य त्रयोदश सप्तषष्टिभागा इत्येवम्प्रमाणं शोध्यते। तत्र चतुर्द्दशभ्यस्त्रयोदशमण्डलानि शुद्धानि एकमवशिष्टं, सम्प्रत्यष्टभ्य एकत्रिंशद्भागेभ्यस्त्रयोदश सप्तषष्टिभागाः शोध्यास्तत्र सप्तषष्टिरष्टभिर्गुणिता, जातानि पञ्च शतानि षट्त्रिंशदधिकानि ५३६, एकत्रिंशता त्रयोदश गुणिताः, जातानि चत्वारि शतानि त्र्युत्तराणि ४०३, एतानि पञ्चभ्यः शतेभ्यः षट्त्रिंशदधिकेभ्यः शोध्यन्ते, स्थितं शेषं त्रयस्त्रिंशदधिकं शतं १३३। तत एतत् सप्तषष्टिभागानयनार्थं सप्तषष्ट्या गुण्यते, जातानि नवाशीति-शतान्येकादशाधिकानि ८,९११। छेदराशिर्मौल एकत्रिंशत्सा सप्तषष्ट्या गुण्यते, जाते द्वे सहस्रे सप्तसप्तत्यधिके २,०७७। ताभ्यां भागो ह्रियते, लब्धाश्चत्वारः सप्तषष्टि-भागाः, शेषाणि तिष्ठन्ति षट् शतानि त्र्युत्तराणि ६०३। ततश्च्छेद्यच्छेदकराश्योः सप्तषष्ट्या अपवर्त्तना जाता उपरि नव अधस्तादेकत्रिंशत्, लब्धा एकस्य सप्तषष्टि-भागस्य नव एकत्रिंशच्छेदकृता भागाः, उक्तञ्च '**एगं च मंडलं मंडलस्स सत्तट्ठिभागं चत्तारि। नव चेव चुण्णिया उ इगतीसकएण छेएणं ।।३५३।।**' **(जो.प.)** इह भावनां कुर्व्वता मण्डलं मण्डलमिति यदुक्तं तत्सामान्यतो ग्रन्थान्तरे या प्रसिद्धा भावना तदनुरोधादवसेयं, परमार्थतः पुनरर्द्धमण्डलमवसातव्यम्। ततो न कश्चित्

सूत्रभावनिकयोर्विरोधः। तदेवमेकचन्द्रायणवक्तव्यतोक्ता। सम्प्रति द्वितीयचन्द्रायण-वक्तव्यताऽभिधीयते। तत्र यः प्रथमे चन्द्रायणे दक्षिणभागादभ्यन्तरं प्रविशन् सप्तार्द्ध-मण्डलानि उत्तरभागादभ्यन्तरं प्रविशन् षट् अर्द्धमण्डलानि सप्तमस्य चार्द्धमण्डलस्य त्रयोदश सप्तषष्टिभागान्चरितवान्, तमधिकृत्य द्वितीयायनभावना क्रियते। तत्रायनस्य मण्डलक्षेत्रपरिमाणं त्रयोदश अर्द्धमण्डलानि चतुर्दशस्य चार्द्धमण्डलस्य त्रयोदश सप्तषष्टिभागाः। तत्र प्राक्तनमयनमुत्तरस्यां दिशि सर्वाभ्यन्तरे मण्डले त्रयोदश सप्तषष्टि-भागपर्यन्ते परिसमाप्तम्। तदनन्तरं द्वितीयायनप्रवेशे चतुष्पञ्चाशता सप्तषष्टिभागैः सर्वाभ्यन्तरमण्डलं परिसमाप्य ततो द्वितीये मण्डले चारं चरति। तत्र त्रयोदशभाग-पर्यन्ते एकमर्द्धमण्डलं द्वितीयस्यायनस्य परिसमाप्तम्। [तृ](द्वि)तीयमर्द्धमण्डलमुत्तरस्यां दिशि सर्वाभ्यन्तरात् तृतीयेऽर्द्धमण्डले त्रयोदशभागपर्यन्ते, तृतीयमर्द्धमण्डलं दक्षिणस्यां दिशि चतु[र्थम](र्थेऽ)र्द्धमण्डले, चतुर्थमर्द्धमण्डलमुत्तरस्यां दिशि (पञ्चमेऽर्द्धमण्डले, पञ्चममर्द्धमण्डलं दक्षिणस्यां दिशि षष्ठ अर्द्धमण्डले, षष्ठमर्द्धमण्डलमुत्तरस्यां दिशि सप्तमेऽर्द्धमण्डले, सप्तममर्द्धमण्डलं दक्षिणस्यां दिशि अष्टमेऽर्द्धमण्डलेऽष्टममर्द्धमण्डल-मुत्तरस्यां दिशि नवमे अर्द्धमण्डले, नवममर्द्धमण्डलं दक्षिणस्यां दिशि दशमे अर्द्धमण्डले, दशममर्द्धमण्डलमुत्तरस्यां दिशि) एकादशेऽर्द्धमण्डले, एकादशमर्द्धमण्डलं दक्षिणस्यां दिशि द्वादशे अर्द्धमण्डले, द्वादशमर्द्धमण्डलमुत्तरस्यां दिशि (त्रयोदशे अर्द्धमण्डले), त्रयोदशमर्द्धमण्डलं दक्षिणस्यां दिशि चतुर्दशेऽर्द्धमण्डले, तच्च त्रयोदशभागपर्यन्ते परिसमाप्तम्। तदनन्तरं च त्रयोदश सप्तषष्टिभागान् अन्यान् चरति। एतावता द्वितीयमयनं परिसमाप्तम्। चतुर्दशे मण्डले सङ्क्रान्तः सन् प्रथमक्षणादूर्द्ध्वं सर्वबाह्यमण्डलाभिमुखं चारं चरति। ततः परमार्थतः कति(पय)भागातिक्रमे पञ्चदश एव सर्वबाह्ये मण्डले वेदितव्यः। तदेवमस्मिन्नयने पूर्वभागे द्वितीयादीन्येकान्तरितानि चतुर्दशपर्यन्तानि सप्तार्द्धमण्डलानि चीर्णानि पश्चिमभागे च तृतीयादीन्येकान्तरितानि त्रयोदशपर्यन्तानि षट् अर्द्धमण्डलानि। तत्र पूर्वभागे पश्चिमभागे (वा) यत्प्रतिमण्डलं

स्वयं चीर्ण्णमन्यचीर्ण्णं वा चरति तन्निरूपयति - '**ता दोच्चायणगए**'त्यादि। '**ता**' इति पूर्ववत्, **द्वितीयायनगते चन्द्रे पौरस्त्यात् भागा**न्निष्क्रामति, किमुक्तं भवति ? पौरस्त्ये भागे चारं चरति **सप्त चतुष्पञ्चाश[ता](त्का)नि** भवन्ति **यानि चन्द्रः परस्ये**[तानि](ति) तृतीयार्थे षष्ठी परेण सूर्यादिना **चीर्ण्णानि प्रतिचरति सप्त** च **त्रयोदशकानि** भवन्ति **यानि चन्द्र आत्मनैव चीर्ण्णानि प्रतिचरति**। इयमत्र भावना - मेरोः पूर्वस्यां दिशि यो भागः स पूर्वभागो [प](य)श्चा[त्पूर्व](पर)स्यां दिशि (स) पश्चिमभागः। तत्र पूर्वभागे सप्त[षष्टिर](स्व)पि द्वितीयादि[ष्वपि](षु) एकान्तरितेषु चतुर्द्दशपर्यन्तेषु, (अर्द्धमण्डलेषु) सप्तषष्टिभागप्रविभक्तेषु प्रत्येकं चतुष्पञ्चाशतं सप्तषष्टिभागान् परचीर्ण्णान् [1]प्रतिचरति, त्रयोदश त्रयोदश सप्तषष्टिभागान् स्वयं चीर्ण्णानिति [प्रतिचरन्ति]। '**ता दोच्चायणगए**' इत्यादि। तस्मिन्नेव चन्द्रमासे **द्वितीयायनगते पश्चिमभागा**न्निष्क्रामति पश्चिमभागे चारं चरति **षट् चतुष्पञ्चाशत्कानि** भवन्ति **यानि चन्द्रः** '**परस्से**'ति **परेण** सूर्यादिना **चीर्णानि प्रतिचरति, षट् त्रयोदशकानि यानि चन्द्रः** स्वयं **चीर्णानि प्रतिचरति**। अत्रापीयं भावना- पश्चिमे भागे षट्स्वपि तृतीयादिष्वेकान्तरितेषु त्रयोदशपर्यन्तेषु अर्द्धमण्डलेषु सप्तषष्टिप्रविभक्तेषु प्रत्येकं चतुःपञ्चाशतं चतुःपञ्चाशतं सप्तषष्टिभागान् परचीर्ण्णान् चरति, त्रयोदश सप्तषष्टिभागान् स्वयं चीर्णानिति। '**अ[प](व)रा(णि) खलु दुवे**' इत्यादि। **अपरे खलु द्वे त्रयोदशके** तस्मिन्नयने स्तो [यः](ये) **चन्द्रः** (केनाऽ**प्यसामान्ये**) **केना**प्यनाचीर्ण्णपू[र्वं](र्वे) **स्वयमेव प्रविश्य चारं चरति**। '**कयराइं खलु**' इत्यादि प्रश्नसूत्रं सुगमम्। '**इमाइं खलु**' इत्यादि निर्वचनवाक्यमेतत्, तच्च प्रायो निगदसिद्धम्। नवरमेकं य[त्र](त्) त्रयोदशकं सर्वाभ्यन्तरे मण्डले तत् पाश्चात्यायनगतत्रयोदशकादूर्द्ध्वं वेदितव्यम्, तस्यैव सम्भवास्पदत्वात्, द्वितीयं सर्वबाह्यमण्डले तच्च पर्यन्तवर्त्ति प्रतिपत्तव्यम्। '**एयाणि (खलु) ताणि**

---

१. चरति - N,T।

**[खलु]**' इत्यादि निगमनवाक्यं सुगमम्। तदेवमेकं चन्द्रमसमधिकृत्य द्वितीयायनवक्तव्यतोक्ता, [१]एतदनुसारेण च द्वितीयमपि चन्द्रमसमधिकृत्य द्वितीयायनवक्तव्यता भावनीया, परं तस्य पश्चिमभागे सप्त चतुःप[श्चस](श्चाश)त्कानि परचीर्ण्णानि चरणीयानि सप्त त्रयोदशकानि स्वयं चीर्ण्णानि चरणीयानि वक्तव्यानि, पूर्वभागे च षट् चतुःप[श्चस](श्चाश)त्कानि परचीर्ण्णानि षट् त्रयोदशकानि स्वयं चीर्ण्णानि प्रतिचरणीयानि। '**एतावता**' इत्यादि। **एतावता** कालेन **द्वितीयं चन्द्रायणं समाप्तं भवति**। '**ता नक्खत्ते**' इत्यादि। यद्येवं द्वितीयमयनमेतावत्प्रमाणं '**ता**' इति **ततो** [२]**नक्षत्रमासो (न चान्द्रो मासो)** भवति नापि [च](**चा**)**न्द्रो मासो नाक्षत्रो मासः**। सम्प्रति नक्षत्रमासात्कियता चन्द्रमासोऽधिक इति जिज्ञासुः प्रश्नं करोति - '**ता नक्खत्ताओ मासाओ**' इत्यादि। '**ता**' इति **तत्र नक्षत्रमासात् चन्द्रश्चान्द्रेण मासेन किमधिकं चरति** ? एवं प्रश्ने कृते भगवानाह- '**ता दो अद्धमंडला[दि](इं)**' इत्यादि। **द्वे अ[र्द्धे](र्द्ध)मण्डले** तृतीयस्या**र्द्धमण्डलस्याष्टौ सप्तषष्टिभागानेकं** च **सप्तषष्टिभागमेकत्रिंशद्धा छित्त्वा** तस्य सत्का**नष्टादशभागानधिकं चरति**, एतच्च प्रागुक्तमेकाय[ना](नेऽ)धिकमेकमण्डलमित्यादि (द्वि)गुणं कृत्वा परिभावनीयम्।

सम्प्रति यावता [च](चा)न्द्रमासः परिपूर्ण्णो भवति तावन्मात्रतृतीयायनवक्तव्यतामाह -

**मू० ता तच्चायणगते चंदे पच्चच्छिमाते भागाते पविसमाणे बहिराणंतरस्स पच्चच्छिमेल्लस्स अद्धमंडलस्स ईयालीसं च सत्तट्ठिभागाइं जाइं चंदे अप्पणो य परस्स य चिण्णं पडिचरति, तेरस सत्तट्ठिभागाइं जाइं चंदे परस्स चिण्णं पडिचरति, तेरस सत्तट्ठिभागाइं जाइं चंदे अप्पणो य परस्स य चिण्णं पडिचरति, एतावता च बाहिराणंतरे पच्चच्छिमिल्ले अद्धमंडले समत्ते भवति। ता तच्चायणगते**

१. एतदनुसारेण द्वितीयमपि - N। २. णक्खत्ते मासे - मूले ।

चंदे पुरच्छिमाते भागाते पविसमाणे बाहिरतच्चस्स पुरच्छिमिल्लस्स अद्धमंडलस्स [1] ईतालीसं सत्तट्ठिभागाइं जातिं चंदे अप्पणो य परस्स य चिण्णं पडिचरति, तेरस सत्तट्ठिभागाइं जाइं चंदे परस्स चिण्णं पडिचरति, तेरस सत्तट्ठिभागाइं जाइं चंदे अप्पणो य परस्स य चिण्णं पडिचरति, एतावता बाहिरतच्चे पुरच्छिमिल्ले अद्धमंडले समत्ते भवति। ता तच्चायणगते चंदे पच्चच्छिमाते भागाते पविसमाणे बाहिर-चउत्थस्स पच्चच्छिमिल्लस्स अद्धमंडलस्स अट्ठ सत्तट्ठिभागाइं सत्तट्ठि-भागं च एक्कतीसहा छेत्ता अट्ठारसभागाइं जाइं चंदे [2] अप्पणो य परस्स य चिण्णं पडिचरति, एतावता [3] बाहिरचउत्थे पच्चच्छिमिल्ले अद्धमंडले समत्ते भवति। एवं खलु चंदेणं मासेणं चंदे तेरस चउप्पण्णाइं दुवे तेरस भागाइं जाइं चंदे परस्स चिण्णं पडिचरति, तेरस तेरस भागाइं जाइं चंदे अप्पणो चेव चिण्णं पडिचरति, दुवे ईतालीसभागाइं दुवे तेरसभागाइं अट्ठ सत्तट्ठिभागाइं सत्तट्ठिभागं च एक्कतीसहा छेत्ता अट्ठारसभागाइं जाइं चंदे अप्पणो य परस्स य चिण्णं पडिचरति, [4] अवराइं [5] खलु दुवे तेरसभागाइं जाइं चंदे केणति असामण्णाइं सयमेव पविट्ठित्ता चारं चरति। इच्चेसा चंदिमसो अभिगमणनिक्खमणवुड्ढिनिवुड्ढियअणवट्ठियसंठाणसंठिती। विकुव्व-णगेड्ढिपत्ते रू[वं](वी) चंदे देवे आहिते ति वदेज्जा।

तेरसमं पाहुडं समत्तं १३।

---

१. ईयालीसं च सत्तट्ठि.... - V। २. अप्पणो परस्स य - O। ३. टीकानुसारेण त्वत्रैवं पाठः सम्भाव्यते -'एतावता चंदे मासे समत्ते भवति'। ४. अस्य वाक्यस्य टीका नास्ति। ५. अवराणि - U।

**टी० 'ता तच्चायणगए चंदे'** इत्यादि। इह द्वितीयायनपर्यन्ते चतुर्द्दशे अर्द्धमण्डले षड्विंशतिसङ्ख्यसप्तषष्टिभागमात्रमाक्रान्तं, तच्च परमार्थतः पञ्चदशमर्द्ध-मण्डलं वेदितव्यं, बहु तदभिमुखं गतत्वात्। तदनन्तरं नीलवत्पर्वतप्रदेशे साक्षात्पञ्च-दशमर्द्धमण्डलं प्रविष्टः, तत्प्रविष्टश्च प्रथमक्षणादूर्द्ध्वं सर्वबाह्यानन्तरार्वाक्तनद्वितीय-मण्डलाभिमुखं चारं चरति। ततः स तस्मिन्नेव सर्वबाह्यानन्तरेऽर्वाक्तने द्वितीये मण्डले चारं चरन् विवक्षितः। ततोऽधिकृतसूत्रोपनिपातः। **तृतीयायनगते चन्द्रे** पश्चिमे भागे प्रविशति **बाह्यानन्तरस्यार्वा**ग्भागवर्त्तिनः **पाश्चात्य[श्चा](स्या)र्द्धमण्डलस्य एक-चत्वारिंशत् सप्तषष्टिभागास्ते** वर्त्तन्ते **यान् चन्द्र आत्मना परेण च चीर्ण्णान् प्रतिचरति त्रयोदश च सप्तषष्टिभागा(स्ते) यान् चन्द्रः** [1]**परेणैव चीर्ण्णा[नि](न्) प्रतिचरति,** अन्ये **च त्रयोदश सप्तषष्टिभागा(स्ते) यान् चन्द्रः** स्वयं **परेण च चीर्ण्णान् प्रतिचरति। एतावता** च परिभ्रमणेन बाह्यानन्तरमर्वाक्तनं **पाश्चात्य-मर्द्धमण्डलं परिसमाप्तं भवति**। तदनन्तरं च तस्मिन्नेव **तृतीयायनग[त](ते) चन्द्रे**[ण] पौरस्त्ये भागे प्रविशति सर्व**बाह्या**दर्वाक्तनस्य **तृतीयस्य पौर**[स्त्यम्]-**(स्त्या)र्द्धमण्डलस्य** ते **एकचत्वारिंशत् सप्तषष्टिभागा यान् चन्द्र आत्मना परेण च चीर्ण्णान् प्रतिचरति,** ततः परमन्ये ते **त्रयोदशभागा यान् चन्द्रः परेणै**व **चीर्ण्णान् प्रतिचरति**, अन्ये च ते **त्रयोदशभागा**[न्] **यान् चन्द्रः आत्मना परे**[णैव](ण च) **चीर्ण्णान् प्रतिचरति। एतावता** सर्व**बाह्या**त् मण्डलादर्वाक्तनं **तृतीयं पौरस्त्यमर्द्धमण्डलं परिसमा[प्तिर्भ](प्तं भ)वति** सप्तषष्टेरपि भा[व](गा)नां परिपूर्ण्ण[ता](तया) जातत्वात्। (**'ता'** इत्यादि।) ततस्तस्मिन्नेव **तृतीयायनगते चन्द्रे** पश्चिमे भागे प्रविशति सर्व**बाह्या**त् मण्डलादर्वाक्तनस्य **चतुर्थस्य पाश्चात्यस्यार्द्ध-मण्डलस्याष्टौ सप्तषष्टिभागा** एकं च **सप्तषष्टिभागमेकत्रिंशद्धा छित्त्वा** तस्य

---

१. अपरेणैव.... - T।

सत्का **अष्टादश भागास्ते** वर्तन्ते **यान् चन्द्रः आत्मना परेण च चीर्ण्णान् प्रतिचरति**। **एतावता** च परिभ्रमणेन [च](चा)न्द्रो मासः परिपूर्ण्णो जातः। सम्प्रति पूर्वोक्तमेव स्मरयन् चन्द्रमासगतमुपसंहारमाह - **'एवं खलु चंदेणं मासेण'**-(मित्यादि।) **एवं** उक्तेन प्रकारेण **खलु** निश्चितं [च](**चा**)**न्द्रेण मासेन चन्द्रः त्रयोदश चतुष्पञ्चाशत्कानि** जातानि **द्वे** च **त्रयोदशके यानि चन्द्रः परेणैव चीर्ण्णानि प्रतिचरति** वर्त्तमानकालनिर्द्देशः सकलकालं युगस्य प्रथमे चान्द्रे मासे एवमेव द्रष्टव्यमिति ज्ञापनार्थः, तत्र त्रयोदशापि चतुष्पञ्चाशत्कानि द्वितीयेऽयने, तत्रापि सप्त (चतुष)पञ्चाशत्कानि पूर्वभागे षट् पाश्चात्यभागे ये च द्वे त्रयोदशके ते द्वितीयस्यायनस्योपरि चन्द्रमासाव[धि](धे)रर्वाक्द्रष्टव्ये, तत्रैकं त्रयोदशकं सर्व-बाह्यादर्वाक्तने द्वितीये पाश्चात्यार्द्धमण्डले द्वितीयं पौरस्त्ये तृतीयेऽर्द्धमण्डले। तथा **'तेरसे'**त्यादि। **त्रयोदश त्रयोदशकानि यानि चन्द्र आत्मनैव चीर्ण्णानि प्रतिचरति**, [ए]तानि [च] सर्वाण्यपि द्वितीये(ऽयने) वेदितव्यानि, तत्रापि सप्त पूर्वभागे षट् पश्चिमभागे। तथा **'दुवे'** इत्यादि। **द्वे एकचत्वारिंशत्के द्वे** च **त्रयो-दशके अष्टौ सप्तषष्टिभागा** एकं च **सप्तषष्टिभागमेकत्रिंशत्धा छित्त्वा** तस्य सत्का **अष्टादशभागा**[ने] (यान्ये)तानि **चन्द्र आत्मना परेण (च) चीर्ण्णानि प्रतिचरति**। तत्र (एकं) एकचत्वारिंशत्कमेकं च त्रयोदशकं द्वितीया[नां](यनो)परि सर्वबाह्यात् मण्डलादर्वाक्तने द्वितीये पाश्चात्यार्द्धमण्डले द्वितीयमेकचत्वारिंशत्कं द्वितीयं च त्रयोदशकं सर्वबाह्यानूमण्डलादर्वाक्तने तृतीये पौरस्त्येऽर्द्धमण्डले शेषं पाश्चात्ये सर्वबाह्यादर्वाक्तने चतुर्थेऽर्द्धमण्डले। अधुनोपसंहारमाह - **'इच्चेसा'** इत्यादि। **इत्येषा चन्द्रमसः** संस्थितिरिति योगः किंविशिष्टेत्याह - **'अभिगम(न)निष्क्रमणवृद्धि[१]नि-वृद्ध्यनवस्थितसंस्थाना'** अभिगमनं - सर्वबाह्यान्मण्डलादभ्यन्तरप्रवेशनं, निष्क्रम-

---

१. निवुड्ढिय - मूले।

णंसर्वाभ्यन्तरान्मण्डलाद्बहिर्गमनं वृद्धिश्चन्द्रमसः प्रकटताया उपचयो निर्वृद्धिर्यथोक्त-स्वरूपवृद्ध्यभावः, एताभिरनवस्थितं संस्थानमभिगमननिष्क्रमणे अधिकृत्या(न)-वस्थानं वृद्धिनिर्वृद्धी अपेक्ष्य संस्थानमाकारो यस्याः सा तथारूपा संस्थितिः। तथा परिदृश्यमानचन्द्रविमानस्याधि[न्या](ष्ठा)ता **विकुर्वणर्द्धिप्राप्तो (रूपी)** रूपवान्, अत्रातिश[येन](यने) मत्वर्थीयो अतिशयरूपवान् **चन्द्रो देव इत्याख्यातो** न तु परिदृश्यमानविमानमात्रश्चन्दो देव **इति वदेत्** स्वशिष्येभ्यः।

इति श्रीमलयगिरिविरचितायां चन्द्रप्रज्ञप्तिटीकायां त्रयोदशं प्राभृतं समाप्तम्।

* * * * *

*भावनापरिणामेषु, सिंहेष्विव मनोवने।*
*सदा जाग्रत्सु दुर्ध्यान–सूकरा न विशन्त्यपि।।*

*भावोपयोगशून्याः, कुर्वन्नावश्यकीः क्रियाः सर्वाः।*
*देहक्लेशं लभसे, फलमाप्स्यसि नैव पुनरासाम्।।*

*एकस्य जन्मनोऽर्थे मूढाः, कुर्वन्ति यानि पापानि।*
*जनयन्ति तानि दुःखं, तेषां जन्मान्तरसहस्रम्।।*

*आत्मानं स्नापयेन्नित्यं, ज्ञाननीरेण चारुणा,*
*येन निर्मलतां याति, जीवो जन्मान्तरेष्वपि।।*

## चतुर्द्दशं प्राभृतम्

तदेवमुक्तं त्रयोदशं प्राभृतम्। सम्प्रति चतुर्द्दशं वक्तव्यम्। तस्य चायमर्थाधिकारो यथा कदा ज्योत्स्ना प्रभूता भवति? इति। ततस्तद्विषयं प्रश्नसूत्रमाह -

**मू० ता कता ते दोसिणा बहू आहिता ति वदेज्जा ? ता दोसिणापक्खे णं दोसिणा बहू आहिता ति वदेज्जा।**

**टी०** '**ता कया ते दोसिणे**'त्यादि। '**ता**' इति पूर्ववत्, **कदा**-कस्मिन्काले भगवन् ! **त्वया ज्योत्स्ना** प्रभूता **आख्याता इति वदेत्**? भगवानाह- '**ता दोसि[ण**' मि]**णे**'त्यादि। '**ता**' इति पूर्ववत् (**ज्योत्स्नापक्षे**) **ज्योत्स्ना बहुराख्याता इति वदेत्**।

**मू० ता कहं ते दोसिणापक्खे दोसिणा बहू आहिता ति वदेज्जा? ता अंधकारपक्खा दोसिणापक्खे दोसिणा बहू आहितातिं वदेज्जा।**

**टी०** '**ता कहं ते**' इत्यादि। '**ता**' इति प्राग्वत्, **कथं**-केन प्रकारेण भगवन्! **त्वया ज्योत्स्नापक्षे ज्योत्स्ना बहुराख्याता इति वदेत्**? भगवानाह- '**ता अंधकारे**'त्यादि सुगमम्।

**मू० ता कहं (ते) अंधकारपक्खाओ णं दोसिणापक्खे दोसिणा बहू आहितातिं वदेज्जा? ता अंधकारपक्खातो णं दोसिणापक्खं अयमाणे चंदे चत्तारि बाताले मुहुत्तसते छत्तालीसं च बावट्ठिभागे मुहुत्तस्स जाइं चंदे विरज्जति, तं० पढमाए पढमं भागं जाव पण्णरसिए पण्णरसं भागं। एवं खलु अंधकारपक्खातो दोसिणापक्खे दोसिणा बहू आहितातिं वदेज्जा।**

**टी०** '**ता कहं ते**' इत्यादि प्रश्नसूत्रं निगदसिद्धम्। निर्वचनमाह -'**ता अंधकारपक्खाओ**'इत्यादि। '**ता**' इति पूर्ववत्, **अन्धकारपक्षात् ज्योत्स्नापक्षमयमानश्चन्द्रमाश्चत्वारि मुहूर्त्तशतानि द्वाचत्वारिंशानि** - द्विचत्वारिंशदधिकानि

**षट्चत्वारिंशतं च द्वाषष्टिभागान् मुहूर्त्तस्य** यावत् ज्योत्स्ना निरन्तरं प्रवर्द्धते, तथा चाह- **यानि** यावत् **चन्द्रो विरज्यते** शनैः शनै राहुविमानेना(ना)वृतस्वरूपो भवति, मुहूर्त्तसङ्ख्यागणिते भावना प्राग्वत् कर्त्तव्या। कथमनावृतो भवतीत्याह - **तद्यथा-प्रथमायां** प्रतिपल्लक्षणायां तिथौ **प्रथमं** पञ्चदशं द्वाषष्टिभागसत्क-चतुष्टयभागप्रमाणं यावदनावृतो भवति, द्वितीयस्यां तिथौ द्वितीयं भागं यावत्, एवं तावद्द्रष्टव्यं **यावत्पञ्चदश्यां पञ्चदशमपि भागं** यावदनावृतो भवति सर्वात्मना राहुविमाने(ना)नाऽऽवृतो भवतीति भावः। उपसंहारमाह - '**एवं खलु**' इत्यादि। तत **एवमुक्तेन** प्रकारेण **खलु** निश्चित**मन्धकारपक्षात् (ज्योत्स्नापक्षे) ज्योत्स्ना बहुराख्याता इति वदेत्**। इयमत्र भावना - इह शुक्लपक्षे यथा प्रतिपत्प्रथम-क्षणादारभ्य (प्रति)मुहूर्त्तं यावन्मात्रं (यावन्मात्रं शनैः) शनैः चन्द्रः प्रकटो भवति तथा अन्धकारपक्षे प्रतिप[ल्ल](त्प्रथम)क्षणादारभ्य प्रतिमुहूर्त्तं तावन्मात्रं २ शनैः २-श्चन्द्र आवृत उपजायते। तत एवं सति यावत्येवान्धकारपक्षे ज्योत्स्ना तावत्येव शुक्लपक्षे(ऽपि प्राप्ता, परं शुक्लपक्षे) या पञ्चदश्यां ज्योत्स्ना सान्धकारपक्षादधिकेति अन्धकार(पक्षात्) शुक्लपक्षे ज्योत्स्ना प्रभूता आख्यातेति।

**मू० ता केवतिता णं दोसिणापक्खे दोसिणा आहितातिं वदेज्जा? ता परित्ता असंखेज्जा भागा। ता कता ते अंधकारे बहू आहितातिं वदेज्जा ? ता अंधकारपक्खे अंधकारे बहू आहितातिं वदेज्जा। ता कहं ते अंधकारपक्खे अंधकारे बहू आहितातिं वदेज्जा ? ता दोसिणापक्खतो णं अंधकारपक्खे अंधकारे बहू आहिता ति वदेज्जा। ता कहं ते दोसिणापक्खातो अंधकारपक्खे अंधकारे बहू आहिता ति वदेज्जा ? ता दोसिणापक्खतो णं अंधकारपक्खं अयमाणे चंदे चत्तारि बाताले मुहुत्तसते छत्तालीसं च बावट्ठिभागे मुहुत्तस्स जाइं चंदे रज्जति, तं० पढमाते पढमं भागं जाव पण्णरसिए पण्णरसमं**

**भागं। एवं खलु दोसिणापक्खत्तो अंधकारे पक्खे अंधकारे बहू आहिताति वदेज्जा। ता केव(ति)ते णं अंधकारपक्खे अंधकारे आहिताति ? ता परित्ता असंखेज्जा।**

**चोद्दसमं १४।**

**टी०** '**(ता) [कहं ते] (केवतिता)**' इत्यादि। '**ता**' इति पूर्ववत्, **कियती ज्योत्स्नापक्षे ज्योत्स्ना आख्याता इति वदेत्** ? भगवानाह - परीत्ताः - परिमिताः **असङ्ख्येया भागा** निर्विभागा भागाः। एवमन्धकारसूत्राण्यप्युक्तानुसारेण भावनीयानि, नवरमन्धकारपक्षेऽमावास्यायां (यो) अन्धकारः स ज्योत्स्नापक्षादधिक इति **ज्योत्स्नापक्षादन्धकारपक्षेऽन्धकारः** प्रभूत **आख्यात** इति।

इति श्रीमलयगिरिविरचितायां चन्द्रप्रज्ञप्तिटीकायां चतुर्दशं प्राभृतं समाप्तम्।

* * * * *

*त्वमेव दुःखं नरकस्त्वमेव,*
*त्वमेव शर्मापि शिवं त्वमेव।*
*त्वमेव कर्माणि मनस्त्वमेव,*
*जहीह्यविद्यामवधेहि चात्मन् !॥*
*नाशाम्बरत्वे न सिताम्बरत्वे,*
*न तर्कवादे न च तत्त्ववादे।*
*न पक्षसेवाऽऽश्रयणेन मुक्तिः,*
*कषायमुक्तिः किल मुक्तिरेव॥*

## पञ्चदशं प्राभृतम्

तदेवमुक्तं चतुर्दशं प्राभृतम्। सम्प्रति पञ्चदशमारभ्यते। तस्य चायमर्थाधिकारो यथा कः शीघ्रगतिर्भगवानाख्यात इति? ततस्तद्विषयं प्रश्नसूत्रमाह -

**मू० ता कहं ते सिग्घगती वत्थू आहिताति वदेज्जा ? ता एएसि णं चंदिमसूरियगहगणणक्खत्ततारारूवाणं चंदेहिंतो सूरा सिग्घगती, सूरेहिंतो गहा सिग्घगती, गहेहिंतो णक्खत्ता सिग्घगती, णक्खत्तेहिंतो तारा सिग्घगती। सव्वप्पगती णं चंदा सव्वसिग्घगती तारा।**

**टी० 'ता कहं ते'** इत्यादि। **'ता'** इति पूर्ववत्, **कथं** भगवन्! **त्वया** चन्द्रसूर्यादिकं [च] **वस्तु शीघ्रगति आख्यातमिति वदेत्** ? भगवानाह - **'ता एएसि ण'**मित्यादि। (ए)**तेषां चन्द्रसूर्यग्रहनक्षत्रतारकाणां** मध्ये **चन्द्रेभ्यः सूर्याः शीघ्रगतयः, सूर्येभ्यो ग्रहाः शीघ्रगतयः, ग्रहेभ्योऽपि नक्षत्राणि शीघ्रगतीनि, नक्षत्रेभ्योऽपि ताराः शीघ्रगतयः**। अत एवैतेषां पञ्चानां मध्ये **सर्वाल्पगतयश्चन्द्राः सर्वशीघ्रगतयस्ताराः**।

एतस्यैवार्थस्य सविशेषपरिज्ञा[प]नाय प्रश्नं करोति -

**मू० ता एगमेगेणं मुहुत्तेणं चंदे केवतिताइं भागसयाइं गच्छइ ? ता जं जं मंडलं उपसंकमित्ता चारं चरति तस्स तस्स मंडल-परिक्खेवस्स [१]सत्तरस भागसताइं अट्ठसट्ठाइं गच्छति मंडलं सत-सहस्सेणं अट्ठाणउतीए य सएहि छेत्ता। ता एगमेगेणं मुहुत्तेणं सूरे केवतिताइं भागसताइं गच्छति ? ता जं जं मंडलं उवसंकमित्ता चारं चरति तस्स तस्स मंडलपरिक्खेवस्स अट्ठारस तीसे भागसते गच्छति मंडलं [२]सयसहस्सेणं अट्ठा० जाव छेत्ता। ता एगमेगेणं मुहुत्तेणं णक्खत्ते केवतियाइं भागसताइं गच्छति ? ता जं जं मंडलं**

१. सत्तरस अट्ठसट्ठि भागसताइं - U। २. सयसहस्सेणं चेव - U।

उवसंकमित्ता चारं चरति तस्स तस्स मंडलस्स परिक्खेवस्स अट्ठारस पणतीसे भागसते गच्छति मंडलं सतसहस्सेणं [1]अट्ठाणउतीसतेहिं छेत्ता। ता जता णं चंदं गतिसमावण्णगं सूरे गतिसमावण्णे भवति, से णं गतिमायाते केवतितं विसेसेति? ता बावट्ठिभागे विसेसेति। ता जता णं चंदं गतिसमावण्णगं णक्खत्ते गतिसमावण्णे भवति, से णं गतिमाताए केवतितं विसेसेति ? ता सत्तसट्ठीभागे विसेसेइ। ता जता णं सूरं गतिसमावण्णं णक्खत्ते गतिसमावण्णे भवति से णं गति[स]माताए केवतितं विसेसेति ? ता पंचभागे विसेसेति। ता जता णं चंदं गतिसमावण्णगं अभिइणक्खत्ते गतिसमावण्णगे पुरच्छिमाते भागाते समासाएइ, पुरच्छिमाए भागाए समासाएत्ता णव मुहुत्ते सत्तावीसं च सत्तट्ठिभागे मुहुत्तस्स चंदेणं सद्धिं जोगं जोएति, जोगं जोगेत्ता जोगं अणुपरियट्टति जोगं अणुपरियट्टित्ता विजहति विगतजोगी यावि भवति। ता जता णं चंदं गतिसमावण्णं सवणे णक्खत्ते गतिसमावण्णे भवति पुरच्छिमाते तहेव जहा अभीतिस्स णवरं तीसमुहुत्ते चंदेण सद्धिं जोगं जोएति जोगं २ जाव विगतजोगी यावि भवति। एवं (एएणं अभिलावेणं) पण्णरसमुहुत्ताइं तीसमुहुत्ताइं पणयालीसतिमुहुत्ताइं भाणितव्वाइं जाव उत्तरासाढा विगतजोगी यावि भवति। (ता जता णं चंदं गतिसमावण्णं गहे गतिसमावण्णे पुरच्छिमाते भागाते समासादेति पु०२ त्ता चंदेणं सद्धिं जोगं जुंजति २ त्ता जोगं अणुपरियट्टति २ त्ता विप्पजहति विगतजोई यावि भवति।) ता जता णं सूरं गतिसमावण्णं अभीतिणक्खत्ते गतिसमावण्णे पुरच्छिमाते भागाते समासाएति पुर० २(त्ता) चत्तारि

---

१. अट्ठा जाव छेत्ता - U।

**अहोरत्ते छच्च मुहुत्ते सूरेणं सद्धिं जोगं जोएति जाव विगतजोगी यावि भवति। एवं सूरेणं सद्धिं जोगो भाणितव्वो जाव उत्तरासाढा विगतजोगी तावि भवति। (ता जता णं सूरं गतिसमावण्णं गहे गतिसमावण्णे पुरच्छिमाते भागाते समासादेति, पु० २ त्ता सूरेण सद्धिं जोयं जुंजति २ त्ता जोयं अणुपरियट्टति २ त्ता जाव विप्पजहति विगतजोई यावि भवति।)**

टी० '**(ता) एगमेगेण**'[इ](मि)त्यादि। '**ता**' इति पूर्ववत्, **एकैकेन मुहूर्त्तेन चन्द्रः कियन्ति** मण्डलस्य **भा[गाइं](गश)तानि गच्छति** ? भगवानाह - '**ता जं ज**'मित्यादि। **यत् यत् मण्डलमुपसङ्क्रम्य** चन्द्रश्चारं **चरति तस्य तस्य मण्डलस्य** सम्बन्धिनः **परिक्षेपस्य** परि[धि](धेः) **सप्तदशशतानि अष्टषष्ट्यधि-[क](कानि) भागानां गच्छति मण्डलं** मण्डलपरिक्षेपमेकेन **शतसहस्रेणाष्टनवत्या च शतैश्छित्त्वा** - विभज्य। इयमत्र भावना - इह प्रथमतश्चन्द्रमसो मण्डलकालो निरूपणीयस्तदनन्तरं तदनुसारेण मुहूर्त्तगतिपरिमाणं परिभावनीयम्। तत्र मण्डलकाल-निरूपणार्थमिदं त्रैराशिकं - यदि सप्तदशभिः शतैरष्टषष्ट्यधिकैः स[प्त]क[ला](ल)-युगवर्त्तिभिरर्द्धमण्डलैरष्टादशशतानि त्रिंशदधिकानि रात्रिन्दिवानां लभ्यन्ते, ततो द्वाभ्यामर्द्धमण्डलाभ्यामेकेन मण्डलेनेति भावः कति रात्रिन्दिवानि लभ्यन्ते ? राशि-त्रयस्थापना- १,७६८।१,८३०।२। अत्रान्त्येन राशिना द्विकलक्षणेन मध्यमस्य राशेर्गुणना, जातानि षट्त्रिंशच्छतानि षष्ट्यधिकानि ३,६६०। तेषामाद्येन राशिना १,७६८ भागहरणं, लब्धे द्वे रात्रिन्दिवे, शे[षस्](षं) तिष्ठति चतुर्विंशत्यधिकशतं १२४, तत एकैकस्मिन् रात्रिन्दिवे त्रिंशन्मुहूर्त्ता इति त्रिंशता गुणने जातानि सप्तत्रिंशत् शतानि विंशत्यधिकानि ३,७२०। तेषां सप्तदशभिः शतैरष्टषष्ट्यधिकैर्भागे हृते लब्धौ द्वौ मुहूर्त्तौ, ततः शेषच्छेद्यच्छेदकराश्योरष्टकेनापवर्त्तना, जातश्छेद्यो राशिस्त्रयो-(विंशतिः छेदकराशिर्द्वे शते एक)विंशत्यधिके। आगतं (द्वे रात्रिन्दिवे द्वौ मुहूर्त्तौ)

मुहूर्त्तस्य एकविंशत्यधिकशत(द्वय)भागा[द्वय]स्त्रयोविंशतिः। एतावता कालेन द्वे अर्द्धमण्डले परिपूर्ण्णे चरति। किमुक्तं भवति ? एतावता कालेन परिपूर्ण्णमेकं मण्डलं चन्द्रश्चरति। तदेवं मण्डलकालपरिज्ञानं कृतम्। साम्प्रतमेतदनुसारेण प्रतिमुहूर्त्तं गतिपरिमाणं चिन्त्यते। तत्र ये द्वे रात्रिन्दिवे ते मुहूर्त्तकरणार्थं त्रिंशता गुण्येते, जाता षष्टिमुहूर्त्ताः ६०। तत्र उपरितनौ द्वौ मुहूर्त्तौ प्रक्षिप्तौ, जाता द्वाषष्टिः। एषा सवर्ण्णनार्थं द्वाभ्यां शताभ्यामेकविंशत्यधिकाभ्यां गुण्यते गुणयित्वा चोपरितना त्रयोविंशतिः प्रक्षिप्यते, जातानि त्रयोदश सहस्राणि सप्तशतानि पञ्चविंशत्यधिकानि १३,७२५। एतत् एकमण्डलकालगतमुहूर्त्तसत्कैकविंशत्यधिकशतद्वयभागानां परिमाणम्। तत्र त्रैराशि(क)कर्म्माव(सरो) - यदि त्रयोदशभिः सहस्रैः सप्तभिः शतैः पञ्चविंशत्यधि-कैरेकविंशत्यधिकशतद्वयभागानां मण्डलभागा एकं शतसहस्रमष्टानवतिशतानि लभ्यन्ते, तत एकेन मुहूर्त्तेन किं लभामहे ? राशित्रयस्थापना - १३,७२५। १,०९,८००।१। इहाऽऽद्यो राशिर्मुहूर्त्तगतैकविंशत्यधिकशतद्वयभागरूपस्ततः सवर्ण्णनार्थमन्त्यो राशिरेकलक्षणो द्वाभ्यां शताभ्यामेकविंशत्यधिकाभ्यां गुण्यते, जाते द्वे शते एकविंशत्यधिके २२१। ताभ्यां मध्यो राशिर्गुण्यते, (जाते द्वे) [द्वि]को-[ट्यो](ट्यौ) द्विचत्वारिंशतूलक्षाः पञ्चषष्टिसहस्राणि अष्टौ शतानि २,४२,६५,८००। तेषां त्रयोदशभिः सहस्रैः सप्तभिः शतैः पञ्चविंशत्यधिकैर्भागो ह्रियते, लब्धानि सप्तदश शतान्यष्टषष्ट्यधिकानि १,७६८। एतावतो भागान् यत्र तत्र [चार्द्ध](वा) मण्डले चन्द्रो मुहूर्त्तेन गच्छति। '**ता एगमेगे**'त्यादि। '**ता**' इति पूर्ववत्, **एकैकेन मुहूर्त्तेन सूर्यः कियन्ति भागशतानि गच्छति** ? भगवानाह- '**ता जं ज**'मिति **यत् २ मण्डलमुपसङ्क्रम्य सूर्यश्चारं चरति तस्य २ मण्डलस्य** सम्बन्धिनः **परिक्षेपस्य** परि[धि](धे)**रष्टादश(भाग)शतानि त्रिंशदधिकानि गच्छति मण्डलं शत-सहस्रेणाष्टानवत्या च शतैः छित्त्वा**। कथमेतदवसीयते इति चेत् ? उच्यते, त्रैराशिकबलात्। तथाहि- यदि षष्ट्या मुहूर्त्तैरेकं शतसहस्रमष्टानवतिशतानि मण्डल-

भागानां लभ्यन्ते, तत एकैकेन मुहूर्त्तेन कति भागान्लभामहे ? राशित्रयस्थापना ६०।१,०९,८००।१। अत्रान्त्येन राशिना एककलक्षणेन मध्यमस्य राशेर्गुणने जातः स तावानेव, एकेन गुणितं तदेव भवतीति वचनात्। ततस्तस्याद्येन राशिना षष्टिलक्षणेन भागो ह्रियते, लब्धान्यष्टादशशतानि त्रिंशदधिकानि १,८३०। एतावतो भागान् मण्डलस्य सूर्य एकैकेन मुहूर्त्तेन गच्छति। '**ता एगमेगेण**'मित्यादि। '**ता**' इति पूर्ववत्, **एकैकेन मुहूर्त्तेन कियतो भागान् मण्डलस्य नक्षत्रं गच्छति** ? भगवानाह - '**ता जं ज**'मित्यादि। **यत् यत्** आत्मीय(मा)कालप्रतिनियत**मण्डल-मुपसङ्क्रम्य चारं चरति** [1]**तस्य तस्य मण्डलस्य** सम्बन्धिनः **परिक्षेपस्य** परि[धि]-(धे)**रष्टादशभागशतानि (पञ्च)त्रिंशदधिकानि गच्छति मण्डलं शतसहस्रेणाष्टानवत्या च शतैश्छित्त्वा**। इहापि प्रथमतो मण्डलकालो निरूपणीयः [त](य)-तस्तदनुसारेण (एव) मुहूर्त्तगतिपरिमाणभावना। तत्र [काल]- मण्डल(काल)प्रमाण-चिन्तायामिदं त्रैराशिकं - यदि अष्टादशभिः शतैः पञ्चत्रिंशदधिकैः सकलयुग-भाविभिरर्द्धमण्डलैरष्टादशशतानि त्रिंशदधिकानि रात्रिन्दिवानां लभ्यन्ते ततो द्वाभ्यां (अर्द्ध)मण्डलाभ्यामेकेन परिपूर्णेन (मण्डलेन) इति भावः किं लभामहे ? राशित्रय-स्थापना १,८३५।१,८३०।२। [2]तत्रान्त्येन राशिना मध्यमस्य राशेर्गुणनं, जातानि [3]षट्त्रिंशच्छतानि षष्ट्यधिकानि ३,६६०। तत्र आद्येन राशिना १,८३५ भागहरणम्, लब्धमेकं १ (रात्रिन्दिवम्), शेषाणि तिष्ठन्ति अष्टादशशतानि पञ्चविंशत्यधिकानि १,८२५। ततो मुहूर्त्तानयनार्थमेतानि त्रिंशता गुण्यन्ते, जातानि चतुष्पञ्चाशत्सहस्राणि सप्तशतानि पञ्चाशदधिकानि ५४,७५०। तेषामष्टादशभिः शतैः पञ्चत्रिंशदधिकैर्भागे हृते लब्धा एकोनत्रिंशन्मुहूर्त्ताः २९। ततः शेषच्छेद्यच्छेदकराश्योः पञ्चकेनापवर्त्तना, जात उपरितनो राशिस्त्रीणि शतानि सप्तोत्तराणि ३०७, च्छेदकराशिस्त्रीणि शतानि सप्तषष्ट्यधिकानि ३६७। तत आगतमेकं (रात्रिन्दिवमेकस्य च) [4]रात्रिन्दिवस्य

१. तस्याऽऽत्मीयस्य - D, E। २. अत्रान्त्येन - N। ३. षष्ट्यधिकानि षट्त्रिंशच्छतानि - D, N, T।
४. रात्रिन्दिवसस्य - T।

एकोनत्रिंशन्मुहूर्त्ता एकस्य च मुहूर्त्तस्य सप्तषष्ट्यधि[कं](कत्रि)[त्रिं]श[त्](त)भागानां त्रीणि शतानि सप्तोत्तराणि १।२९।३०७/३६७। इदानीमेतदनुसारेण मुहूर्त्तगतिपरिमाणं चिन्त्यते। तत्र रात्रिन्दिवे त्रिंशन्मुहूर्त्ताः ३०। तेषूपरितना एकोनत्रिंशन्मुहूर्त्ता प्रक्षिप्यन्ते, जाता एकोनषष्टिर्मुहूर्त्तानाम्। ततः सवर्ण्णनार्थं त्रिभिः शतैः सप्तषष्ट्यधिकैर्गुण्यते, गुणयित्वा चोपरितनानि त्रीणि शतानि सप्तोत्तराणि प्रक्षिप्यन्ते, जातान्येकविंशति-सहस्राणि नवशतानि षष्ट्यधिकानि २१,९६०। ततस्त्रैराशिकं - यदि मुहूर्त्तग[तैः]-(त)सप्तषष्ट्यधिक[त्रिं](त्रि)श[त्](त)भागानामेकविंशतिसहस्रैर्नवभिः शतैः षष्ट्यधि-कैरेकं शतसहस्रमष्टानवतिशतानि मण्डलभागानां लभ्यन्ते तत एकेन मुहूर्त्तेन किं लभामहे ? राशित्रयस्थापना २१,९६०।१,०९,८००।१ तत्राद्यो राशिर्मुहूर्त्तगतसप्त-षष्ट्यधिक[त्रिं](त्रि)श[द्](त)भागरूपस्ततोऽन्त्योऽपि राशिस्त्रिभिः शतैः सप्तषष्ट्यधि-कैर्गुण्यते, जातानि त्रीण्येव शतानि सप्तषष्ट्यधिकानि ३६७। तैर्मध्यो राशिर्गुण्यते जाताश्चतस्रः कोटयो द्वे लक्षे षण्णवतिसहस्राणि षट्शतानि ४,०२,९६,६००। एतेषामाद्येन राशिना एकविंशतिसहस्राणि नवशतानि षष्ट्यधिकानीत्येवंरूपेण भागो ह्रियते, लब्धान्यष्टादशशतानि पञ्चत्रिंशदधिकानि १,८३५। एतावतो भागान्नक्षत्रं प्रतिमुहूर्त्तं गच्छति। तदेवं यतश्चन्द्रो यत्र तत्र वा मण्डले एकैकेन मुहूर्त्तेन मण्डलपरिक्षेपस्य सप्तदशशतान्यष्टषष्ट्यधिकानि भागानां गच्छति सूर्योऽष्टादशशतानि त्रिंशदधिकानि नक्षत्रमष्टादशशतानि पञ्चत्रिंशदधिकानि ततश्चन्द्रेभ्यः शीघ्रगतयः सूर्याः सूर्येभ्यः शीघ्रगतीनि नक्षत्राणि, ग्रहास्तु वक्रानुवक्रादिगतिभावतोऽनियतगति-प्रस्थाना[त्त](स्त)तो न तेषामुक्तप्रकारेण गतिप्रमाणप्ररूपणा कृता, उक्तञ्च **'चंदेहिं सिग्घयरा सूरा सूरेहिं होंति नक्खत्ता। अनिय(य)गइपत्थाणा हवंति सेसा गहा सव्[वा](वे)॥१५८॥ अट्ठारस पणतीसे भागसए गच्छइ मुहुत्तेणं। नक्खत्तं चंदो पुण सत्तरससए अट्ठ[ट्ठो](ट्ठे)॥१५९॥ अट्ठारसभागसए तीसे गच्छइ रवी मुहुत्तेण। नक्खत्तसीमच्छेओ सो चेव इहंपि नायव्वो॥१६०॥' (जो.प.)**

इदमुक्तं गाथात्रयमपि सुगमम्, नवरं नक्षत्रसीमाच्छेदः स एवात्रापि ज्ञातव्य इति। किमुक्तं भवति ? अत्रापि मण्डलमेकेन शतसहस्रेणाष्टानवत्या च शतैः प्रविभक्तव्यमिति। सम्प्रत्युक्तस्वरूपमेव चन्द्रसूर्यनक्षत्राणां परस्परं मण्डलभागविषयं विशेषं निर्द्धारयति- '**ता जया ण**'मित्यादि। '**ता**' इति पूर्ववत्, **यदा** '**ण**'मिति वाक्यालङ्कारे **चन्द्रं गतिसमापन्[ना](न)मपेक्ष्य सूर्यो गतिसमापन्नो** विवक्षितो **भवति,** किमुक्तं भवति ? प्रतिमुहूर्त्तं चन्द्रगतिमपेक्ष्य सूर्यगतिश्चिन्त्यते तदा सूर्यो **गतिमात्रया** एकमुहूर्त्तगतिपरिमाणमात्रया एकमहूर्त्तगतिपरिमाणेन **कियन्तं** - कियतो भागान् **विशेषयति** ? एकेन मुहूर्त्तेन चन्[द्रोक्ति](द्राक्र)मितेभ्यो भागेभ्यः कियतोऽधिकान् सूर्य आक्रामतीति भावः। भगवानाह- **द्वाषष्टिभागान् विशेषयति,** तथाहि - चन्द्र एकेन मुहूर्त्तेन सप्तदशभागशतान्यष्टषष्ट्यधिकानि १,७६८ गच्छति सूर्योऽष्टादशशतानि त्रिंशदधिकानि १,८३०। ततो भवति द्वाषष्टिभागकृतः परस्परविशेषः। '**ता जया ण**'मित्यादि। '**ता**' इति प्राग्वत्, **यदा चन्द्रं गतिसमापन्नमपेक्ष्य** [गत]**नक्षत्रं गतिसमापन्नं** विवक्षितं **भवति** तदा नक्षत्रं **गतिमात्रया**-एकमुहूर्त्तगतिपरिमाणेन **कियन्तं विशेषयति** ? चन्द्राक्रमितेभ्यो भागेभ्यः कियतो भागानधिकानाक्रामतीति भावः। भगवानाह - **सप्तषष्टिभागान्,** नक्षत्रं ह्येकेन मुहूर्त्तेनाष्टादशभागशतानि पञ्चत्रिंशदधिकानि गच्छति चन्द्रस्तु सप्तदशभागशतानि अष्टषष्ट्यधिकानि, तत उपपद्यते सप्तषष्टिभागकृतो विशेषः। '**ता जया ण**'मित्यादि प्रश्नसूत्रं प्राग्वद्भावनीयम्। भगवानाह - '**ता पंचे**'त्यादि। **पञ्चभागान् विशेषयति** सूर्याक्रान्तभागेभ्यो नक्षत्राक्रान्तभागानां पञ्चभिरधिकत्वात्, तथाहि - सूर्य एकेन मुहूर्त्तेन गच्छति अष्टादशभागशतानि त्रिंशदधिकानि नक्षत्रमष्टादशभागशतानि पञ्चत्रिंशदधिकानि, ततो भवति परस्परं पञ्चभागकृतो विशेषः। '**ता जया ण**'मित्यादि। '**ता**' इति पूर्ववत्, **यदा** '**ण**'मिति वाक्यालङ्कारे चन्द्रो गतिसमापन्नो भवति तदा **पौरस्त्याद्भागात्**प्रथमतो**ऽभिजिन्नक्षत्रं चन्द्रमसं समासादयति,** एतच्च

प्रागेव भावितम्, **समासाद्य च नव मुहूर्त्तान्** दशमस्य **मुहूर्त्तस्य सप्तविंशतिं सप्तषष्टिभागान् चन्द्रेण सार्द्धं योगं युनक्ति** - करोति, एतदपि प्रागेव भावितम्, ए[तदपि](वम्)प्रमाणं च कालं[च] **यो[गमु](गं यु)क्त्वा** पर्यन्तसमये **योगमनुपरिवर्त्तयति** श्रवणनक्षत्रस्य योगं समर्प्पयतीति भावः, **योगं** च परावर्त्त्य तेन सह योगं **विप्रजहाति**, किं बहुना ? [निर्ग](**विग**)**तयोगी चापि भवति**। '**ता जया ण**'मित्यादि। '**ता**' इति प्राग्वत् **यदा चन्द्रं गतिसमापन्न**मपेक्ष्य **श्रवणनक्षत्रं गतिसमापन्नं भवति** तदा तत् श्रवणनक्षत्रं प्रथमतः **पौरस्त्यात् भागात्** पूर्वेण भागेन चन्द्रमसं **समासादयति**[1] **समासाद्य** च **चन्द्रेण सार्द्धं त्रिंशतं मुहूर्त्तान्** यावत् **योगं युनक्ति**, एवम्प्रमाणं च कालं [च] यावत् **योगं युक्त्वा** पर्यन्तसमये **योगमनुपरिवर्त्तयति** धनिष्ठानक्षत्रस्य योगं समर्प्प[यति](यितु)मारभते इत्यर्थः, **योगमनुपरिवर्त्त्य** च [स्वे](ते)न **योगं** (**वि**)**प्रजहाति**, किं बहुना ? **विगतयोगी चापि भवति**। '**एव**'मित्यादि । **एवमुक्तेन** प्रकारेण **एतेनानन्तरोपदर्शितेना**(**भि**)-**लापेन** यानि **पञ्चदशमुहूर्त्तानि** शतभिषक्प्रभृतीनि यानि **त्रिंशन्मुहूर्त्तानि** नक्षत्राणि धनिष्ठाप्रभृतीनि यानि च **पञ्चचत्वारिंशत्मुहूर्त्तानि** उत्तरभद्रपदादीनि तानि सर्वाण्यपि क्रमेण [भावा](ताव)त् **भणितव्यानि यावदुत्तराषाढा**[2]। तत्राभिलापः सुगमत्वात् स्वयं भावनीयो ग्रन्थगौरवभयान्न लिख्यते इति। सम्प्रति ग्रहमधिकृत्य योगचिन्तां करोति - '**ता जया ण**'मित्यादि। '**ता**' इति पूर्ववत् **यदा** '**ण**'मिति वाक्यालङ्कारे **चन्द्रं गतिसमापन्न**मपेक्ष्य **ग्रहो गतिसमापन्नो** भवति तदा स [ङ्]ग्रहः **पौरस्त्याद्-भागात्पूर्वेण** भागेन प्रथमतश्चन्द्रमसं **समासादयति समासाद्य** च यथा(सम्भवं) **योगं युनक्ति** यथासम्भवं **योगं युक्त्वा** पर्यन्तसमये यथासम्भवं **योगमनुपरिवर्त्तयति** यथासम्भवमन्यस्य ग्रहस्य योगं समर्प्पयितुमारभते इति भावः, **योगमनुपरिवर्त्त्य** च [3]तेन सह **योगं विप्रजहाति**, किं बहुना ? **विगतयोगी चापि भवति**।

---

१. तहेव जहा अभीतिस्स णवरं तीसमुहुत्ते चंदेण सद्धिं जोगं जोएति जोगं २ जाव विगतजोगी यावि भविता - मूले। २. जाव उत्तरासाढा विगतजोगी यावि भवति। - मूले। ३. स्वेन - J।

अधुना सूर्येण सह नक्षत्रस्य योगचिन्तां करोति- '**ता जया ण**'मित्यादि। '**ता**' इति प्राग्वत्, **यदा सूर्यं गतिसमापन्नमपेक्ष्याभिजिन्नक्ष**[त्रस्य](**त्रं**) **गतिसमापन्नं** भवति तदा तदभिजिन्नक्षत्रं प्रथमतः **पौरस्त्याद्भागात्** सूर्यं **समासादयति समासाद्य च चतुरः** परिपूर्णा**नहोरात्रान्** पञ्चमस्य चाहोरात्रस्य **षड् मुहूर्त्तान्** यावत् **सूर्येण** सह (**योगं**) **युनक्ति**, एवम्प्रमाणं च कालं यावत् [१]**योगं युक्त्वा** पर्यन्तसमये **योगमनुपरिवर्त्तयति** श्रवणनक्षत्रस्य योगं समर्प्पयितुमार[भ्य](भ)ते इति भावः, **अनुपरिवर्त्त्य** च [२]तेन योगं **विजहाति**, किं बहुना ? **विगतयोगी चापि भवति**। '**एव**'मित्यादि। **एवमुक्ते**न प्रकारेण पञ्चदशमुहूर्त्तानां शतभिषक्प्रभृतीनां षट् अहोरात्राः सप्तमस्याहोरात्रस्य एकविंशतिमुहूर्त्तास्त्रिशन्मुहू[र्त्ताः](र्त्तानां) श्रवणादीनां त्रयोदश अहोरात्राश्चतुर्द्दशस्याहोरात्रस्य द्वादश मुहूर्त्ताः पञ्चचत्वारिंशन्मुहूर्त्तानामुत्तरभद्रपदादीनां विंशतिरहोरात्रा एकविंशतितमस्याहोरात्रस्य त्रयो मुहूर्त्ताः क्रमेण सर्वे तावद्**भणितव्या यावदुत्तराषाढा**नक्षत्रगतमभिलापं [३]साक्षाद्दर्शयति - '**ता जया ण**'मित्यादि सुगमम्। एतदनुसारेण शेषाः स्वयं वक्तव्याः सुगमत्वात्तु नोपदर्श्यन्ते। सम्प्रति सूर्येण सह ग्रहस्य योगचिन्तां करोति। '**ता जया ण**'मित्यादि सुगमम्।

अधुना चन्[द्रो](द्रा)दयो [न](ना)नक्षत्रेण मासेन कति मण्डलानि चरन्तीत्येतन्निरूपयितुकाम आह -

**मू० ता णक्खत्तेणं मासेणं चंदे कति मंडलाइं चरति ? ता तेरस मंडलाइं चरइ तेरस [स]य सत्तट्ठिभागाइं मंडलस्स। ता णक्खत्तेणं मासेणं सूरे कति मंडलाइं चरति ? (ता) तेरस मंडलाइं चरति चोत्तालीसं च सत्तट्ठिभागे मंडलस्स। ता णक्खत्तेणं मासेणं णक्खत्ते कति मंडलाइं चरति ? ता तेरस मंडलाइं चरइ अद्ध-**

---

१. जाव विगतजोगी यावि भवति। - मूले। २. स्वेन - H। ३. अत्र मूलानुसारेण टीका नास्ति। जाव उत्तरासाढा विगतजोगी तावि भवति। - मूले।

सीयालीसं च सत्तट्ठिभागाइं मंडलस्स। ता चंदेणं मासेणं चंदे कति मंडलाइं चरति ? ता चोद्दस सचउब्भागाइं मंडलाइं चरति एगं च चउवीससयभागं मंडलस्स। ता चंदेणं मासेणं सूरिए कति० पुच्छा ? ता पण्णरस चउब्भागूणाइं मंडलाइं चरति एगं चउव्वीस[ति](सय)-भागं मंडलस्स। ता चंदेणं मासेणं णक्खत्ते कति० पुच्छा? ता पण्णरस चउब्भागूणाइं मंडलाइं चरति छच्च चउवीस(सय)भागे मंडलस्स। ता उडुणा मासेणं चंदे कति मंडलाइं चरति ? ता चोद्दस मंडलाइं चरति तीसं च एगट्ठिभागे मंडलस्स। (ता) उडुणा मासेणं सूरे कति० पुच्छा ? ता पण्णरस मंडलाइं चरति। ता उडुणा मासेणं णक्खत्ते० पुच्छा ? ता पण्णरस मंडलाइं चरति पंच य बावी[से](स)-सतभागे मंडलस्स। ता आदिच्चेणं मासेणं चंदे कति मंडलाइं चरति ? ता चउद्दस मंडलाइं चरति एक्कारस य पण्णरसभागे मंडलस्स। (ता) आतिच्चेणं मासेणं सू[रि](रे) कति० पुच्छा ? ता पण्णरस चउभागाइं मंडलाइं चरति। (ता) आदिच्चेणं मासेणं णक्खत्ते पुच्छा ? ता पण्णरस (चउब्भागाइं) मंडलाइं चरति पंच य वीससतभागे मंडलस्स। ता अभिवड्ढिएणं मासेणं चंदे कति मंडलाइं चरति? ता पन्नरस मंडलाइं चरति तेसीयं च छलसी (य स)तभागे मंडलस्स। ता अभिवड्ढिएणं मासेणं सूरे० पुच्छा ? ता सोलस मंडलाइं चरति तिहिं भागेहिं ऊणाइं दोहिं अडयालेहिं (सएहिं) मंडलं छेत्ता। [१]ता अभिवड्ढिएणं मासेणं णक्खत्ते कति मंडलाइं चरति ? ता सोलस मंडलाइं चरइ सीतालीसाते भागेहिं अहिताइं चोद्दसहिं अट्ठासीतेहिं सतेहिं मंडलं छेत्ता।

१. ता एगमेगेणं अभिवड्ढिएणं मासेणं - V।

टी० **'ता नक्खत्तेण'**मित्यादि। **'ता'** इति पूर्ववत् **[न](ना)क्षत्रेण मासेन चन्द्रः कति मण्डलानि चरति ?** एवं गौतमेन प्रश्ने कृते भगवानाह - **'ता तेरसे'**-त्यादि। **त्रयोदशमण्डलानि** चतुर्द्दशस्य **मण्डलस्य [चतुर्द्द](त्रयोद)श सप्तषष्टिभागान्**। कथमेतदवसीयते इति चेत् ? उच्यते, त्रैराशिकबलात्, तथाहि - सप्तषष्ट्या [न](ना)क्षत्रैर्मासैरष्टौ शतानि चतुरशीत्यधिकानि यदि मण्डलानां लभ्यन्ते तत एकेन नाक्षत्रेण मासेन किं लभामहे ? राशित्रयस्थापना - ६७।८८४।१। अत्रान्त्येन राशिना मध्यराशेर्गुणनं, जातः स तावानेव। तस्य सप्तषष्ट्या भागहरणम्। लब्धानि त्रयोदशमण्डलानि चतुर्द्दशमण्डलस्य त्रयोदश सप्तषष्टिभागाः १३ १३/६७। **'ता नक्खत्तेण'**मित्यादि सूर्यविषयं प्रश्नसूत्रं सुगमम्। भगवानाह - **'ता तेरसे'**त्यादि। **त्रयोदश मण्डलानि** (चतुर्द्दशस्य च **मण्डलस्य**) **चतुश्चत्वारिं[शं]शतं सप्तषष्टिभागान्,** तथाहि - यदि सप्तषष्ट्या [न](ना)क्षत्रैर्मासैर्नव शतानि पञ्चदशोत्तराणि मण्डलानां सूर्यस्य लभ्यन्ते तत एकेन नाक्षत्रेण मासेन कति मण्डलानि लभामहे ? राशित्रयस्थापना - ६७।९१५।१। अत्रान्त्येन राशिना मध्यराशेर्गुणनम्, तत आद्येन राशिना भागहारो, लब्धानि त्रयोदशमण्डलानि [१]चतुर्द्दशस्य मण्डलस्य चतुश्चत्वारिंशद्भागाः १३ ४४/६७। **'ता नक्खत्ते'**त्यादि नक्षत्रविषयं प्रश्नसूत्रं सुगमम्। भगवानाह- **'ता तेरसे'**त्यादि। **त्रयोदश मण्डलानि** चतुर्द्दशस्य च **मण्डलस्यार्द्धसप्तचत्वारिंशतं** सार्द्धं [चतुः]षट्चत्वारिंशतं **सप्तषष्टिभागान्** चरति, तथाहि- यदि सप्तषष्ट्या [न](ना)क्षत्रैर्मासैरष्टादश शतानि पञ्चत्रिंशदधिकानि अर्द्धमण्डलानां नक्षत्रस्य लभ्यन्ते तत एकेन नाक्षत्रेण मासेन किं लभामहे ? राशित्रयस्थापना ६७।१,८३५।१। अत्रान्त्येन राशिना मध्यराशेर्गुणनम्, तत आद्येन राशिना भागहारो, लब्धानि सप्तविंशतिरर्द्धमण्डलानि अष्टाविंशतितमस्य चार्द्धमण्डलस्य षड्विंशतिः सप्तषष्टिभागाः २७ २६/६७। ततो द्वाभ्यामर्द्धमण्डलाभ्यामेक[२]मण्डलमित्यस्य राशेरर्द्ध-

१. चतुर्द्दशमण्डलस्य - G, T। २. .....मेकं मण्डल.... - B।

करणेन लब्धानि त्रयोदश मण्डलानि चतुर्दशस्य मण्डलस्य सार्द्धाः षट्चत्वारिंशत् सप्तषष्टिभागाः १३ $\frac{४६॥}{६७}$। सम्प्रति चन्द्रमासमधिकृत्य चन्द्रादीनां मण्डलनिरूपणां करोति - '**ता चंदेण**'मित्यादि। '**ता**' इति पूर्ववत्, **चान्द्रेण मासेन** प्रागुक्तस्वरूपेण **चन्द्रः कति मण्डलानि चरति** ? भगवानाह - '**ता चोद्दसे**'त्यादि। **चतुर्दश सचतुर्भागमण्डलानि** - चतुर्भागसहितानि मण्डलानि **चरति एकं च चतुर्विंश-शतभा[गान्](गं) मण्डलस्य**। किमुक्तं भवति ? परिपूर्णानि चतुर्दशमण्डलानि पञ्चदशस्य चतुर्भागं चतुर्विंशत्यधिकशतसत्कैत्रिंशद्भागप्रमाणमेकं (च) चतुर्विंशत्य-धिकशतस्य भागं - द्वात्रिंशतं पञ्चदशस्य मण्डलस्य चतुर्विंशत्यधिकशतभागान् चरतीति भावः, तथाहि - यदि चतुर्विंशत्यधिकेन पर्वशतेनाष्टौ शतानि चतुर-शीत्यधिकानि मण्डलानां लभ्यन्ते, ततो द्वाभ्यां प[र्वा](र्व)भ्यां किं लभामहे ? राशित्रयस्थापना- १२४।८८४।२। अत्रान्त्येन राशिना द्विकलक्षणेन मध्यराशेर्गुणनम्, जातानि सप्तदशशतानि अष्टषष्ट्यधिकानि १,७६८। तेषां [1]चतुर्विंशत्यधिकशतेन भागहरणम्, लब्धानि चतुर्दश मण्डलानि, पञ्चदशस्य च द्वात्रिंश[ति](त्) चतुर्विं-शत्यधिक(शत)भागाः १४।३२/१२४। '**ता चंदेण**'मित्यादि सूर्यविषयं प्रश्नसूत्रं सुगमम्। '**ता पन्नरसे**'त्यादि। **पञ्चदश चतुर्भागन्यूनानि मण्डलानि चरति एकं चतुर्विंशत्यधिकशतभागं मण्डलस्य** किमुक्तं भवति ? चतुर्दश (परि)पूर्णानि मण्डलानि (पञ्चदशस्य च) मण्डलस्य चतुर्नवतिं चतुर्विंशत्यधिकशतभागान् चरति, तथाहि - यदि चतुर्विंशत्यधिकेन पर्वशतेन नव शतानि पञ्चदशोत्तराणि मण्डलानां लभ्यन्ते ततो द्वाभ्यां पर्वभ्यां किं लभामहे ? राशित्रयस्थापना - १२४।९१५।२। अत्रान्त्येन राशिना मध्यराशेर्गुणनम्, जातान्यष्टादशशतानि त्रिंशदधिकानि १,८३०। एतेषामाद्येन राशिना चतुर्विंशत्यधिकशतरूपेण भागहरणम्, लब्धानि चतुर्दशमण्ड-लानि पञ्चदशस्य मण्डलस्य चतुर्नवतिश्चतुर्विंशत्यधिकशतभागाः १४। ९४/१२४।

---

१. चतुर्विंशत्यधिकेन शतेन - G।

'**ता चंदेण**'मित्यादि नक्षत्रविषयं प्रश्नसूत्रं सुगमम्। भगवानाह - '**ता पन्नरसे**'त्यादि। **पञ्चदश मण्डलानि चतुर्भागन्यूनानि चरति षट् चतुर्विंशत्यधिकशततम-भागान्मण्डलस्य**। किमुक्तं भवति ? परिपूर्णानि चतुर्द्दशमण्डलानि चरति पञ्चदशस्य च मण्डलस्य नवनवतिं चतुर्विंशत्यधिकशतभागान्, तथाहि - यदि चतुर्विंशत्यधिक-पर्वशतेनाष्टादशशतानि पञ्चत्रिंशदधिकानि अर्द्धमण्डलानां लभ्यन्ते ततो द्वाभ्यां पर्वभ्यां किं लभामहे ? राशित्रयस्थापना- १२४।१,८३५।२। अत्रान्त्येन राशिना द्विक-लक्षणेन मध्यराशेर्गुणनम्, जातानि षट्त्रिंशत् शतानि सप्तत्यधिकानि ३,६७०। तेषामाद्येन राशिना चतुर्विंशत्यधिकशतरूपेण भागहरणम्, लब्धा एकोनत्रिंशत् शेषा तिष्ठति चतुःसप्ततिः। इदं चार्द्धमण्डलगतं परिमाणम्, द्वाभ्यां चार्द्धमण्डलाभ्यामेकं परिपूर्णं मण्ड[ल](लम्, ततोऽ)स्य राशेर्द्विकेन भागहारो, लब्धानि चतुर्द्दशमण्डलानि पञ्चदशस्य च मण्डलस्य नवनवतिश्चतुर्विंशत्यधिकशतभागाः १४। ९९/१२४। साम्प्रतमृतुमासमधिकृत्य चन्द्रादीनां मण्डलानां निरूपणां करोति - '**ता** [1]**उउमा-सेण**'मित्यादि। ऋतुमासेन **चन्द्रः कति मण्डलानि चरति** ? भगवानाह - ('**ता चोद्दसे**'त्यादि।) **चतुर्द्दश मण्डलानि चरति** पञ्चदशस्य **मण्डलस्य त्रिंशत-मेकषष्टिभागान्**, तथाहि- (यदि) एकषष्ट्या कर्म्ममासैरष्टौ शतानि चतुरशीत्य-धिकानि मण्डलानां लभ्यन्ते, (तत) एकेन कर्म्ममासेन किं लभामहे ? राशित्रय-स्थापना- ६१।८८४।१। अत्रान्त्येन राशिना एकलक्षणेन मध्यराशेर्गुणनम्, जातः स तावानेव। तस्य एकषष्ट्या भागहरणम्, लब्धानि परिपूर्णानि चतुर्द्दश मण्डलानि पञ्चदशस्य मण्डलस्य त्रिंशदेकषष्टिभागाः १४।३०/६१। '**ता** [2]**उउमासेण**'मित्यादि सूर्यविषयं प्रश्नसूत्रं सुगमम्। भगवानाह- '**ता पन्नरसे**'त्यादि। **पञ्चदश** परिपूर्णानि **मण्डलानि चरति**, तथाहि- यद्येकषष्ट्या कर्म्ममासैर्नवशतानि पञ्चदशोत्तराणि सूर्यस्य मण्डलानां लभ्यन्ते, तत एकेन कर्म्ममासेन किं लभामहे ? राशित्रयस्थापना -

---

१-२. उडुणा मासेणं - मूले।

६१।९१५।१। अत्रान्त्येन राशिना एकलक्षणेन मध्यराशिर्गुण्यते, जातः स तावानेव। तस्य एकषष्ट्या भागहरणम्, लब्धानि परिपूर्णानि पञ्चदश मण्डलानि १५। **'ता उउमासेण'**[1]मित्यादि नक्षत्रविषयं प्रश्नसूत्रं सुगमम्। भगवानाह - **'ता पन्नरसे'**त्यादि। **पञ्चदश मण्डलानि चरति** षोडशस्य च **मण्डलस्य पञ्च द्वाविंशतिशतभागान्**, तथाहि - यदि द्वाविंशेन कर्ममासशतेनाष्टादशशतानि पञ्चत्रिंशदधिकानि (नक्षत्रस्य) मण्डलानां लभ्यन्ते तत एकेन कर्म्ममासेन किं लभामहे ? राशित्रयस्थापना १२२।-१,८३५।१। अत्रान्त्येन राशिना मध्यराशेर्गुणनम्, जातः स तावानेव। तस्याद्येन राशिना द्वाविंशत्यधिकशतरूपेण भागहरणम्, लब्धानि पञ्चदशमण्डलानि षोडशस्य पञ्च द्वाविंशशतभागाः १५।५/१२२। सम्प्रति सूर्यमासमधिकृत्य चन्द्रादीनां मण्डलानि निरूपयति - **'ता आइच्चेण'**मि[2]त्यादि। **'ता'** इति पूर्ववत्, **आदित्येन मासेन चन्द्रः** [3]**कानि मण्डलानि चरति**? भगवानाह - **'ता चउद्दसे'**त्यादि। **चतुर्दश मण्डलानि चरति**, पञ्चदशस्य **मण्डलस्य एकादश पञ्चदशभागान्**, तथाहि - यदि षष्ट्या सूर्यमासैरष्टौ शतानि चतुरशीत्यधिकानि मण्डलानां चन्द्रस्य लभ्यन्ते तत एकेन सूर्यमासेन किं लभामहे ? राशित्रयस्थापना - ६०।८८४।१। अत्रान्त्येन राशिना मध्यराशेर्गुणनम्, जातः स तावानेव। तस्य षष्ट्या भागहरणम्, लब्धानि चतुर्दशमण्डलानि, शेषास्तिष्ठन्ति चतुश्चत्वारिंशत् ४४। ततश्छेद्यच्छेदकराश्यो-श्चतुष्केनापवर्त्तनम्, जातः उपरितनो राशिरेकादशरूपोऽधस्तनः पञ्चदशरूपः, लब्धाः पञ्चदश(मण्डल)स्य एकादश पञ्चदश भागाः १४।११/१५। **'ता आइच्चेण'**मित्यादि सूर्यविषयं प्रश्नसूत्रं सुगमम्। भगवानाह - (**'ता पण्णरसे'**त्यादि।) **पञ्चदश चतुर्भागाधिकानि मण्डलानि चरति**, तथाहि - यदि षष्ट्या सूर्यमासैर्नवशतानि पञ्चदशोत्तराणि मण्डलानां सूर्यस्य लभ्यन्ते तत एकैकेन सूर्यमासेन किं लभामहे ? राशित्रयस्थापना ६०।९१५।१। अत्रान्त्येन राशिना एककलक्षणेन [4]मध्यराशेर्गुणनम्,

१. उडुणा मासेणं - मूले। २. इत्यादि - H। ३. कति - मूले। ४. मध्यमराशे..... - M।

जातः स तावानेव। तस्य षष्ट्या भागहरणम्, लब्धानि पञ्चदश मण्डलानि षोडशस्य च षष्टिभागप्रविभक्तस्य पञ्चदशभागात्मकश्चतुर्भागः १५ १५/६०। '**ता आइच्चेण**'-मित्यादि नक्षत्रविषयं प्रश्नसूत्रं सुगमम्। भगवानाह - '**ता पन्नरसे**'त्यादि। **पञ्चदश मण्डलानि चतुर्भागाधिकानि पञ्च** च [तुविं](विं)**शत्यधिकशतभागान्मण्डलस्य चरति**, किमुक्तं भवति ? षोडशस्य मण्डलस्य पञ्च[विं](त्रिं)शतं [पञ्च]विंशत्य-धिकशतभागान् [ह](च)रति, तथाहि - यदि विंशेन सूर्यमासशतेनाष्टादशशतानि पञ्च-त्रिंशदधिकानि मण्डलानां नक्षत्रस्य लभ्यन्ते तत एकेन सूर्यमासेन किं लभ्यते ? राशित्रयस्थापना - १२०।१,८३५।१। अत्रान्त्येन राशिना मध्यराशौ गुणिते जा[तस्]-(तः स) तावानेव। तस्य विंशत्यधिकशतेन भागहरणम्, लब्धानि पञ्च(दश)-मण्डलानि पञ्चत्रिंशत् (विंश)त्यधिकशतभागाः षोडशस्य १५ ३५/१२०। अधुना अभिवर्द्धितमासमधिकृत्य चन्द्रादीनां मण्डलानि निरूपयन्नाह - '**ता अभिवड्डि-एण**'मित्यादि। '**ता**' इति पूर्ववत्, **अभिवर्द्धितमासेन चन्द्रः कति मण्डलानि चरति** ? भगवानाह - '**ता पन्नरसे**'त्यादि। **पञ्चदश मण्डलानि चरति** षोडशस्य च **मण्डलस्य (त्र्यशीतिः षड)शीत्यधिकशतभागान्**, तथाह्यत्रैवं त्रैराशिकं - इह युगेऽभिवर्द्धितमासाः सप्तपञ्चाशत् सप्त चाहोरात्रा एकादश मुहूर्त्तास्त्रयोविंशतिश्च द्वाषष्टि(भागा) मुहूर्त्तस्य, ए[क](ष) च राशिः सां[सा](श) इति न त्रैराशिककर्म्म-विषयः। ततः परिपूर्णमासप्रतिपत्त्यर्थमयं राशिः षट्पञ्चाशदधिकेन शतेन गुण्यते, जातानि परिपूर्णानि नवाशीतिशतानि अष्टाविंशत्यधिकानि अभिवर्द्धितमासानाम्। किमुक्तं भवति ? षट्पञ्चाशदधिकशतसङ्ख्येषु युगेष्वेताव[ता](न्तः) परिपूर्णा अभिवर्द्धितमासा लभ्यन्ते, एतच्च द्वादशप्राभृते सूत्रकृतैव साक्षादभिहितम्। ततस्त्रै-राशिककर्म्मावसरो - यदि अष्टाविंशत्यधिकैरभिवर्द्धितमा[स](सैः) नवाशीतिशतैः षट्पञ्चाशदधिकशतसङ्ख्ययुगभाविभिश्चन्द्रमण्डलानामेकं लक्षं सप्तत्रिंशत् सहस्राणि नव शतानि चतुरुत्तराणि लभ्यन्ते तत एकेनाभिवर्द्धितमासेन किं लभामहे ?

राशित्रयस्थापना- ८,९२८।१,३७,९०४।१। अत्रान्त्येन राशिना एककलक्षणेन मध्यराशेस्ताडना, जातः स तावानेव। तस्याद्येन राशिना ८,९२८ भागहरणम्, लब्धानि पञ्चदश मण्डलानि १५, शेषमुद्धरति एकोनचत्वारिंशत् शतानि चतुरशीत्यधिकानि ३,९८४, ततश्छेद्यच्छेदकराश्योरष्टाचत्वारिंशताऽपवर्त्तना, जात उपरितनो राशिस्त्र्यशीतिरधस्तनः षडशीत्यधिकं शतं ८३/१८६। आगतं षोडशमण्डलस्य त्र्यशीतिः षडशीत्यधिकशतभागाः। '**ता अभिवड्ढिएण**'मित्यादि सूर्यविषयं प्रश्नसूत्रं सुगमम्। भगवानाह - '**सोलसे**'त्यादि। **षोडश मण्डलानि त्रिभिर्भागैर्न्यूनानि चरति**, मण्डलं **द्वाभ्यामष्टचत्वारिंशदधिकाभ्यां शताभ्यां छित्त्वा**, तथाहि - यदि षट्पञ्चाशदधिकशतसङ्ख्ययुगभाविभिरष्टाविंशत्यधिकैरभिवर्द्धितमासैर्नवाशीत्यधिकशतैः सूर्यमण्डलानामेकं लक्षं द्विचत्वारिंशत्सहस्राणि सप्त शतानि चत्वारिंशदधिकानि लभ्यन्ते तत एकेनाभिवर्द्धितमासेन किं लभामहे ? राशित्रयस्थापना ८,९२८।-१,४२,७४०।१। अत्रान्त्येन राशिना एककलक्षणेन मध्यराशिर्गुण्यते, जातः स तावानेव। तस्याद्येन राशिना ८,९२८ भागो ह्रियते, लब्धानि पञ्चदश मण्डलानि १५, शेषमुद्धरति अष्टाशीतिशतानि विंशत्यधिकानि ८,८२०। ततश्छेद्यछेदकराश्योः षट्त्रिंशताऽपवर्त्तना, जात उपरितनो राशिः द्वे शते पञ्चचत्वारिंशदधिके २४५, अधस्तनो द्वे शते अष्टाचत्वारिंशदधिके २४८। आगतं षोडशं (मण्डलं) त्रिभिर्भागैर्न्यूनं द्वाभ्यामष्टाचत्वारिंशदधिकशताभ्यां प्रविभक्तम्। '**ता अभिवड्ढिएण**'-मित्यादि नक्षत्रविषयं प्रश्नसूत्रं सुगमम्। भगवानाह- '**ता सोलसे**'त्यादि। **षोडश मण्डला[नां](नि) सप्तचत्वारिंशता भागैरधिकानि चतुर्दशभिः शतैरष्टाशीत्यधिकैर्मण्डलं छित्त्वा**, तथाहि - यदि षट्पञ्चाशदधिकशतसङ्ख्ययुगभाविभिरभिवर्द्धितमासैरेकोननवतिशतैरष्टाविंश[तेद्व्र्यशी]त्यधिकैर्नक्षत्रमण्डलानामेकं लक्षं त्रिचत्वारिंशत्सहस्राणि शतमेकं त्रिंशदधिकं लभ्यते, तत एकेनाऽभिवर्द्धितमासेन किं लभामहे ? राशित्रयस्थापना ८,९२८।१,४३,१३०।१। अत्रान्त्येन राशिना

[१]एककलक्षणेन मध्यराशेर्गुणनं, जातः स तावानेव। तस्याद्येन राशिना ८,९२८ भागो ह्रियते, लब्धानि षोडश मण्डलानि शेषमुद्धरति द्वे शते द्व्यशीत्यधिके २८२। ततश्छेद्यछेदकराश्योः षट्केनापवर्त्तना, जाता उपरि सप्तचत्वारिंशत् ४७, अधस्तनस्तु चतुर्द्दश शतान्यष्टाशीत्यधिकानि १,४८८। आगताः सप्तचत्वारिंशत् अष्टाशीत्यधिक-चतुर्द्दशशतभागाः।

सम्प्रत्येकैकेनाहोरात्रेण [२]चन्द्रादयः प्रत्येकं कति मण्डलानि चरन्तीत्येतन्निरू-पणार्थमाह -

**मू० ता एगमेगेणं अहोरत्तेणं चंदे कति मंडलाइं चरति ? ता [३]एगं अद्धमंडलं चरइ एक्कतीसाते भागेहिं ऊणं नवहिं य पण्णरसेहिं सतेहिं अद्धमंडलं छेत्ता। ता एगमेगेणं अहोरत्तेणं सूरे कति मंडलाइं चरति ? ता एगं अद्धमंडलं चरति। ता एगमेगेणं अहोरत्तेणं णक्खत्ते कति मंडलाइं चरति ? ता एगं अद्धमंडलं चरति दोहिं भागेहिं अहितं सत्तहिं [४]दुवत्तीसेहिं सतेहिं अद्धमंडलं छेत्ता। ता एगमेगण्णं मंडलं चंदे कतिहिं अहोरत्तेहिं चरति ? (ता) दोहिं अहोरत्तेहिं चरति एक्कतीसाते भागेहिं अहितेहिं चउहिं चउतालेहिं सएहिं राइंदियं छेत्ता। ता एगमे[गे](गं) णं मंडलं सूरे कतिहिं अहोरत्तेहिं चरति ? ता दोहिं अहोरत्तेहिं चरति। ता एगमेगण्णं मंडलं नक्खत्ते कइहिं अहोरत्तेहिं चरइ ? ता दोहिं अहोरत्तेहिं दोहिं भागेहिं ऊणेहिं तिहिं सत्तट्ठेहिं सतेहिं रातिंदियं छेत्ता। ता जुगेणं चंदे कति मंडलाइं चरति ? ता अट्ठचुलसीए (मंडलसते) चरति। ता जुगेणं सूरे कति मंडलाइं चरति ? ता णव पण्णरसे मंडलसते चरति। ता जुगेणं णक्खत्ते कति मंडलाइं चरति ? ता अट्ठारस पणतीसे दुभागमंडलसते चरति।**

१. एकलक्षणेन - G। २. चन्द्रादयः कति - N। ३. एगमेगं - U। ४. बत्तीसेहिं - P।

**इच्वेसा मुहुत्तगई रि[क्खगण](क्खाति)मासराइंदिय(जुग)मंडल-[जुग]पवि[व](भ)त्ती सिग्घगती (वत्थु) आहिता त्ति (बेमि)।**

**पण्णरसमं सम्मत्तं १५।**

टी० '**ता एगमेगेण**'मित्यादि। '**ता**' इति पूर्ववत्, **एकैकेनाहोरात्रेण चन्द्रः कति मण्डलानि चरति** ? भगवानाह - ('**ता एग**'मित्यादि।) **एकमर्द्धमण्डलं चरति एकत्रिंशता भागैर्न्यूनं नवभिः पञ्चदशोत्तरैः शतै[र्म](रर्द्धम)ण्डलं छित्त्वा**, तथाहि - रात्रिन्दिवानामष्टादशभिः शतैस्त्रिंशदधिकैः सप्तदशशतानि (अष्ट)षष्ट्यधिकानि अर्द्धमण्डलानां चन्द्रस्य लभ्यन्ते तत एकेन रात्रिन्दिवेन किं लभ्यते? राशित्रयस्थापना - १,८३०।१,७६८।१। अत्रान्त्येन राशिना [1]एककलक्षणेन [2]मध्यमराशेर्गुणनम्, जातः स तावानेव। तस्याद्येन राशिना १,८३० भागहरणम्। स चोपरितनस्य राशेः स्तोकत्वाद्भागं न ल[भ्य](भ)ते। त(तश्)छेद्यछेदकरा[3]श्योर्द्विकेनापवर्त्तना, जात उपरितनो राशिरष्टौ शतानि चतुरशीत्यधिकानि, अधस्तनो नव शतानि पञ्चदशोत्तराणि ८८४/९१५। तत आगतमेकत्रिंशता भागैर्न्यूनमेकमर्द्धमण्डलं नवभिः पञ्चदशोत्तरैः प्रविभक्तमिति। '**ता एगमेगेण**'मित्यादि सूर्यविषयं प्रश्नसूत्रं सुगमम्। भगवानाह- '**ता एग**'मित्यादि। **एकमर्द्धमण्डलं चरति**, एतच्च सुप्रतीतमेव। '**ता एगमेगेण**'मित्यादि नक्षत्रविषयं प्रश्नसूत्रं सुगमम्। भगवानाह - '**ता एग**'मित्यादि। **एकमर्द्धमण्डलं द्वाभ्यां भागाभ्यामधिकं च(रति) द्वात्रिंशदधिकैः सप्तभिः शतैरर्द्धमण्डलं छित्त्वा**, तथाहि - यद्यहोरात्राणामष्टादशभिः शतैस्त्रिंशदधिकैरष्टादशशतानि पञ्चत्रिंशदधिकानि नक्षत्राणामर्द्धमण्डलानि लभ्यन्ते तत एकेनाहोरात्रेण किं लभ्यते ? राशित्रयस्थापना - १,८३०।१,८३५।१। अत्रान्त्येन राशिना एककलक्षणेन [4]मध्यमराशेर्गुणनं, जातः स तावानेव, तस्याद्येन राशिना १,८३० भागहरणम्, लब्धमेकं मंडलं शेषास्तिष्ठन्ति प[ञ्चाशत्](ञ्च), ततश्छेद्यछेदकराश्योरर्द्ध-

१. एकलक्षणेन - D। २. मध्यराशे... - L, T। ३. ...राश्योरर्द्धेना... - G। ४. मध्यराशे... - H।

तृतीयैरपवर्त्तना, जाता उपरि द्वौ अधस्तात्सप्तशतानि द्वात्रिंशदधिकानि, लब्धौ द्वौ द्वात्रिंशदधिकसप्तशतभागौ २/७३२। अधुना एकैकपरिपूर्णमण्डलं चन्द्रादयः प्रत्येकं कतिभिरहोरात्रैश्चर(न्)तीति निरूपणार्थमाह - **'ता एगमेगण्ण'**मित्यादि। **'ता'** इति पूर्ववत्, [१]**एकैकं मण्डलं (चन्द्रः) कतिभिरहोरात्रैश्चरति** ? भगवानाह - **'ता दोहिं'** इत्यादि। **द्वाभ्यां अहोरात्राभ्यां चरति एकत्रिंशता भागैरधिकाभ्यां चतुर्भिश्चत्वारिंशदधिकैः शतैः रात्रिन्दिवं छित्त्वा,** तथाहि - यदि (चन्द्रस्य) मण्डलानामष्टभिः शतैश्चतुरशीत्यधिकैरहोरात्राणामष्टादशशतानि त्रिंशदधिकानि लभ्यन्ते तत एकेन मण्डलेन कति रात्रिन्दिवानि लभामहे ? राशित्रयस्थापना- ८८४।-१,८३०।१। अत्रान्त्येन राशिना मध्यराशेर्गुणनम्, जातः स तावानेव, तस्याऽऽद्येन राशिना चतुरशीत्यधिकाष्टशतप्रमाणेन भागहरणं, लब्धौ द्वौ चाहोरात्रौ, शेषा तिष्ठति द्वाषष्टिः ६२। ततश्छेद्यछेदकराश्योर्द्विकेनापवर्त्तना, जात उपरितनो राशिरेकत्रिंशद्रूपो अधस्तनश्चत्वारि शतानि द्विचत्वारिंशदधिकानि ३१/४४२। आगतं एकत्रिंशत् द्विचत्वारिंशदधिकचतुःशतभागाः। **'ता एगमेग'**मित्यादि। **'ता'** इति पूर्ववत्, **एकैकं मण्डलं सूर्यः कतिभिरहोरात्रैश्चरति** ? भगवानाह - **'ता दोहिं'** इत्यादि। **द्वाभ्यामहोरात्राभ्यां चरति,** तथाहि - यदि सूर्यस्य मण्डलानां नवभिः शतैः पञ्चदशोत्तरैरष्टादश शतानि त्रिंशदधिकानि अहोरात्राणां लभ्यन्ते तत एकेन मण्डलेन कति अहोरात्रान् लभामहे ? राशित्रयस्थापना - ९१५।१,८३०।१। अत्रान्त्येन राशिना मध्यराशिस्ताड्यते, जातः स तावानेव। तस्याद्येन राशिना ९१५ भागहरणम्, लब्धौ द्वावहोरात्राविति। **'ता एगमे[गे](गं) ण'**मित्यादि। **'ता'** इति पूर्ववत्, **एकै[केन](कमा)**त्मीय**मण्ड[ले](लं) नक्षत्रं कतिभिरहोरात्रैश्चरति** ? भगवानाह - **'ता दोहिं'** इत्यादि। **द्वाभ्यामहोरात्राभ्यां** चरति **द्वाभ्यां भागाभ्यां ऊनाभ्यां त्रिभिः सप्तषष्टैः** - सप्तषष्ट्यधिकैः **शतैः रात्रिन्दिवं छित्त्वा,** तथाहि - यदि

१. एकैकमण्डलं - D, H, K, T।

नक्षत्रस्य मण्डलानामष्टादशभिः शतैः पञ्चत्रिंशदधिकैः षट्त्रिंशत् शतानि षष्ट्यधिकानि रात्रिन्दिवानां लभामहे तत एकेन मण्डलेन किं लभामहे ? राशित्रयस्थापना - १,८३५।३,६६०।१। अत्रान्त्येन राशिना मध्यराशेस्ताडनम्, जातः स तावानेव, तस्याद्येन राशिना १,८३५ भागहरणम्, लब्धमेकं रात्रिन्दिवं शेषाणि तिष्ठन्त्यष्टादशशतानि पञ्चविंशत्यधिकानि १,८२५। ततश्छेद्यछेदकराश्योः पञ्चकेनापवर्त्तना, जात उपरितनो राशिः त्रीणि शतानि पञ्चषष्ट्यधिकानि छेदराशिस्त्रीणि शतानि सप्तषष्ट्यधिकानि ३६५/३६७। तत आगतं द्वाभ्यां सप्तषष्ट्यधिक(त्रि)शतभागाभ्यां हीनं द्वितीयं रात्रिन्दिवमिति। सम्प्रति चन्द्रादयः प्रत्येकं कति मण्डलानि युगे चरन्तीत्येतन्निरूपणार्थमाह - **'ता जुगेण'**मित्यादि। **'ता'** इति पूर्ववत्, **युगेन चन्द्रः कति मण्डलानि चरति** ? भगवानाह - **'ता अट्ठे'**त्यादि। **'ता'** इति पूर्ववत् **अष्टौ मण्डलशतानि चतुरशीत्यधिकानि चरति**, तथाहि - चन्द्र एकेन शतसहस्रेणाष्टानवत्या च शतैः प्रविभक्तस्य मण्डलस्याष्टषष्ट्यधिकसप्तदशशतसङ्ख्या(न्) भागानेकेन मुहूर्त्तेन गच्छति युगे च मुहूर्त्ताः सर्वसङ्ख्यया चतुष्पञ्चाशत्सहस्राणि नव शतानि, ततः सप्तदशशतान्यष्टषष्ट्यधिकानि चतुष्पञ्चाशता सहस्रैर्नवभिः शतैर्गुण्यते, जाता नव कोटयः सप्ततिर्लक्षास्त्रिषष्टिसहस्राणि द्वे शते ९,७०,६३,२००। *तत एतस्य राशेरेकेन शतसहस्रेणाष्टानवत्या शतैः १,०९,८०० मण्डलानयनाय भागो ह्रियते, लब्धानि अष्टौ शतानि चतुरशीत्यधिकानि मण्डलानामिति।* **'ता जुगेण'**मिति सूर्यविषयं प्रश्नसूत्रं सुगमम्। भगवानाह- **'ता नव पन्नरसे'**त्यादि। **'ता'** इति पूर्ववत्, [१]**नव मण्डलशतानि पञ्चदशानि** - पञ्चदशाधिकानि **चरति**, तथाहि - यदि द्वाभ्यामहोरात्राभ्यामेकं सूर्यमण्डलं लभ्यते ततः सकलयुगभाविभिरष्टादशभिरहोरात्रशतैस्त्रिंशदधिकैः कति मण्डलानि लभामहे ? राशित्रयस्थापना २।१।१,८३०। अत्रान्त्येन राशिना मध्यराशेरेकरूपस्य गुणनम्, जातान्यष्टादशशतानि त्रिंशदधिकानि

---

१. नव मण्डलशतानि पञ्चदशाधिकानि - H।

१,८३०। तेषामाद्येन राशिना द्विकरूपेण भागहरणम्, लब्धानि नवशतानि पञ्च-दशोत्तराणि ९१५। '**ता जुगेण**'मित्यादि नक्षत्रविषयं प्रश्नसूत्रं सुगमम्। भगवानाह - '**ता अट्ठारसे**'त्यादि। **अष्टादश द्विभागमण्डलशतानि**(-अर्द्धमण्डलशतानि) **पञ्चत्रिंशदधिकानि चरति**, तथाहि - नक्षत्रमेकेन शतसहस्रेणाष्टानवत्या च शतैः सुविभक्तस्य मण्डलस्य सत्कान् पञ्चत्रिंशदधिकाष्टादशशतसङ्ख्यान् भागानेकैकेन मुहूर्त्तेन गच्छ[ता](ति), युगे च मुहूर्त्ताः सर्वसङ्ख्यया चतुष्पञ्चाशत्सहस्राणि नव शतानि, ततस्तैश्चतुष्पञ्चाशता सहस्रैः नवभिः शतैरष्टादशशतानि पञ्चत्रिंशदधिकानि गुण्यन्ते, जाता दश कोटयः सप्त लक्षा एकचत्वारिंशत्सहस्राणि पञ्च शतानि १०,०७,४१,५००, अर्द्धमण्डलानि चेह ज्ञातुमिष्टानि, तत एकस्य शतसहस्रस्याष्टा-नवतेश्च शतानामर्द्धे यानि चतुष्पञ्चाशत्सहस्राणि नवशतानि तैर्विभागो ह्रियते, लब्धान्यष्टादशशतानि पञ्चत्रिंशदधिकान्यर्द्धमण्डलानामिति। सम्प्रति [का](सक)-लप्राभृतगतमुपसंहारमाह - '**इच्चेसा मुहुतगई**' इत्यादि। **इति** एवमुक्तेन प्रकारेण **एषा** अनन्तरोदिता **मुहूर्त्तगतिः** प्रतिमहूर्त्तं चन्द्रसूर्यनक्षत्राणां गतिपरिमाणं तथा **ऋक्षादिमासान्**-नक्षत्रमासं चन्द्रमासं सूर्यमासमभिवर्द्धितमासं तथा **रात्रिन्दिवं** तथा **युगं** चाधिकृत्य **मण्डलप्रविभ[क्त](क्तिः-)**मण्डलप्रविभागो वैविक्त्येन मण्डल-सङ्ख्याप्ररूपणा इत्यर्थः, तथा **शीघ्रगतिरूपं वस्तु आख्यातं इति** एतत् **ब्रवीमि** अहं। इदं च भगवद्वचनमतः सम्यक्श्रद्धेयम्।

इति श्रीमलयगिरिविरचितायां चन्द्रप्रज्ञप्तिटीकायां पञ्चदशं प्राभृतं समाप्तम्।

* * * * *

*गुणानां पालनं चैव, तथा वृद्धिश्च जायते।*
*यस्मात्सदैव स गुरु-र्भवकान्तारतायकः ॥*

## षोडशं प्राभृतम्

तदेवमुक्तं पञ्चदशं प्राभृतम्। सम्प्रति षोडशमारभ्यते। तस्य चायमर्थाधिकारो यथा कथं ज्योत्स्नालक्षणमाख्यातमिति? [ए]त[त्](त) एवंरूपमेव प्रश्नसूत्रमाह -

**मू० ता कहं ते दोसिणालक्खणे आहितेति वदेज्जा? ता (चंदलेसा दि य) दोसिणाति[आचंदलेस्साति आ] (य) दोसिणाति अ (चंदलेसादि य) [क्ख](के) अट्ठे किंलक्खणे ? ता एगट्ठे एगलक्खणे आहिता। ता सूरलेसाइ य आयवेइ [या] (य आतवेति य सूरलेस्सादि य) के अट्ठे किंलक्खणे ? ता एगट्ठे एगलक्खणे। ता (अंधकारेति य छायाइ य) छायाति य अंधकारे ति य [किं](के) अट्ठे किं लक्खणे ? ता एगट्ठे एगलक्खणे।**

**सोलसमं सम्मत्तं १६।**

**टी०** '**ता कहं ते**'त्यादि। '**ता**' इति पूर्ववत्, **कथं** - केन - प्रकारेण भगवन् ! **त्वया ज्योत्स्नालक्षणमाख्यातमिति वदेत्** ? एवं सामान्यतः पृ[ष्टा]-(ष्ट्वा) विवक्षित[पृ](प्र)ष्टव्यार्थप्रकटनाय विशेषप्रश्नं करोति - '**ता चंदलेसा**' इत्यादि। '**ता**' इति पूर्ववत्, **चन्द्र**(ग्रन्थाग्रं-८०००)**लेश्या इति ज्योत्स्ना इति** अनयोः पदयोरथवा **ज्योत्स्ना इति चन्द्रलेश्या** इत्यनयोः पदयोरिहाक्षराणा-मानुपूर्वीभेदेनार्थभेदो दृष्टो यथा [1]वदनं नवद इति, पदानामपि चानुपूर्व्वीभेददर्शनादर्थ-भेददर्शनं यथा पुत्रस्य (गुरुः) गुरोः पुत्र इति, तत इहापि कदाचिदानुपूर्व्वीभेदादर्थभेदो भविष्यतीति आशङ्कावशात् चन्द्रलेश्या इति ज्योत्स्ना इत्युक्त्वा ज्योत्स्ना इति (चन्द्र)लेश्या इत्युक्तम्। अनयोः पदयोः आनुपूर्व्या अनानुपूर्व्या [च](वा) स्थितयोः **कोऽर्थः** ? किं परस्परं भिन्न उताभिन्न इति ? स च **किंलक्षणः** - किंस्वरूपं लक्ष्यते - तदन्यव्यवच्छेदेन ज्ञायते येन (तत्) लक्षणमसाधारणं स्वरूपं यस्य स

१. वेदो देवो - S।

तथा। एवं प्रश्ने कृते भगवानाह - **'ता एगट्ठे एगलक्खणे'** इति। **'ता'** इति पूर्व्ववत्, चन्द्रलेश्या इति ज्योत्स्ना इत्यनयोः पदयोरानुपूर्व्या अनानुपूर्व्या (वा) व्यवस्थितयो**रेक** एवाभिन्न एवा**र्थः**, (य एव एकस्य पदस्य वाच्योऽर्थः) स एव द्वितीयस्यापीति भावः। **'एगलक्खणे'** इति **एक**मभिन्नं साधारणं **लक्षणं** यस्य स तथा, किमुक्तं भवति ? यदेव चन्द्रलेश्या इत्यनेन प[दयोर्न चान्य](देन वाच्य)-[स्य](स्या)साधारणं स्वरूपं प्रतीयते तदेव ज्योत्स्ना इत्यनेनापि पदेन यदेव च ज्योत्स्ना इति अनेन पदेन तदेव चन्द्रलेश्या इत्यनेनापि पदेनेति। एवं आतप[१] इति सूर्यलेश्या इति (यदिवा सूर्यलेश्या इति आतप इति), तथाऽन्धकार इति छाया इति अथवा छाया इति अन्धकार इति, एतेषु पदेषु विषये प्रश्ननिर्वचनसूत्राणि भावनीयानि।

इति श्रीमलयगिरिविरचितायां चन्द्रप्रज्ञप्तिटीकायां षोडशं प्राभृतं समाप्तम्।

* * * * *

*अहं ममेति मन्त्रोऽयं, मोहस्य जगदान्ध्यकृत्।*
*अयमेव हि नञ्पूर्वः, प्रतिमन्त्रोऽपि मोहजित्॥*

*अङ्गुष्ठमात्रामपि यः, प्रतिमां परमेष्ठिनः।*
*कारयेदाप्य शक्रत्वं, स लभेत्परमं पदम्॥*

*परं ज्ञानफलं वृत्तं, विभूतिर्न गरीयसी।*
*तया हि वर्धते कर्म, सद्वृत्तेन विमुच्यते॥*

---

१. सूरलेसाइ य आयवेइ य, आतवेति य सूरलेस्सादि य - मूले।

## सप्तदशं प्राभृतम्

तदेवमुक्तं षोडशं प्राभृतम्। सम्प्रति सप्तदशमारभ्यते। तस्य चायमर्थाधिकारश्च्यवनोपपातौ वक्तव्याविति। ततस्तद्विषयं प्रश्नसूत्रमाह -

**मू० ता कहं ते चयणोववाता आहिताति वदेज्जा ? तत्थ खलु इमातो पणुवीसं पडिवत्तीओ पण्णत्तातो। तत्थेगे एवमाहंसु ता अणुसमयमेव चंदिमसूरिया अण्णे चयंति अण्णे उववज्जंति आहिताति वदेज्जा। एगे एव०। एगे पुण० ता अणुमुहुत्तमेव चंदिमसूरिता अण्णे चयंति अण्णे उववज्जंति आहिताति वदेज्जा। एवं जाव [जच्च्][1]-(जाओ) चेवोयाए संठितीए पणुवीसं पडिवत्तीतो तातो एत्थंपि भाणितव्वातो जाव ता अणुसप्पिणीओस्सप्पिणिमेव चंदिमसूरिता अण्णे चयंति अण्णे उववज्जंति आहिताति वदेज्जा। एगे एवमाहंसु।**

**टी०** '**ता कहं ते**' इत्यादि। '**ता**' इति पूर्ववत्, **कथं** - केन प्रकारेण भगवन् ! **त्वया** चन्द्रादी[नामु]नां **च्यवनोपपाता आख्याताविति वदेत्** ? सूत्रे च द्वित्वे बहुवचनं प्राकृतत्वात्। तथा चोक्तं '**बहुवयणेण दुवयण**'मिति। एवं प्रश्ने कृते भगवान् एतद्विषये यावत्यः प्रतिपत्तयः तावतीरुपदर्शयति - '**तत्थे**'त्यादि। **तत्र** च्यवनोपपातविषये **खल्विमा** वक्ष्यमाणस्वरूपाः **पञ्चविंशतिः प्रतिपत्तयः** परतीर्थिकाभ्युपगमरूपाः **प्रज्ञप्तास्तद्यथा** '**तत्थे**'त्यादि। **तत्र** तेषां पञ्चविंशतेः परतीर्थिकानां मध्ये **एके** परतीर्थिका **एवमाहुः** '**ता**' इति तेषां प्रथमं स्वशिष्यं प्रत्यनेकवक्तव्यतोपक्रमे क्रमोपदर्शनार्थः, **अनुसमयमेव चन्द्रसूर्या अन्ये** पूर्वोत्पन्नाश्**च्यवन्ते** च्यवमाना **अन्येऽपूर्वा उत्पद्यन्ते** - उत्पद्यमाना **आख्याता इति वदेत्**। अत्रोपसंहारः - '**एगे एवमाहंसु १**'। **एके पुनरेवमाहुः अनुमुहूर्त्तमेव चन्द्रसूर्या अन्ये** पूर्वोत्पन्नाश्**च्यवन्ते** - च्यवमाना **अन्ये** अपूर्वा **उत्पद्यन्ते** उत्पद्यमाना **आख्याता इति वदेत्**,

---

१. जच्चेव तावसंठितीए - H, P।

उपसंहारवाक्यं **'एगे एवमाहंसु २।'** **'एवं जाओ चेवे'**त्यादि। **एवमुक्तेन** (प्रकारेण) **या एव** प्राक् षष्ठे प्राभृते **ओजःसंस्थितौ** चिन्त्यमानायां **पञ्चविंशतिप्रतिपत्तय उक्तास्ता एवात्रापि भणितव्या यावत्** [१]**'अणुउसप्पिणी ओसप्पिणिमेवे'**त्यादि चरमसूत्रम्, ताश्चैवं भणितव्याः- **'(एगे पुण०) ता अणुराइंदियमेव चंदिमसूरिया अन्ने चयंति अन्ने उववज्जंति आहियत्ति वएज्जा। एगे एवमाहंसु ३। एगे पुण एवमाहंसु-ता अणुपक्खमेव चंदिमसूरिया अन्ने चयंति अन्ने उववज्जंति आहियत्ति वएज्जा। एगे एवमाहंसु ४। एगे पुण एवमाहंसु ता अणुमासमेव चंदिमसूरिया अन्ने चयंति अन्ने उववज्जंति आहियत्ति वएज्जा। एगे एवमाहंसु ५। एवं ता अणुउउमेव ६। ता अणुअयणमेव ७। ता अणुसंवच्छरमेव ८। ता अणुजुगमेव ९। ता अणुवाससयमेव १०। ता अणुवाससहस्समेव ११। ता अणुवाससयसहस्समेव १२। ता अणुपुव्वमेव १३। ता अणुपुव्वसयमेव १४। ता अणुपुव्वसहस्समेव १५। ता अणुपुव्वसयसहस्समेव १६। ता अणुपलिओवममेव १७। ता अणुपलिओवमसयमेव १८। ता अणुपलिओवमसहस्समेव १९। ता अणुपलिओवमसयसहस्समेव २०। ता अणुसागरोवममेव २१। ता अणुसागरोवमसयमेव २२। ता अणुसागरोवमसहस्समेव २३। ता अणुसागरोवमसयसहस्समेव २४।'** पञ्चविंशतितमप्रतिप[त्तिं](त्तिसूत्रं) साक्षादेव सूत्रकृता दर्शितम्।

तदेवमुक्ताः परतीर्थिकप्रतिपत्तयः, एताश्च सर्वा अपि मिथ्यारूपास्तत एतेभ्यः पृथग्भूतं स्वमतं भगवानुपदर्शयति-

**मू० वयं पुण एवं वदामो - ता चंदिमसूरिया णं देवा महिड्ढिया महाजुइया महाजसा महाबला महाणुभावा महासुक्खा वरवत्थधरा वरमल्लधरा वरगंधधरा वराभरणधरा अव्वोच्छित्तिनयट्ठताए (काले)**

---

१. अणुसप्पिणी......मूले, अणुओसप्पिणीउस्सप्पिणिमेव - T।

**अण्णे चयंति अण्णे उववज्जंति आहितातिं वदेज्जा।**

**सत्तरसमं १७।**

**टी०** **'वयं पुण'** इत्यादि। **वयं पुनरुत्पन्नकेवलज्ञाना एवं** वक्ष्यमाणेन प्रकारेण **वदाम**स्तमेव प्रकारमाह - **'ता चंदिमे'**त्यादि। **'ता'**इति पूर्ववत्, **चन्द्रसूर्या 'ण'**मिति वाक्यालङ्कारे **देवा महर्द्धिका** - महती ऋद्धिर्विमान- परिवारादिका येषां ते तथा, तच्च महर्द्धिकत्वमग्रे स्वयमेव वक्ष्यति, तथा महती द्युतिः शरीराभरणाश्रिता येषां ते **महाद्युतयः**, तथा महद्विस्तीर्णं सर्वस्मिन्नपि जगति विस्तृतत्वात् यशः श्लाघा येषां ते **महायशसः**, तथा महद्बलं शारीरं येषां ते **महाबलाः**, तथा महान् अनुभावो - वैक्रियकरणादिविषयोऽचिन्त्यशक्तिविशेषो येषां ते **महानुभावाः**, तथा महत् - भवनपतिव्यन्तरेभ्योऽतिप्रभूतं तदपेक्षया [ये](ते)षां प्रशान्तत्वात्सौख्यं येषां ते **महासौख्याः**, तथा **वरवस्त्रधरा वरमाल्यधरा वरगन्धधरा वराभरणधरा अव्यवच्छित्तिनयापेक्षया** द्रव्यास्तिकनयमते(न) **का[लं](ले)** वक्ष्यमा[णं](णप्र- माण)स्वस्वायुर्व्यवच्छे[दं](दे) **अन्ये** पूर्वोत्पन्नाश्**च्यवन्ते** च्यवमाना **अन्ये** तथा- जगत्स्वाभाव्यात् षण्मासादारतो नियमत **उत्पद्यन्ते** उत्पद्यमाना **आख्याता इति वदेत्** स्वशिष्येभ्यः।

इति श्रीमलयगिरिविरचितायां चन्द्रप्रज्ञप्तिटीकायां सप्तदशं प्राभृतं समाप्तम्।

* * * * *

*निर्वाणपदमप्येकं, भाव्यते यन्मुहुर्मुहुः।*
*तदेव ज्ञानमुत्कृष्टं, निर्बन्धो नास्ति भूयसा॥*

*गुरुत्वं स्वस्य नोदेति, शिक्षासात्म्येन यावता।*
*आत्मतत्त्वप्रकाशेन, तावत् सेव्यो गुरूत्तमः॥*

## अष्टादशं प्राभृतम्

तदेवमुक्तं सप्तदशं प्राभृतम्। सम्प्रत्यष्टादशमारभ्यते। तस्य चायमर्थाधिकारो यथा चन्द्रसूर्यादीनां भूमेरूर्ध्वमुच्चत्वप्रमाणं वक्तव्यमिति। ततस्तद्विषयं प्रश्नसूत्रमाह-

**मू० ता कहं ते उच्चत्ते आहितातित वदेज्जा? तत्थ खलु इमातो [1]पंचवीसं पडिवत्तीओ पण्णत्ताओ। तत्थेगे एवमाहंसु - ता एगं जोयणसहस्सं सूरे उड्ढं उच्चत्तेणं दिवड्ढं चंदे। एगे०। एगे पुण० ता दो जोयणसहस्साइं सूरे उड्ढं उच्चत्तेणं अड्ढाइज्जाइं चंदे। एवं एएणं अभिलावेणं तिण्णि जोयणसहस्साइं सूरे उड्ढं उच्च० अद्धुट्ठातिं चंदे, ता चत्तारि जोयणसहस्साइं सूरे उड्ढं उच्चत्तेणं अद्धपंचमाइं चंदे, ता पंचजोयणसहस्साइं सूरे उड्ढं उच्च० अद्धछट्ठाइं चंदे, एवं छ सूरे अद्धसत्तमाइं चंदे, सत्त सूरे अद्धट्ठमाइं चंदे, अट्ठ सूरे अद्धनवमातिं चंदे, णव सूरे अद्धदसमाइं चंदे, दस सूरे अद्धेक्कारसमाइं चंदे, एक्कारस सूरे अद्धबारसमाइं चंदे, बारस सूरे अद्धतेरसमाइं चंदे, तेरस सूरे अद्धचोद्दसमाइं चंदे, [2]चउदस सूरे अद्धपण्णरसमाइं चंदे, पण्णरस सूरे अद्धसोलसमाइं चंदे, सोलस सूरे अद्धसत्तरसमाइं चंदे, सत्तरस सूरे अद्धट्ठारसमाइं चंदे, अट्ठारस सूरे अद्धएकूणवीसतिमाइं चंदे, एगूणवीसाइं सूरे अद्धवीसतिमाइं चंदे, वीसं सूरे अद्धेक्कवीसतिमाइं चंदे, एक्कवीसं सूरे अद्धबावीसतिमाइं चंदे, बावीसं सूरे अद्ध-तेवीसतिमाइं चंदे, तेवीसं सूरे अद्धचउवीसतिमाइं चंदे, चउवीसं सूरे अद्धपणुवीसतिमाइं चंदे, एगे एवमाहंसु। एगे पुण० ता पणुवीसं च जोयणसहस्साइं सूरे उड्ढं उच्चत्तेणं अद्धछव्वीसतिमाइं चंदे, एगे एवमाहंसु।**

---

१. पणुवीसं - U। २. चोद्दस - U।

**टी०** '**ता कहं ते**'इत्यादि। '**ता**' इति पूर्व्ववत्, **कथं**-केन प्रकारेण भगवन् ! **त्वया** भूमेरूद्र्ध्वं चन्द्रादीना**मुच्चत्वमाख्यातमिति वदेत्**? एवं प्रश्ने कृते भगवान् एतद्विषये यावत्यः प्रतिपत्तयस्तावतीरुपदर्शयति - '**तत्थे**'त्यादि, **तत्र** उच्चत्वविषये **खल्विमा** वक्ष्यमाणस्वरूपाः **पञ्चविंशतिः प्रतिपत्तयः** परतीर्थिकाभ्युपगमरूपाः **प्रज्ञप्ता**स्ता एव '**तत्थेगे**'इत्यादिना दर्शयति, **तत्र** तेषां पञ्चविंशतेः परतीर्थिकानां मध्ये **एके** परतीर्थिका **एवमाहुः** '**ता**' इति पूर्ववत्, **एकं योजनसहस्रं सूर्यो भूमेरूद्र्ध्वमुच्चत्वेन** व्यवस्थितो **द्व्यर्द्धं** [1]सार्द्धं च योजनसहस्रं भूमेरूद्र्ध्वं **चन्द्रः**, किमुक्तं भवति ? भूमेरूद्र्ध्वं योजनसहस्रे गतेऽत्रान्तरे सूर्यो व्यवस्थितः सार्द्धे च योजनसहस्रे गतेऽत्रान्तरे चन्द्रः, सूत्रे च योजनसङ्ख्यापदस्य (सूर्यादिपदस्य) च तुल्याधिकरण[त्वात्](त्व)निर्देशोऽभेदोपचारात् यथा पाटलिपुत्रात् राजगृहं नवयोजना-नीत्या[दि](दौ)। एवमुत्तरेष्वपि सूत्रेषु भावनीयमत्रोपसंहारमाह - '**एगे एवमाहंसु १**'। **एके पुनरेवमाहुः** '**ता**' इति पूर्व्ववत्, **द्वे योजनसहस्रे सूर्यो** भूमे**रूद्धर्व** व्यवस्थितः **अर्द्धतृतीयानि** योजनसहस्राणि **चन्द्रः** २। '**एव**'मित्यादि। एवमुक्तेन प्रकारेण **एते-नानन्तरोदितेनाभिलापेनो**त्तरसूत्राण्यपि वक्तव्यानि, तानि चैवं '**तिण्णी**'त्यादि। '**एगे पुण एवमाहंसु - (ता) तिन्नि जोयणसहस्साइं (सूरे) उड्ढं उच्चत्तेणं अद्धुट्ठाइं चंदो। एगे एवमाहंसु ३।**' '**ता चत्तारी**'त्यादि। '**एगे पुण एवमाहंसु - ता चत्तारि जोयणसहस्साइं सूरे उड्ढं उच्चत्तेणं अद्धपंचमाइं चंदे। एगे एवमाहंसु ४।**' '**ता पंचे**'त्यादि। '**एगे पुण एवमाहंसु - (ता) पंच जोयणसहस्साइं सूरे उड्ढं उच्चत्तेणं अद्धछट्ठाइं चंदे। एगे एवमाहंसु ५।**' एवं '**छ सूरे अद्धसत्तमाइं चंदे**' इति। '**एगे पुण एवमाहंसु - ता छ जोयणसहस्साइं सूरे उड्ढं उच्चत्तेणं अद्धसत्तमाइं चंदे। एगे एवमाहंसु ६।**' '**सत्त सूरे अद्धट्ठमाइं चंदे**'इति। '**एगे पुण एवमाहंसु - ता सत्त जोयणसहस्साइं सूरे उड्ढं उच्चत्तेणं अद्धट्ठमाइं चंदे।**

---

१. सार्द्धं योजन.... - D।

एगे एवमाहंसु ७।' 'अट्ठ सूरे अद्धनवमाइं चंदे' इति। 'एगे पुण एवमाहंसु - ता अट्ठ जोयणाइं सूरे उड्ढं उच्चत्तेणं अद्धनवमाइं चंदे, एगे एवमाहंसु ८।' 'नव सूरे अद्धदसमाइं चंदे' इति। 'एगे पुण एवमाहंसु- ता नव जोयण-सहस्साइं सूरे उड्ढं उच्चत्तेणं अद्धदसमाइं चंदे। एगे एवमाहंसु ९।' 'दस सूरे [1]अद्धएक्कारसाइं चंदे' इति। 'एगे पुण एवमाहंसु - ता दस जोयणसहस्साइं सूरे उड्ढं उच्चत्तेणं अद्धएक्कारसाइं चंदे। एगे एवमाहंसु १०।' 'एक्कारस सूरे अद्धबारस(माइं) चंदे' इति। 'एगे पुण एवमाहंसु - ता [बारस](एक्कारस) जोयणसहस्साइं सूरे उड्ढं उच्चत्तेणं अद्धबारस(माइं) चंदे। एगे एवमाहंसु ११।' 'बारस सूरे [2]अद्धतेरसाइं चंदे' इति। 'एगे पुण एवमाहंसु- ता बारस जोय[णा](णसहस्सा)इं सूरे उड्ढं उच्चत्तेणं अद्धतेरसमाइं चंदे। एगे [पुण] एवमाहंसु १२।' 'तेरस सूरे [3]अद्धचउदसमाइं चंदे' इति। 'एगे पुण एवमाहंसु - ता तेरस जोयणसहस्साइं सूरे उड्ढं उच्चत्तेणं अद्धचोद्दसमाइं चंदे। एगे एवमाहंसु १३।' '[4]चोद्दस सूरे अद्धपन्नरसमाइं चंदे' इति। 'एगे पुण एवमाहंसु - ता चोद्दसजोयणसहस्साइं सूरे उड्ढं उच्चत्तेणं अद्धपन्नरसमाइं चंदे। एगे एवमाहंसु १४।' '[ते] (पन्न)रस सूरे अद्धसोलसमाइं चंदे' इति। 'एगे पुण एवमाहंसु - ता पन्नरसजोयणसहस्साइं सूरे उड्ढं उच्चत्तेणं अद्धसोलसमाइं चंदे। एगे एवमाहंसु १५।' 'सोलस सूरे अद्धसत्तरसमाइं चंदे' इति। 'एगे पुण एवमाहंसु - ता सोलस जोयणसहस्साइं सूरे उड्ढं उच्चत्तेणं अद्धसत्तरसमाइं चंदे। एगे एवमाहंसु १६।' 'सत्तरस सूरे अद्धट्ठारसमाइं चंदे' इति। 'एगे एवमाहंसु - ता सत्तरसजोयणसहस्साइं सूरे उड्ढं उच्चत्तेणं अद्धट्ठारसमाइं चंदे। एगे एवमाहंसु १७।' 'अट्ठारस सूरे अद्धएगूणवीसमाइं चंदे' इति। 'एगे पुण एवमाहंसु - ता अट्ठारसजोयणसहस्साइं सूरे उड्ढं उच्चत्तेणं अद्धएगूणवीसमाइं

---

१. अद्धेक्कारसमाइं - मूले। २. अद्धतेरसमाइं - मूले। ३. अद्धचोद्दसमाइं - मूले। ४. चउदस - मूले।

**चंदे। एगे एवमाहंसु १८।' 'एगूणवीसं सूरे अद्धवीसमाइं चंदे'** इति। **'एगे एवमाहंसु - ता एगूणवीसं जोयणसहस्साइं सूरे उड्ढं उच्चत्तेणं अद्धवीसमाइं चंदे। एगे एवमाहंसु १९।' 'वीसं सूरे अद्धएक्कवीसमाइं चंदे'** इति। **'एगे पुण एवमाहंसु - ता वीसं जोयणसहस्साइं सूरे उड्ढं उच्चत्तेणं अद्धएक्कवीसमाइं चंदे। एगे एवमाहंसु २०।' 'एक्कवीसं सूरे अद्धबावीसमाइं चंदे'** इति। **'एगे पुण एवमाहंसु - ता एक्कवीसं जोयणसहस्साइं सूरे उड्ढं उच्चत्तेणं अद्धबावीसमाइं चंदे। एगे एवमाहंसु २१।' 'बावीसं सूरे अद्धतेवीसमाइं चंदे'**इति। **'एगे पुण एवमाहंसु - ता बावीसं जोयणसहस्साइं सूरे उड्ढं उच्चत्तेणं अद्धतेवीसमाइं चंदे। एगे एवमाहंसु २२।' 'तेवीसं सूरे अद्धचउवीसमाइं चंदे'** इति। **'एगे पुण एवमाहंसु - ता तेवीसं जोयणसहस्साइं सूरे उड्ढं उच्चत्तेणं अद्धचउवीसमाइं चंदे। एगे एवमाहंसु २३।' 'चउवीसं सूरे अद्धपंचवीसमाइं चंदे'** इति। **'एगे पुण एवमाहंसु - ता चउवीसं जोयणसहस्साइं सूरे उड्ढं उच्चत्तेणं अद्धपंचवीसमाइं चंदे। एगे एवमाहंसु २४।'** पञ्चविंशतितमप्रतिपत्तिसूत्रं साक्षाद्दर्शयति - **'एगे पुण एवमाहंसु - ता पणवीस'**मित्यादि। [1]एतानि च सूत्राणि सर्वाण्यपि सुगमत्वात् स्वयं भावनीयानि।

तदेवमुक्ताः परप्रतिपत्तयः। सम्प्रति स्वमतं भगवानुपदर्शयति -

**मू० वयं पुण एवं वदामो-ता इमीसे णं रयणप्पभाए पुढवीए बहुसमरमणिज्जातो भूमिभागातो सत्तणउते जोयणसते अबाहाए हेट्ठिल्ले तारारूवे चारं चरति, अट्ठ जोयणसए अबाहाए सूरविमाणे चारं चरति, अट्ठासीए जोयणसए अबाहाए चंदविमाणे चारं चरइ, णव जोयणसते अबाहाए उवरिल्ले तारारूवे चारं चरति। ता हिट्ठिल्लातो णं तारारूवातो दस जोयण अबाहाते सूरविमाणे चारं चरति, (नउतिं**

---

१. एतानि सूत्राणि - T।

**जोयणाइं उड्ढं उप्पतित्ता चंदविमाणे चारं चरति, दसोत्तरं जोयणसतं उड्ढं उप्पतित्ता उवरिल्ले) [ततो णं](तारारूवे चारं चरति। ता सूर-विमाणातो) असीतीजोयणे अबाहाए चंदविमाणे चारं चरति। एवं जहेव जीवाभिगमे तहेव णेयव्वं सव्वब्भंतरिल्लं चारं संठाणं पमाणं वहंती सीहगती इड्ढितारंतरं अग्गमहिसीतो ठितिं अप्पबहुयं जाव तारातो संखेज्जगुणातो।**

## अट्ठारसमं पाहुडं समत्तं १८।

**टी० 'वयं पुण'** इत्यादि। **वयं पुनरुत्पन्नकेवलज्ञाना एवं** वक्ष्यमाणेन प्रकारेण **वदामस्त**मेव प्रकारमाह-'**ता इमीसे**'इत्यादि। '**ता**' इति पूर्ववत्, **अस्या रत्न-प्रभायाः पृथिव्या बहुसमरमणीयात् भूमिभागात्** ऊर्द्ध्वं **सप्तयोजनशतानि नवत्यधिकानि अबाधया** कृत्वा इति गम्यते अन्तरीकृत्येतिभावः, अत्रान्तरेऽ-धस्त[नो](नं **तारा)रूपं** ज्योतिश्चक्रं **चारं चरति** मण्डलगत्या परिभ्रमणं प्रतिपद्यते। तथा अस्या एव रत्नप्रभायाः पृथिव्या बहुसमरमणीयात् भूमिभागात् ऊर्द्ध्व**मष्टौ योजनशतान्यबाधया** कृत्वा अत्रान्तरे **सूर्यविमानं चारं चरति**। तथा अस्या रत्नप्रभायाः पृथिव्या बहुसमरमणीयाद् भूमिभागादूर्द्ध्वं **अष्टौ योजनशतानि अशीत्यधिकान्यबाधया** कृत्वाऽत्रान्तरे **चन्द्रविमानं चारं चरति**। तथा अस्या एव रत्नप्रभायाः पृथिव्या बहुसमरमणीयभूमिभागात् ऊर्द्ध्वं परिपूर्णानि **नव योजनशतानि अबाधया** कृत्वा **उपरितनं** - सर्वोपरिवर्त्ति **तारारूपं** ज्योतिश्चक्रं **चारं चरति**। '**ता हिट्ठिल्लाओ ण**'मित्यादि। '**ता**' इति **तत** इदमापन्नं - **अधस्त-नात्तारारूपात्** ज्योतिश्चक्रादूर्द्ध्वं **दशयोजनान्यबाधया** कृत्वाऽत्रान्तरे **सूर्यविमानं चारं चरति**। तस्मादेवाधस्तनात्तारारूपात् ज्योतिश्चक्रादूर्द्ध्वं **नवतियोजना-न्यूर्द्ध्व**मबाधया कृत्वाऽत्रान्तरे **चन्द्रविमानं चारं चरति, दशोत्तरं योजनशतम-**बाधया कृत्वाऽत्रान्तरे सर्वोपरितनं **तारारूपं** ज्योतिश्चक्रं **चारं चरति**। तथा **'(ता)**

**सूरविमाणातो**' इत्यादि। '**ता**' इति **तस्मात्** सूर्यविमानादूर्द्ध्वम**शीतियोजनान्य-बाधया** कृत्वाऽत्रान्तरे **चन्द्रविमानं चारं चरति**। '**एवं जहेव जीवाभिगमे तहेव नेयव्व**'मिति, एवमुक्तेन प्रकारेण **यथैव जीवाभिगमे**ऽभिहितं **तथैव ज्ञातव्यम्**। तच्चैवं - '[1]**ता सूरविमाणाओ जोयणसयमबाहाए उवरिल्ले तारारूवे चारं चरति। ता चंदविमाणाओ वीसं जोयणाइं अबाहाए उवरिल्ले तारारूवे चारं चरइ। एवमेव (स)पुव्वावरेणं दसुत्तरजोयणसयबाहल्ले तिरियमसंखेज्जे जो[य]-इसविसए जोइसे चारं चरइ आहियत्ति वएज्जा। ता अत्थि णं चंदिमसूरिया(णं देवाणं) हिट्ठिं पि तारारूवा[ण] (अणुं)पि तुल्ला वि (समंपि तारारूवा अणुंपि तुल्लावि) [ओ](उप्पिं)पि तारारूवा अणुंपि तुल्लावि ? ता अत्थि। (ता) कहं ते चंदिमसूरियाणं देवाणं हिट्ठिं पि तारारूवा अणुंपि तुल्लावि समंपि तारारूवा अणुंपि तुल्लावि उप्पिंवि तारारूवा अणुंपि तुल्लावि ? ता जह जहा णं तेसि णं देवाणं तवनियमबंभचेराइं उस्सियाइं भवंति तहा तहा णं तेसिं देवाणं [त] एवं भ[न्न](व)इ, तं जहा - अणुत्ते वा तुल्लत्ते वा। एवं खलु चंदिमसूरियाणं देवाणं हेट्ठिंपि तारारूवा अणुंपि तुल्लावि समंपि तारारूवा अणुंपि तल्लावि उप्पिंपि तारारूवा अणुंपि तल्लावि। ता एगमेगस्स णं चंदस्स देवस्स केवइया गहा परिवारो पन्नत्तो केवइया नक्खत्ता परिवारो पन्नत्तो केवइया तारा परिवारो पन्नत्तो। (ता) एगमेगस्स णं चंदस्स देवस्स अट्ठासीई गहा परिवारो पन्नत्तो अट्ठावीसं नक्खत्ता परिवारो पन्नत्तो छावट्ठिसहस्साइं नव चेव सयाइं पंचसत्तराइं तारागणकोडिकोडीणं परिवारो पन्नत्तो। ता मंदरस्स णं पव्वयस्स केवइयं अबाहाए जोइसे चारं चरइ ? ता एक्कारस एक्कवीसं जोयणसए अबाहाए जोइसे चारं चरइ। ता लोयंताओ णं केवइयं अबाहाए जोइसे पण्णत्ते ? ता एक्कारस एक्कारसे जोयणसए**

---

१. जीवाजीवाभिगमसूत्रे सूत्राणि १९३, १९४, १९५।

**अबाहाए जोइसे पन्नत्ते।**' तथा अन्यदपि यत् जीवाभिगमवदत्रापि वक्तव्यम्। तल्लेशत उपक्षिपन्नाह - '[१]**सव्वब्भंतरिल्लचार**'मित्यादि। प्रथमतः सर्वाभ्यन्तरचार-प्रभृतिका वक्तव्यता वक्तव्या। तथा '**संठाण**'मिति **संस्थानं** चन्द्रादिविमानानां वक्तव्यम्। तदनन्तरं '**पमाणं**'ति चन्द्रादिविमानानामेवायामादिप्रमाणमभिधातव्यम्। तदनन्तरं '**वहंति**' ति यावन्तः सिंहादयो यं विमानं वहन्ति तदेव वक्तव्यम्। ततः '**सीहगइ**'त्ति कः कस्माच्छीघ्रगतिरिति वक्तव्यम्। तत '**इड्डि**'त्ति ऋद्धिश्चन्द्रादीनां देवानां वक्तव्या। तदनन्तरं '**तारंतरं**'ति ताराणां जघन्यत [उक्तंवर्ष](उत्कर्षत)श्चान्तरं वक्तव्यम्। तत ऊर्द्ध्वं चन्द्रादीनामग्रमहिष्योऽभिधातव्याः। ततः **स्थितिः** चन्द्रादीनां वक्तव्या। तदनन्तर**मल्पबहुत्वं** वक्तव्यम्। तच्च तावत् **यावत् ताराः सङ्ख्येय-गुणाः**। एतानि च सर्वाण्यप्येवं वक्तव्यानि - '**ता जंबुद्दीवे णं दीवे कयरे नक्खत्ते सव्वब्भंतरिल्लं चारं चरइ ? कयरे नक्खत्ते सव्वबाहिरिल्लं चारं चरइ ? कयरे नक्खत्ते सव्वुपरिल्लं चारं चरइ ? कयरे नक्खत्ते सव्वहिट्ठिल्लं चारं चरइ ? ता अभिई नक्खत्ते सव्वब्भंतरिल्लं चारं चरइ, मूले नक्खत्ते सव्वबाहिरिल्लं चारं चरति, साई नक्खत्ते सव्वुपरिल्लं चारं चरति, भरणीनक्खत्ते सव्वहिट्ठिल्लं चारं चरइ। ता चंदविमाणे णं किंसंठिए पन्नत्ते ? ता अद्धकविट्ठगसंठाणसंठिए [२]सव्वफलियामए अब्भुग्गयमूसियपहसिए विविहमणिरयणभत्तिचित्ते वाउद्धुय-विजयवेजयंतीपडागच्छत्ताइछत्तकलिए तुंगे गगणतलमणुलिहंतसिहरे जालंतर-रयण पंजर[मिल्लि](उम्मिलि)यव्व मणिकणय[सू](थु)भियारे वियसियसय-वत्त-पुंडरीय-तिलगरयणद्धचंदचित्ते अन्तोबहिं च सण्हे तवणिज्जवालुगापत्थडे सुहफासे सस्सिरीयरूवे पासाईए दरिसणिज्जे अभिरूवे पडिरूवे। एवं सूरविमाणे गहविमाणे नक्खत्तविमाणे ताराविमाणे वि। ता चंदविमाणे णं केवइयं आयामविक्खंभेणं केवइयं परिक्खेवेणं केवइयं बाहल्लेणं पन्नत्ते ?**

---

१. सव्वब्भंतरिल्लं चारं - मूले। २. सव्वफलिहामए - G, K, T।

ता छप्पन्नं एगट्ठिभागे जोयणस्स आयामविक्खंभेणं तं तिगुणं सविसेसं परिरएणं अट्ठावीसं च एगट्ठिभागे जोयणस्स बाहल्लेणं पन्नत्ते। (ता) सूरविमाणे णं केवइयं आयामविक्खंभेणं केवइयं परिक्खेवेणं केवइयं बाहल्लेणं पन्नत्ते ? ता अडयालीसं एगट्ठिभागे जोयणस्स आयामविक्खंभेणं तं तिगुणं सविसेसं परिरएणं चउवीसं एगट्ठिभागे जोयणस्स बाहल्लेणं पन्नत्ते। ता गहविमाणे णं केवइयं आयामविक्खंभेणं केवइयं परिक्खेवेणं केवइयं बाहल्लेणं पन्नत्ते ? ता अद्धजोयणं आयामविक्खंभेणं तं तिगुणं सविसेसं परिरएणं कोसं बाहल्लेणं पन्नत्ते। ता नक्खत्तविमाणे णं केवइयं आयामविक्खंभेणं (केवइयं परिक्खेवेणं) केवइयं बाहल्लेणं पन्नत्ते ? ता कोसं आयामविक्खंभेणं तं तिगुणं सविसेसं परिरएणं अद्धकोसं बाहल्लेणं पन्नत्ते। (ता) ताराविमाणे णं केवइयं आयामविक्खंभेणं केवइयं परिक्खेवेणं केवइयं बाहल्लेणं पन्नत्ते ? ता अद्धकोसं आयामविक्खंभेणं तं तिगुणं सविसेसं परिरएणं पंचधणुसयाइं बाहल्लेणं पन्नत्ते। ता चंदविमाणं कइ देवसाहस्सीओ परिवहंति ? ता सोलसदेवसाहस्सीओ परिवहंति, तं जहा - पुरच्छिमेणं[१] सीहरूवधारीणं देवाणं चत्तारि देवसाहस्सीओ परिवहंति, दाहिणेणं गयरूवधारीणं देवाणं चत्तारि देवसाहस्सीओ परिवहंति, [२]पच्चच्छिमेणं वसहरूवधारीणं देवाणं चत्तारि देवसाहस्सीओ परिवहंति, [पच्चच्छिमेणं] उत्तरेणं तुरगरूवधारीणं देवाणं [दो](चत्तारि) देवसाहस्सीओ परिवहंति। एवं सूरविमाणंपि, ता गहविमाणं कति देवसाहस्सीओ परिवहंति ? ता अट्ठ देवसाहस्सीओ परिवहंति, तं० पुरच्छिमेणं सीहरूवधारीणं देवाणं दो देवसाहस्सीओ परिवहंति, एवं जाव उत्तरेणं तुरगरूवधारीणं देवाणं दो देवसाहस्सीओ परिवहंति। ता नक्खत्तविमाणं कइ देवसाहस्सीओ परिवहंति ? ता चत्तारि

---

१. पुरत्थिमेणं - T। २. पच्चत्थिमेणं - T।

देवसाहस्सीओ परिवहंति, तं जहा - [1]पुरच्छिमेणं सीहरूवधारीणं देवाणं एक्का देवसाहस्सी[ओ] परिवहति (दाहिणेणं) गयरूवधारिणं एवं जाव उत्तरेणं एक्का तुरगरूवधारीणं देवाणं एक्का देवसाहस्सी[ओ] परिवहइ। (ता) ताराविमाणं कइ देवसाहस्सीओ परिवहंति ? ता दो देवसाहस्सीओ परिवहंति, तं जहा - [2]पुरच्छिमेणं सीहरूवधारीणं देवाणं पंच देवसया परिवहंति, दाहिणेणं गयरूवधारीणं देवाणं पंच देवसया परिवहंति, [3]पच्चच्छिमेणं वसहरूवधारीणं देवाणं पंच देवसया परिवहंति उत्तरेणं तुरगरूवधारीणं देवाणं पंच देवसया परिवहंति। ता एएसि णं चंदिमसूरिय-गहगणनक्खत्ततारारूवाणं कयरे(२)हिंतो सिग्घगती मंदगई वा ? ता चंदेहिंतो सूरा सिग्घगई सूरेहिंतो गहा सिग्घगई गहेहिंतो नक्खत्ता सिग्घगई नक्खत्तेहिंतो तारा सिग्घगई सव्वप्पगई चंदा सव्वसिग्घगई तारा। ता एएसि णं चंदिमसूरियगहगणनक्खत्ततारारूवाणं कयरे(२)हिंतो अप्पिड्डिया वा महिड्डि-या वा ? ताराहिंतो नक्खत्ता महिड्डिया नक्खत्तेहिंतो गहा महिड्ढिया गहेहिंतो सूरा महिड्डिया सूरेहिंतो चंदा महिड्डिया सव्वप्पिड्डिया तारा सव्वमहिड्डिया चंदा। ता जंबुद्दीवे णं भंते दीवे तारारूवस्स(य २) एस णं केवइए अबाहाए अंतरे पण्णत्ते ? गोयमा दुविहे अंतरे पन्नत्ते, तं जहा - वाघाइमे य निव्वाघाइमे य। तत्थ णं जे से वाघाइमे से णं जहन्नेणं दोन्नि छावट्ठे जोयणसए उक्कोसेणं बारसजोयणसहस्साइं दोन्नि बायाले जोयणसए, एस णं ए[स]वइए तारारूवस्स(य) (२) अबाहाए अंतरे पण्णत्ते। तत्थ [जोइमे] (जे से) निव्वाघाइमे से जहन्नेणं पंचधणुसयाइं उक्कोसेणं अद्धजोयणं तारारूवस्स (२) य अबाहाए अंतरे पन्नत्ते। ता चंदस्स णं जोइसिंदस्स जोइसरन्नो कइ अग्गमहीसीओ पन्नत्ताओ ? (ता) चत्तारि अग्गमहीसीओ

---

१. पुरत्थिमेणं - T। २. पुरत्थिमेणं - T। ३. पच्चत्थिमेणं - T।

पण्णत्ताओ, तं जहा - चंदप्पहा दोसिणाभा अच्चिमाली पभंकरा। तत्थ णं एगमेगाए देवीए चत्तारि देवीसाहस्सीओ परिवारो पण्णत्तो, पभू णं ता एगमेगा देवी अन्नाइं चत्तारी २ देवीसहस्साइं परिवारं विउव्वित्तए। [पुव्](ए)-वमेव सपुव्वावरेणं सोलसदेवीसाहस्साइं भवंतीति। से तं तुडिए। (ता) पभू णं चंदे जोइसिंदे जोइसराया चंडवडिंसए विमाणे सभाए सुहम्माए तुडिएणं सद्धिं दिव्वाइं भोगभोगाइं भुंजमाणे विहरित्तए ? नो इणट्ठे समट्ठे। ता कहं ते नो पभू चंदे जोइसिंदे जोइसराया चंडवडिंसए विमाणे सभाए सुहम्माए तुडिएण सद्धिं दिव्वाइं भोगभोगाइं भुंजमाणे विहरित्तए? ता चंदस्स णं जोइसिंदस्स जोइसरन्नो चंडवडिंसए विमाणे सभाए सुहम्माए माणवगेसु चेइयखंभेसु वइरामएसु गोलवट्टसमुग्गएसु बहवे जिणसकहाणि सन्निखित्ताणि चिट्ठंति। ताओ णं चंदस्स (जोतिसिंदस्स) जोइसरन्नो अन्नेसिं च बहूणं जोइसियाणं देवाणं देवीण य अच्चणिज्जाओ वंदणिज्जाओ पूयणिज्जाओ सक्कारणिज्जाओ सम्माणणिज्जाओ कल्लाणं मंगलं देवयं चेइयं पज्जुवा-सणिज्जाओ। एवं खलु नो पभू चंदे जोइसिंदे जोइसराया चंडवडिंसए विमाणे सभाए सुहम्माए तुडिएण सद्धिं दिव्वाइं भोगभोगाइं भुंजमाणे विहरित्तए। (ता) पभू णं चंदे (जोइसिंदे) जोइसराया चंदवडिंसए विमाणे सभाए सुहम्माए चंदंसि सीहासणंसि चउहिं सामाणियसाहस्सीहिं चउहिं अग्गम-हिसीहिं सपरिवाराहिं तिहिं परिसाहिं सत्तहिं अणिएहिं सत्तहिं अणियाहिवईहिं सोलसहिं आयरक्खदेवसाहस्सीहिं अन्नेहि य बहुहिं जोइसिएहिं देवदेवीहिं य सद्धिं संपरिवुडे महयाहयनट्टगीयवाइयतंतीतलतालतुडियघणमुयंगप्पडुप्प-वाइयरवेणं दिव्वाइं भोगभोगाइं भुंजमाणे विहरित्तए केवलं परियारणिड्ढीए णो चेव णं मेहुणवत्तियं। ता सूरस्स णं जोइसिंदस्स जोइसरन्नो कई अग्गमहीसीओ पन्नत्ताओ ? ता चत्तारी अग्गमहीसीओ पन्नत्ताओ, तं जहा

- सूरप्पभा आय[च्छा](वा)भा अच्चिमाली पभंकरा सेसं जहा चंदस्स नवरं सूरवडिंसए विमाणे जाव नो चेव णं मेहुणवत्तियं। ता जोइसियाणं देवाणं केवइकालं ठिई पन्नत्ता ? जहन्नेणं अट्ठभागपलिओवमं उक्कोसेणं पलिओवमं वाससयसहस्समब्भहियं। ता जोइसि(णी)णं देवीणं केवइयं कालं ठिई पन्नत्ता ? जहन्नेणं अ[द्ध](ट्ठ)भागपलिओवमं उक्कोसेणं अद्धपलिओवमं पन्नासाए वाससहस्सेहिं अब्भहियं। ता चंदविमाणे णं देवाणं केवइकालं ठिई पन्नत्ता ? ता जहन्नेणं चउभागपलिओवमं उक्कोसेणं पलिओवमं वाससयसहस्समब्भहियं। ता चंदविमाणे णं देवीणं केवइयं कालं ठिई पन्नत्ता ? जहन्नेणं चउभागपलिओवमं उक्कोसेणं अद्धपलिओवमं पन्नासाए वाससहस्सेहिं अब्भहियं। (ता) सूरविमाणे णं देवाणं केवइकालं ठिई पन्नत्ता ? जहन्नेणं चउब्भागपलिओवमं उक्कोसेणं पलिओवमं वाससहस्समब्भहियं। ता सूरविमाणे णं देवीणं केवइकालं ठिई पन्नत्ता ? जहन्नेणं चउब्भागपलिओवमं उक्कोसेणं अद्धपलिओवमं पंचहिं वाससएहिं अब्भहियं। ता गहविमाणे णं देवाणं केवइकालं ठिई पन्नत्ता ? जहन्नेणं चउभागपलिओवमं उक्कोसेणं पलिओवमं। ता गहविमाणे णं देवीणं केवइकालं ठिई पण्णत्ता ? ता जहन्नेणं चउब्भागपलिओवमं उक्कोसेणं अद्धपलिओवमं। ता नक्खत्तविमाणे णं देवाणं केवइकालं ठिई पन्नत्ता ? ता जहन्नेणं चउब्भागपलिओवमं उक्कोसेणं अद्धपलिओवमं। ता नक्खत्तविमाणे णं देवीणं केवइकालं ठिई पन्नत्ता ? ता जहन्नेणं अट्ठभागपलिओवमं उक्कोसेणं चउब्भागपलिओवमं। ता ताराविमाणे णं देवाणं केवइकालं ठिई पन्नत्ता ? ता जहन्नेणं अट्ठभागपलिओवमं उक्कोसेणं चउब्भागपलिओवमं। (ता) ताराविमाणे णं देवीणं केवइकालं ठिई पन्नत्ता ? ता जहन्नेणं अट्ठभागपलिओवमं उक्कोसेणं साइरेगअट्ठभागपलिओवमं। ता एएसि णं चंदिमसूरियगहनक्खत्ततारारूवाणं कयरे

**कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ? चंदा य सूरा य एते णं दोवि तुल्ला सव्वत्थोवा, नक्ख[त्तं](त्ता) संखेज्जगुणा, गहा संखेज्जगुणा, तारा संखेज्जगुणा इति।**' एतेषाञ्च सूत्राणां क्रमेण व्याख्या - **सूर्यविमानादूद्र्ध्वं योजनशतमबाधया** कृत्वा सर्वो**परितनं तारारूपं** ज्योतिश्चक्रं **चारं चरति। चन्द्रविमानादूद्र्ध्वं** तदेव सर्वो**परितनं तारारूपं** ज्योतिश्चक्रं **विंशतियोजनान्यबाधया** कृत्वा **चारं चरति।** '**एवमेव सपुव्वावरेणं**'ति पूर्वापरमीलनेन **दशोत्तरयोजनशतबाहल्ये,** तथाहि - सर्व्वाधस्तनात्तारारूपाज्ज्योतिश्चक्रादूद्र्ध्वं दशभिर्योजनैः सूर्यविमानं ततोऽप्यशीत्या योजनैश्चन्द्रविमानं ततोऽपि विंशत्या सर्वोपरितनं तारारूपं ज्योतिश्चक्रमिति ज्योतिश्चक्रचारविषये च दशोत्तरं योजनशतं बाहल्यम्। तस्मिन्दशोत्तरयोजनशतबाहल्ये। पुनः कथम्भूते इत्याह - **तिर्यक् (अ)सङ्ख्येय**योजनकोटीप्रमाणे **ज्योतिर्विषये** मनुष्यक्षेत्रविषयं **ज्योतिश्चक्रं चारं चरति** चारं चरत् मनुष्यक्षेत्रात्तु बहिरवस्थित**माख्यातमिति वदेत्।** '**ता अत्थि ण**'मित्यादि। '**ता**' इति पूर्ववत्, **अस्त्येतत्** भगवन् ! यदुत **चन्द्रसूर्याणां देवानां** '**हेट्ठिंपि**' क्षेत्रापेक्षया **अधस्तना अपि तारारूपा**स्तारारूपविमानाधिष्ठातारो देवा द्युतिविभवलेश्यादिकमपेक्ष्य केचि**दणवोऽपि** - लघवोऽपि भवन्ति हीना भवन्तीत्यर्थः केचि**त्तुल्या अपि** भवन्ति, तथा **सममपि** चन्द्रविमानैः सूर्यविमानैश्च [क्रा](क्षेत्रा)-पेक्षया समश्रेण्यापि व्यवस्थितास्तारारूपविमानाधिष्ठातारो देवास्तेऽपि चन्द्रसूर्याणां देवानां द्युतिविभवादिकमपेक्ष्य केचि**दणवोऽपि** भवन्ति केचि**त्तुल्या अपि,** तथा चन्द्रविमाना(नां सूर्यविमानानां चो)**[दु]पर्यपि** ये व्यवस्थितास्तारारूपविमानाधिष्ठातारो देवास्तेऽपि चन्द्रसूर्याणां देवानां द्युतिविभवादिकमपेक्ष्य केचि**दणवोऽपि** भवन्ति केचि**त्तुल्या अपि** ? एवं गौतमेन प्रश्ने कृते भगवानाह - '**ता अत्थि**'त्ति यदेतत्त्वया पृष्टं तत्सर्वं तथै**वा[स्ते](स्ति)।** एवमुक्ते पुनः प्रश्नयति - '**ता कहं ते**'इत्यादि सुगमम्। भगवानाह - '**ता जह जहे**'त्यादि। '**ता**' इति पूर्ववत्, **यथा यथा**

'**ण**'मिति वाक्यालङ्कारे **तेषां देवानां** तारारूपविमानाधिष्ठातॄणां प्राग्भवे **तपोनियम-ब्रह्मचर्याणि उच्छ्रितानि** - उत्कटानि **भवन्ति तथा तथा तेषां देवानां** तस्मिन्तारारूपविमानाधिष्ठातृभवे **एवं भवति यथा अणुत्वं वा तुल्यत्वं वा**। किमुक्तं भवति ? यैः प्राग्भवे तपोनियमब्रह्मचर्याणि मन्दानि कृतानि ते तारारूपविमानाधिष्ठातृदेवभव[नंतु](मनु)प्राप्ताश्चन्द्रसूर्येभ्यो द्युतिविभवादिकमपेक्ष्य हीना भवन्ति। यैस्तु भवान्तरे तपोनियमब्रह्मचर्याणि अत्युत्कटान्यासेवितानि [तैः सा](ते तारा)रूपविमानाधिष्ठातृरूपं देवत्वमनुप्राप्ता द्युतिविभवादिकमपेक्ष्य चन्द्रसूर्यदेवैः सह [1]समाना भवन्ति, न चैतदनुपपन्नम्, दृश्यन्ते हि मनुष्यलोके(ऽपि) केचिज्जन्मान्तरोपचिततथाविधपुण्यप्राग्भारा राजत्वमप्राप्ता अपि राज्ञा सह तुल्यद्युतिविभवा इति। '**एवं खलु**' इत्यादि निगमनवाक्यं सुगमम्। '**ता एगमेगस्स ण**'मित्यादीनि ग्रहादिपरिवारविषयाणि प्रश्ननिर्वचनसूत्राणि सुगमानि। '**ता मंदरस्स ण**'मित्यादि। '**ता**'इति पूर्ववत्, **मन्दरस्य पर्वतस्य** जम्बूद्वीपगतस्य सकलतिर्यग्लोकमध्यवर्त्तिनः **कियत्क्षेत्रमबाधया** सर्वतः कृत्वा (**ज्योतिश्चक्रं**) **चारं चरति** ? भगवानाह - '**ता एक्कारसे**'-त्यादि। '**ता**'इति पूर्व्ववत्, **एकादश योजनशतानि एकविंशत्यधिकान्यबाधया** कृत्वा **चारं चरति**। किमुक्तं भवति ? मेरोः सर्व्वतः एकादशयोजनशतान्येकविंशत्यधिकानि मुक्त्वा तदनन्तरं चक्रवालतया ज्योतिश्चक्रं चारं चरति। '**ता** [2]**लोयंता ण**'मित्यादि। '**ता**'इति पूर्व्ववत् **लोकान्तादर्वाक्** '**ण**'मिति वाक्यालङ्कारे **कियत्** क्षेत्र**मबाधया** कृत्वा **ज्योतिषं प्रज्ञप्तं** ? भगवानाह - '**एक्कारसे**'त्यादि। **एकादश-योजनशतान्येकादशाधिकानि अबाधया** कृत्वा - अपान्तरालं विधाय **ज्योतिषं प्रज्ञप्तम्**। '**ता जंबुद्दीवे णं दीवे कयरे नक्खत्ते**'इत्यादि सुगमम्। नवरमभिजिन्नक्षत्रं सर्वाभ्यन्तरं नक्षत्रमण्डलकमपेक्ष्य, एवं मूलादीन्यपि सर्वबाह्यादीनि वेदितव्यानि। '**ता चंदविमाणे ण**'मित्यादि संस्थानविषयं प्रश्नसूत्रं सुगमम्। भगवानाह - '**ता**

---

१. समा - E, G, T। २. लोयंताओ - मूले।

**अद्धकविट्ठगे**'त्यादि। अर्द्धकपित्थमुत्तानीकृतमर्द्धमात्रं कपित्थं तस्येव यत् संस्थानं तेन संस्थित**मर्द्धकपित्थसंस्थानसंस्थितम्**। आह - यदि चन्द्रविमानमर्द्धमात्रकपित्थफलसंस्थानसंस्थितं तत उदयकालेऽस्तमनकाले यदि वा तिर्यक्परिभ्र[मा](म)त् पौर्णमास्यां कस्[या](मा)त्तदर्द्धकपित्थफलाकारं नोपलभ्यते ? कामं शिरस उपरि वर्त्तमानं वर्त्तुलमुपलभ्यते, अर्द्धकपित्थस्य शिरस उपरि [१]दूरमुपस्थापितस्य परभागादर्शनतो वर्त्तुलतया दृश्यमानत्वात्, उच्यते, इहार्द्धकपित्थफलाकारं चन्द्रविमानं (न) सामस्त्येन प्रतिपत्तव्यं किन्तु तस्य चन्द्रविमानस्य पीठं, तस्य च पीठस्योपरि चन्द्रदेवस्य ज्योतिश्चक्रराजस्य प्रासादस्तथा कथञ्चनापि व्यवस्थितो यथा पीठेन सह भूयान् वर्त्तुलाकारो भवति, स च[सू] (दू)रभावात् एकान्ततः समवृत्ततया जनानां प्रतिभासते, ततो न कश्चिद्दोषः, न चैतत् स्वमनीषिकाया (वि)जृम्भि[तवत्](तं) (यत) एतदेव **जिनभद्रगणिक्षमाश्रमणेन विशेषणवत्या**माक्षेपपुरस्सरमुक्तं - '**अद्धकविट्ठागारा उदयत्थमणंमि क[ही](हं) न दीसंति। ससिसूराण विमाणा तिरियखेत्तट्ठियाणं पि॥१०८॥ उत्ताणद्धकविट्ठागारं पीढं (किर) तदुवरिं च पासाओ। व[द्धा](ट्टा)लेखेण तओ समवट्टं दूरभावाओ ॥१०९॥**' तथा सर्वं निरवशेषं स्फटिकमयं - स्फटिकविशेषमणिमयम्, तथा अभ्युद्गता आभिमुख्येन सर्वतो विनिर्गता उत्सृता प्रबलतया सर्वासु दिक्षु प्रसृता या प्रभा-दिप्ति[सूर्या](स्तया) सितं-शुक्लं **अभ्युद्गतो[वृ](त्सृ)तप्रभासितम्**, तथा विविधा अनेकप्रकारा मणयश्चन्द्रकान्[त्या](ता)दयो रत्नानि - कर्केतनादीनि तेषां भक्तयो - विच्छित्तिविशेषास्ताभिश्चित्रमनेकरूपवत् आश्चर्यवद्वा **विविधमणिरत्न(भक्ति)चित्रम्**, तथा वातोद्धुता - वायुकम्पिता विजयोऽभ्युदयस्तत्संसूचिका वैजयन्त्यभिधाना[र्थां] (या) पताका अथवा विजया इति वैजयन्तीनां पार्श्वकर्ण्णिका उच्यन्ते, तत्प्रधाना वैजयन्त्यो विजयवैजयन्त्यः पताकास्ता एव विजयवर्जिता वैजयन्त्यः छत्रातिच्छत्राणि च

१. दूरमवस्थापितस्य - T।

उपर्युपरि स्थितातपत्राणि तैः कलितं ततो **वातोद्धूतविजयवैजयन्तीपताकाछत्रातिछत्रकलितम्, तुङ्गं**-उच्चम्, अत एव '**गगनतलमणुलिहंतसिहरे**'त्ति गगनतलमम्बरतलमनुलिखत् अभिलङ्घय[ति](त्) शिखरं यस्य तत् **गगनतलानुलिखच्छिखरम्**, तथा जालानि जालकानि तानि च भवनभित्तिषु लोके प्रतीतानि तद[न]न्तरेषु विशिष्टशोभानिमित्तं रत्नानि यत्र तत् **जालान्तररत्नम्**, सूत्रे चात्र प्रथमैकवचनलोपो द्रष्टव्यः, तथा **पञ्जरादुन्मीलितमिव** बहिः कृतमिव पञ्ज[रान् उ](रो)न्मीलि[तमिव](तम्), यथा हि किल किमपि वस्तु पञ्जरात् वंशादिमयप्रच्छादनविशेषाद्बहिःकृतमत्यन्तमविनष्टच्छायत्वात् शोभते एवं तदपि विमानमिति भावः, तथा मणिकनकानां सम्बन्धिनी स्तूपिका शिखरं यस्य तत् **मणिकनकस्तूपिकाकम्**, तथा विकसितानि यानि शतपत्राणि पुण्डरीकाणि द्वारादौ प्रतिकृतित्वेन स्थितानि तिलकाश्च भित्त्यादिषु [चन्द्रा](पुण्ड्रा)णि रत्नमयाश्चार्द्धचन्द्रा [1]द्वाराग्रादिषु तैश्चित्रं **विकसितशतपत्रपुण्डरीकतिलकरत्नार्द्धचन्द्रचित्रम्**, तथा **अन्तर्बहिश्च श्लक्ष्णं** मसृणमित्यर्थः, तथा तपनीयं-सुवर्णविशेषस्तन्मय्या वालुकायाः-सिकतायाः प्रस्तटः-प्रतरो[वा त](य)त्र त[त्र](त्) **तपनीयवालुकाप्रस्तटम्**, तथा **सु[वर्ण्ण](ख)स्पर्शं शुभस्पर्शं** वा, तथा सश्रीकाणि सशोभानि रूपाणि नरयुग्मादीनि [त](य)त्र तत् **सश्रीकरूपम्**, तथा **प्रासादीयं** मनःप्रसादहेतुः, अत एव **दर्शनीयं** - द्रष्टुं योग्यं तद्दर्शनेन तृप्तेरसम्भवात्, [2]तथा प्रतिविशिष्टमसाधारणं रूपं यस्य तत्तथा। '[3]**एवं सूरविमाणे वी**'-त्यादि। यथा[विमानं] चन्द्रविमानस्वरूपमुक्त**मेवं सूर्यविमानं (ग्रहविमानं नक्षत्रविमानं) ताराविमानं** च वक्तव्यम्, प्रायः सर्वेषामपि ज्योतिर्विमानानामेकरूपत्वात्, तथा चोक्तं **समवायाङ्गे 'केवइया णं भंते ! जोइसियावासा पन्नत्ता ? गोयमा ! इमीसे रयणप्पभाए पुढवीए बहुसमरमणिज्जाओ (भूमिभागाओ)**

---

१. द्वारादिषु - A, F। २. अभिरूवे पडिरूवे - मूले। ३. एवं सूरविमाणे गहविमाणे नक्खत्तविमाणे ताराविमाणे वि - मूले।

**सत्त नउयाइं जोयणसयाइं उड्ढं उप्पइत्ता दसुत्तरजोयणसयबाहल्ले तिरियमसंखेज्जे जोइ(स)विसए जोइसियाणं देवाणं असंखेज्जा जोइसिया विमाणावासा पन्नत्ता, ते णं जोइसियविमाणावासा अब्भुग्गयमूसियपहसिया विविहमणिरयणभत्तिचित्ता तं चेव जाव पासाइया दरिसणिज्जा (अभिरूवा) पडिरूवा इति।' (सूत्र १५०)।** '**ता चंदविमाणे ण**'मित्यादीनि आयामविष्कम्भादिविषयाणि सर्वाण्यपि प्रश्ननिर्वचनसूत्राणि सुगमानि, नवरं सर्वत्रापि परिधिपरिमाणं '**विक्खंभवग्गदहगुणकरणी वट्टस्स परिरओ होइ**'त्ति करणवशात् स्वयमानेतव्यम्। तथा यत्ताराविमानस्यायामविष्कम्भपरिमाणमुक्तमर्द्धगव्यूतं उच्चत्वपरिमाणं क्रोशचतुर्भागः तदुत्कृष्ट[मिति]स्थितिकस्य तारादेवस्य सम्बन्धिनो विमानस्यावसेयं यत् पुनर्जघन्यस्थितिकस्य तारादेवस्य सम्बन्धिविमानं तस्यायामविष्कम्भपरिमाणं पञ्चधनुःशतानि उच्चत्वपरिमाणमर्द्धतृतीयानि धनुःशतानि, तथा चोक्तं **तत्त्वार्थभाष्ये - 'अष्टाचत्वारिंशद्योजनैकषष्टिभागाः सूर्यमण्डलविष्कम्भः, चन्द्रमसः षट्पञ्चाशत्, ग्रहाणामर्द्धयोजनं, गव्यूतं नक्षत्राणां, सर्वोत्कृष्टायास्ताराया अर्द्धकोशः, जघन्यायाः पञ्चधनुःशतानि, विष्कम्भार्द्धबाहल्याश्च भवन्ति सर्वे सूर्यादयो नृलोके।' (४/१४)** इति। '**ता चंदविमाणं कइ देवसाहस्सीओ परिवहंती**'त्यादीन्यपि वाहनविषयाणि प्रश्न(निर्वचन)सूत्राणि सुगमानि, नवरमियमत्र भावना - इह चन्द्रादीनां विमानानि तथाजगत्स्वाभाव्यान्निरालम्बनानि वहन्त्यवतिष्ठन्ते, केवलं ये आभियोगिका देवास्ते तथाविधनामकर्म्मोदयवशात् समानजातीयानां हीनजातीयानां वा देवानां निजस्फातिविशेषदर्शनार्थमात्मानं बहुमन्यमानाः प्रमोदभृतः सततवहनशीलेषु विमानेष्वधः स्थित्वा स्थित्वा केचित्सिंहरूपाणि केचिद्गजरूपाणि केचिद्वृषभरूपाणि केचित्तुरगरूपाणि कृत्वा तानि विमानानि वहन्ति। न चैतदनुपपन्नम्, तथाहि - यथेह कोपि तथाविधाभियोग्यनामकर्म्मोपभोगभागी दासोऽन्येषां समानजातीयानां हीनजातीयानां वा पूर्वपरिचितानामेवमहं

नायकस्यास्य प्रसिद्धस्य सम्मत इति निजस्फातिविशेषप्रदर्शनार्थं सर्वमपि स्वोचितं कर्म नायकसमक्षं प्रमुदितः करोति तथाभियोगिका अपि देवास्तथाविधाभियोग्यनाम-कर्म्मोपभोगभाजः समानजातीयानां हीनजातीयानां वा देवानामन्येषामेवं वयं समृद्धा यत्सकललोकप्रसिद्धानां चन्द्रादीनां विमा[न](नानि) वहाम इत्येवं निजस[यग](फा)-तिविशेषप्रदर्शनार्थमात्मानं बहुमन्यमाना उक्तप्रकारेण चन्द्रविमानानि वहन्तीति। तेषां च चन्द्रादिविमानवहनशीलानामाभियोगिकदेवानामिमे सङ्ख्यासङ्ग्राहिके **जम्बूद्वीप-प्रज्ञप्ति**सत्के गाथे - **'सोलस देवसहस्सा वहंति चंदेसु चेव सूरेसु। अट्ठेव सहस्साइं एक्केक्कंमि गहविमाणे॥१॥ चत्तारि सहस्साइं नक्खत्तंमि य वहंति एक्केक्के। दो चेव सहस्साइं तारारूवेक्कमेक्कम्मि॥२॥' (सूत्र १६६) 'ता एएसि ण'**मित्यादि शीघ्रगतिविषयं प्रश्नसूत्रं निर्वचनसूत्रं च सुगमम्। एतच्च पश्चादप्युक्तं परं भूयो विमानवहनप्रस्तावादुक्तमित्यदोषः, अन्यद्वा कारणं बहुश्रुतेभ्योऽवगन्तव्यम्। [१]**'ता जंबुद्दीवे ण'**मित्यादि ताराविमानान्तरविषयं प्रश्नसूत्रं सुगमम्। भगवानाह - [२]**'ता दुविहे'** इत्यादि। **द्विविधमन्तरं प्रज्ञप्तं, तद्यथा व्याघातिमं निर्व्याघातिमं च**। तत्र व्याहननं व्याघातः पर्वतादिस्खलनं तेन निर्वृत्तं व्याघातिमं **'भावादिम'** इति **'इम'**प्रत्ययः, निर्व्याघातिमं व्याघातिमान्निर्गतं स्वाभाविकमित्यर्थः। **तत्र यत् व्याघातिमं तत् जघन्यतो द्वे योजनशते षट्षष्ट्यधिके,** एतच्च निषधकूटादिकमपेक्ष्य वेदितव्यम्, तथाहि - निषधपर्वतः स्वभावतोप्युच्चैः चत्वारि योजनशतानि, तस्य चोपरि पञ्चयोजनशतानि उच्चानि कूटानि, तानि च मूले पञ्चयोजनशतान्यायामविष्कम्भाभ्यां मध्ये त्रीणि योजनशतानि पञ्चसप्तत्यधिकानि उपरि अर्द्धतृतीये द्वे योजनशते, तेषां चोपरितनभागसमश्रेणिप्रदेशे तथाजगत्स्वा-भाव्यादष्टौ योजनान्युभयतोऽबाधया कृत्वा ताराविमानानि परिभ्रमन्ति। ततो जघन्यतो व्याघातिममन्तरं द्वे योजनशते षट्षष्ट्यधिके भव[न्ति](तः)। **उत्कर्षतो**

---

१. ऋद्धिविषयकप्रश्ननिर्वचनसूत्रयोः टीका नास्ति। २. गोयमा दुविहे - मूले।

**द्वादशयोजनसहस्राणि द्वे योजनशते द्विचत्वारिंशदधिके,** एतच्च मेरुमपेक्ष्य द्रष्टव्यम्, तथाहि - मेरौ दशयोजनसहस्राणि मेरोश्चोभयतोऽबाधया एकादश शतान्येकविंशत्यधिकानि, ततः सर्व्वसङ्ख्यामीलने भवन्ति द्वादशयोजनसहस्राणि द्वे च योजनशते द्विचत्वारिंशे। निर्व्याघा[त](ति)मान्तरविशेषविषयं सूत्रं सुगमम्। **'ता चंदस्स ण'**मित्याद्यग्रमहिषीविषयं सूत्रं सुगमम्, नवरमे**कैकस्या** [1]**देव्याश्चत्वारि** चत्वारि **देवीसहस्राणि परिवार** इति किमुक्तं भवति ? एकैका अग्रमहिषी चतुर्णां चतुर्णां चन्द्रसत्कदेवीसहस्राणां पट्टराज्ञी, **एकैका** च सा इत्थम्भूता अग्रमहिषी परिचारणावसरे तथाविधां ज्योतिष्कराजचन्द्रदेवेच्छामुपलभ्य **प्रभुरन्यानि** आत्मसमानरूपाणि **चत्वारि चत्वारि देवीसहस्राणि विकुर्वितुम्**। इह सिद्धान्तप्रसिद्धो विकुर्व[त] इति धातुरस्ति यस्य विकुर्वणा इति प्रयोगस्ततो विकुर्व्वितुमित्युक्तम्। **'एवमेवे'**ति **एवमेव** उक्तप्रकारे[ण](णै)व **'सपुव्वावरेणं'**ति सह पूर्व्वेणेति सपूर्वम्, सपूर्व्वं च अपरं च सपूर्वापरम्, तेन **सपूर्व्वापरेण** - पूर्वापरमीलनेनेति भावः स्वाभाविकानि **षोडशदेवीसहस्राणि** चन्द्रदेवस्य **भवन्ति,** तथाहि - चतस्रोऽग्रमहिष्यः एकैका चात्मना सह चतुश्चतुर्देवीसहस्रपरिवारा। ततः सर्वसङ्कलनेन भवन्ति षोडशदेवीसहस्राणि। **'से तं तुडिए'**त्ति **तदेता[वान्](वत्)** चन्द्रदेवस्य **त्रुडितं** - अन्तःपुरम्, उक्तश्च **जीवाभिगमचूर्ण्णौ** - **'तुडितं अन्तःपु[री]रमिति'**। **'[प्र](प)भू णं चंदे'**इत्यादि प्रश्नसूत्रं सुगमम्। भगवानाह - **'नो इणट्ठे'**इत्यादि, **नायमर्थः समर्थ** उपपन्नो, (न) युक्तोऽयमर्थ इत्यर्थः, यथा चन्द्रावतंसके विमाने या सुधर्म्मसभा तस्यामन्तःपुरेण सार्द्धं दिव्यान् भोगभोगान् भुञ्जानो विहरतीति। **'(ता) कहं ते नो पभू'** इत्यादि प्रश्नसूत्रं सुगमम्। भगवानाह - **'ता चंदस्स'** इत्यादि। **चन्द्रावतंसके विमाने सुधर्म्मायां सभायां** माणवको नाम चैत्यस्तम्भोऽस्ति, तस्मिंश्च **माणवके स्तम्भे वज्रमयेषु** सिक्ककेषु वज्रमयगोलकाकारा वृ[त्तयः](त्ताः)

१. देव्याश्चत्वारि देवी.... - C।

समुद्गकास्तेषु **बहूनि जिनसक्थीनि निक्षिप्तानि तिष्ठन्ति**। '**ताओ ण**'मित्यादि। **ता(नि)** जिनस[क्का](क्थी)नि, इह सूत्रे स्त्रीत्वनिर्देशः प्राकृतत्वात् **चन्द्रस्य ज्योतिषेन्द्रस्य ज्योतिषराजस्यान्येषाञ्च बहूनां ज्योतिष्कानां देवानां देवीनां चार्चनीयानि** पुष्पादिभिः **वन्दनीयानि** स्तोतव्यानि विशिष्टैः स्तोत्रैः **पूजनीयानि** वस्त्रादिभिः **सत्कारणीयानि** आदरप्रतिपत्तिविषयाणि **सन्माननीयानि** जिनोचित-प्रतिपत्तिविषयाणि **कल्याणं** - कल्याणहेतु**र्मङ्गलं** दुरितोपशमहेतु**र्दैवतं**-परमदेवता **चैत्य**मिष्टदेवताप्रतिमा इत्येवं **पर्युपासनीयानि**। तत **एवमनेन** कारणेन **खलु** - निश्चितं **न प्रभुरि**त्यादि सुगमम्। '**ता पभू णं चंदे**' इत्यादि। केवलं **परिचारण-[या](र्द्ध्या)** परिचार(ण)समृद्ध्या, एते सर्वेऽपि मम परिचारका अहं त्वेतेषां स्वामीत्येवं निजस्फातिविशेषदर्शनाभिप्रायेणेति भावः, **प्रभुश्चन्द्रो ज्योतिष्कराज-श्चन्द्रावतंसके विमाने सभायां सुधर्मायां चन्द्राभिधाने सिंहासने चतुर्भिः सामानिकसहस्रैश्चतसृभिरग्रमहिषिभिः सपरिवाराभिः तिसृभिर**भ्यन्तरम[1]ध्यम-बाह्यरूपाभिः **पर्षद्भिः (सप्तभिरनीकैः) सप्तभिरनीकाधिपतिभिः षोडश-भिरात्मरक्षकदेवसहस्रैरन्यैश्च बहुभिर्ज्योतिष्कैर्देवैर्देवीभिश्च सार्द्धं संपरिवृतो** महता रवेणेति योगः आहयत्ति आख्यानकप्रतिबद्धानीति वृद्धाः अथवा अहतानि-अव्याहतानि नाट्यगीतवादित्राणि तथा तन्त्री-वीणा तलतालाः-हस्ततालाः त्रुटितानि शेषतूर्याणि तथा (घनो)-घनाकारो ध्वनिसा[मथ](धम्)र्यात् यो मृदङ्गो मर्द्दलः पटुना दक्षपुरुषेण प्रवादितः, तत एतेषां पदानां द्वन्द्वस्तेषां यो रवस्तेन **दिव्यान्** दिवि भवानतिप्रधानानित्यर्थः भोगार्हा ये भोगाः शब्दादयस्तान् **भुञ्जानो विहर्त्तुं** प्रभुरितियोगः, न पुन**र्मैथुनप्रत्ययं** मैथुननिमित्तं स्पर्शादिभोगं भुञ्जानो विहर्त्तुं प्रभुः। एवं '**ता सूरस्स ण**'मित्यादीनि प्रश्ननिर्वचनसूत्राणि भावनीयानि। '**ता जोइसियाणं देवाण**'मित्यादि सर्वं सुगमं यावत्प्राभृतपरिसमाप्तिः, नवरं चन्द्रविमाने चन्द्रदेव

---

१. .....मध्य.....- H।

उत्पद्यते तत्सामानिकात्मरक्षकादयश्च, तत्रात्मरक्षका(दी)नां यथोक्ता जघन्या स्थिति-रुत्कृष्टा[त्] (तु) चन्द्रदेवस्य तत्सामानिकादीनां च। एवं सूर्यविमानादिष्वपि भावनीयम्।

इति श्रीमलयगिरिविरचितायां चन्द्रप्रज्ञप्तिटीकायामष्टादशं प्राभृतं समाप्तम्।

* * * * *

*सुखिनो विषयातृप्ता, नेन्द्रोपेन्द्रादयोऽप्यहो।*
*भिक्षुरेकः सुखी लोके, ज्ञानतृप्तो निरञ्जनः॥*

*बध्यते बाढमासक्तो, यथा श्लेष्मणि मक्षिका।*
*शुष्कगोलवदश्लिष्टो, विषयेभ्यो न बध्यते॥*

*उपायः समतैवेका, मुक्तेरन्यः क्रियाभरः।*
*तत्तत्पुरुषभेदेन, तस्या एव प्रसिद्धये॥*

*यदा मनसि सञ्जातं, वैतृष्ण्यं सर्ववस्तुषु।*
*तदैव संन्यसेद्विद्वा-नन्यथा पतितो भवेत्॥*

## एकोनविंशतितमं प्राभृतम्

तदेवमुक्तमष्टादशं प्राभृतम्। साम्प्रतमेकोनविंशतितममारभ्यते तस्य चायमर्थाधिकारो यथा कति चन्द्रसूर्या सर्वलोके आख्याता ? इति। ततस्तद्विषयं प्रश्नसूत्रमाह-

**मू० ता कति णं चंदिमसूरिया सव्वलोयंसि ओभासंति उज्जोवेंति तवेंति पभासेंति आहिताति वदेज्जा? तत्थ खलु इमाओ दुवालस पडिवत्तीतो पण्णत्तातो - तत्थेगे एवमाहंसु - ता एगे चंदे एगे सूरे सव्वलोगंसि ओभासंति जाव पभासंति आहिते ति। एगे०१। एगे पुण० ता तिण्णि चंदा [1]तिण्णि चेव सूरा सव्वलोए०। एगे०२। एगे पुण० ता आउट्टिं चंदा० आउट्टिं सुरा। एवं एएणं अभिलावेणं जातो चेव ततिए पाहुडे दुवालसपडिवत्तीओ तातो एव इहंपि णेयव्वातो, नवरं सत्त य दस य जाव ता बावत्तरं चंदसहस्सं बावत्तरं सूरितसहस्सं सव्वलोयं ओभासंति जाव पभासंति आहिते ति। एगे एव०।**

**टी०** '**ता कइ ण**'मित्यादि। '**ता**' इति पूर्ववत्, **कति** - किम्प्रमाणा, '**ण**'मिति वाक्यालङ्कारे **चन्द्रसूर्याः सर्वलोके अवभासमाना उद्योतयन्तस्तापयन्तः प्रभासयन्त आख्याता इति वदेत्** ? एवमुक्ते भगवानेतद्विषये यावत्यः प्रतिपत्तयः तावतीरुपदर्शयति- '**तत्थे**'त्यादि। **तत्र** सर्वलोकविषयचन्द्रसूर्यास्तित्वसङ्ख्याविषये **खल्विमा** वक्ष्यमाणस्वरूपा **द्वादश प्रतिपत्तयः** परतीर्थिकाभ्युपगमरूपाः **प्रज्ञप्तास्तत्र** तेषां द्वादशानां परतीर्थिकानां मध्ये **एके** परतिर्थिका **एवमाहुः**, '**ता**' इति तेषां परतीर्थिकानां (प्रथमं) स्व[प्रथम]शिष्यं प्रत्यनेकवक्तव्यतो[2]पक्रमे क्रमोपदर्शनार्थः **एकश्चन्द्रः एकः सूर्यः सर्वलोकम**वभासयति **अवभासयन् उद्योतयन् तापयन् प्र[का](भा)सयन् आख्यात इति वदेत्**। अत्रैवोपसंहारमाह -

---

१. तिण्णि सूरा - U। २. ......तोपक्रमोपदर्शनार्थः - E।

**'एगे एवमाहंसु १'। एके पुनरेवमाहुः त्रयश्चन्द्रास्त्रयः सूर्याः सर्वलोकमवभासय[न्ति](न्त ४) आख्याता इति वदेत्।** उपसंहारवाक्यं - **'एगे एवमाहंसु २'। एके पुन(रेवमाहु)रर्द्धचतुर्थाश्चन्द्रा अर्द्धचतुर्थाः सूर्याः सर्वलोकमाभासयन्त(४) आख्याता इति वदेत्।** अत्रोपसंहारः **'एगे एवमाहंसु ३'। 'एव'**मित्यादि। एवमुक्तेन प्रकारेण **एतेनानन्तरोदितेनाभिलापेन या एव तृतीये प्राभृते द्वादश प्रतिपत्तय** उक्तास्ता **एव इहापि ज्ञातव्याः, नवरमनेन** क्रमेण ज्ञातव्याश्चतुर्थ्यां प्रतिपत्तौ प्रत्येकं **सप्त** चन्द्राः सूर्याश्च वक्तव्याः, पञ्चम्यां **दश,** एवं **यावत्** द्वादश्यां प्रतिपत्तौ **द्वासप्ततं चन्द्रसहस्रं द्वासप्ततं सूर्यसहस्रमिति।** तत्र चैवमभिलापः - **'एगे पुण एवमाहंसु - ता सत्त चंदा सत्त सूरा सव्वलोयं ओभासंति ४ आहियत्ति वएज्जा। एगे एवमाहंसु ४। एगे पुण एवमाहंसु - ता दस चंदा दस सूरा सव्वलोयं ओभासयंति ४ आहियत्ति वएज्जा। एगे एवमाहंसु ५। एगे पुण एवमाहंसु - ता बारस चंदा बारस सूरा सव्वलोगं ओभासयंति ४ आहियत्ति वएज्जा। एगे एवमाहंसु ६। एगे पुण एवमाहंसु - ता बायालीसं चंदा बायालीसं सूरा सव्वलोयं ओभासयंति ४ आहियत्ति वएज्जा। एगे एवमाहंसु ७। एगे पुण एवमाहंसु - ता बावत्तरिं चंदा बावत्तरिं सूरा सव्वलोयं ओभासयंति ४ आहियत्ति वएज्जा। एगे एवमाहंसु ८। एगे पुण एवमाहंसु - ता बायालीसं चं[दा](दसयं) बायालीसं सूरसयं सव्वलोयं ओभासइ ४ आहियत्ति वएज्जा। एगे एवमाहंसु ९। एगे पुण एवमाहंसु - ता बावत्तरं चंदसयं बावत्तरं सूरसयं सव्वलोयं ओभासइ आहियत्ति वएज्जा। एगे एवमाहंसु १०। एगे पुण एवमाहंसु - ता बायालीसं चंदसहस्सं बायालीसं सूरसहस्सं सव्वलोयं ओभासइ[1] आहियत्ति वएज्जा। एगे एवमाहंसु ११। एगे पुण एवमाहंसु - ता बावत्तरं चंदसहस्सं बावत्तरं सूरसहस्सं सव्वलोयं**

---

१. ओभासेइ - G।

**ओभासइ ४ आहियत्ति वएज्जा। (एगे एवमाहंसु १२।)' इति।**

एताः सर्व्वा अपि प्रतिपत्तयो मिथ्यारूपास्तथा च भगवान् स्वमतमेताभ्यः पृथग्भूतमाह -

**मू० वयं पुण एवं वदामो। ता अयण्णं जंबुद्दीवे २ जाव परिक्खेवेणं। (ता) जंबुद्दीवे णं दीवे दो चंदा पभासेंसु पभासेंति जहा जीवाभिगमे जाव तारातो। ता जंबुद्दीवं णं दीवं लवणे णामं समुद्दे वट्टे वलयाकार(संठाण)संठिते सव्वतो समंता परिक्खिवित्ता णं चिट्ठति। ता लवणे णं समुद्दे किं समचक्कवालसंठिते विसम-चक्कवालसंठिते ? ता समचक्कवालसंठिते नो विसमचक्कवालसंठिते। ता लवणे णं समुद्दे केवतितं चक्कवालविक्खंभेणं केवतितं परिक्खेवेणं आहितात्ति वदेज्जा ? ता दो जोयणसयसहस्साइं चक्क-वालविक्खंभेणं पन्नरसजोयणसतसहस्साइं एक्कासीतिं च सहस्साइं सतं च उयालं किंचि विसेसू[णे](णं) परिक्खेवेणं। ता लवणे णं समुद्दे चत्तारि चंदा पभासिंसु वा जाव तारातो। ता लवणं णं समुद्दं धायतिसंडे णं दीवे वट्टे वलयाकारसंठिते जाव चिट्ठति। ता धायइसंडे णं दीवे किं समचक्कवालसंठिते विसम० ? एवं विक्खंभो परिक्खेवो जोतिसं[1] जहा जीवाभिगमे जाव तारातो। ता धायतिसंडं णं दीवं कालोए णामं समुद्दे वट्टे वलया० जाव चिट्ठति। ता कालोए णं समुद्दे किं समचक्कवालसंठिते विसम० ? एवं विक्खंभो परिक्खेवो जोतिसं च भाणियव्वं जाव तारातो। ता कालोयं णं समुद्दं पुक्खरवरे णं दीवे वट्टे वलया० जाव चिट्ठति। ता पुक्खरवरे णं दीवे किं समचक्कवाल० ? एवं विक्खंभो परिक्खेवो जोतिसं जाव तारातो।**

१. 'जोतिसं च भाणियव्वं जाव' - U।

**ता पुक्खरवरस्स णं दीवस्स चक्कवालविक्खंभस्स बहुमज्झदेसभाए एत्थ णं माणुसुत्तरे णामं पव्वते वट्टे वलयाकारसंठाणसंठिते पण्णत्ते जे णं पुक्खरवरं दीवं दुहा विभयमाणे विभ० चिट्ठति, तं जहा - अब्भंतरपुक्खरद्धं च बाहिरपुक्खरद्धं च। ता अब्भिंतरपुक्खरद्धे णं किं समचक्कवालसं० ? एवं विक्खंभो परिक्खेवो जोतिसं जाव तारातो। ता मणुस्सखेत्ते णं केवतितं आयामविक्खंभेणं केवतितं० ? एवं विक्खंभो परिक्खेवो जोतिसं गाहातो य जाव एगससीपरिवारो तारागणकोडिकोडीणं। ता पुक्ख(रव)रं णं दीवं पुक्खरोदे णामं समुद्दे वट्टे वलया० जाव चिट्ठति। एवं विक्खंभो परिक्खेवो जोतिसं च भाणितव्वं जहा जीवाभिगमे जाव सयंभूरमणे।**

## एगुणवीसइमं पाहुडं १९।

**टी०** '**वयं पुण**' इत्यादि। **वयं** पुनरुत्पन्नकेवलज्ञाना **एवं** वक्ष्यमाणप्रकारेण **वदामस्तमेव** प्रकारमाह - '**ता अयन्न**'मित्यादि। इह जम्बूद्वीपवाक्यं पूर्व्ववत् परिपूर्ण्णं पठनीयं व्याख्यानीयं च। '**ता जंबुद्दीवे णं दीवे दो चंदा**' इत्यादि। अत्र '**जहा जीवाभिगमे जाव ताराओ**' त्ति वचनादेवं सूत्रपाठो द्रष्टव्यः [१]'**दो चंदा पभासिंसु वा पभासिंति वा (पभासिस्संति वा), दो सूरिया तवयंसु वा तवयंति वा तवइस्संति वा, छप्पन्नं नक्खत्ता जोगं जोएंसु वा** [२]**जोइंति वा जोइस्संति वा, छावत्तरं गहसयं चारं चरिंसु वा चरिंति वा चरिस्संति वा, एगं सयसहस्सं [ब](ते)त्तीसं च सहस्सा नव सया पन्नासा तारागणकोडिकोडीणं सोभंसु वा सोभंति वा सोभिस्संति वा, 'दो चंदा दो सूरा नक्खत्ता खलु हवंति छप्पन्ना। छावत्तरं गहसयं जंबुद्दीवे वियारी**

१. मुद्रितजीवाजीवाभिगमसूत्रे त्वयं सूत्रपाठोऽन्यथा दृश्यते। २. जोयंति - T।

**णं॥१॥ एगं च सयसहस्सं तेत्तीसं खलु भवे सहस्साइं।** [१] **नव य सया पन्नासा तारागणकोडिकोडीणं ॥२॥"** (जीवाजीवाभिगमसूत्रे सूत्र १५३) इति। अस्य व्याख्या- **जंबूद्वीपे द्वौ चन्द्रौ प्रभासितवन्तौ प्रभासेते प्रभासिष्यते** द्रव्यास्तिकनयमतेन सकलकालमेवंविधाया एव जगत्स्थितेः सद्भावात्। तथा **द्वौ सूर्यौ तापितवन्तौ तापयतस्तापयिष्यतः**। तथा एकैकस्य शशिनोऽष्टाविंशति-नक्षत्राणि परिवारो जम्बूद्वीपे च द्वौ शशिनौ, ततः **षट्पञ्चाशन्नक्षत्राणि** जम्बूद्वीपे चन्द्रसूर्याभ्यां सह **योगं युक्तवन्ति युञ्जन्ति योक्ष्यन्ति वा**। तथा एकैकस्य शशिनोऽ[२]ष्टाशीतिः ग्रहाः सपरिवारास्ततः शशिद्वयसत्कग्रहमीलने सर्वसङ्ख्यया **षट्सप्तत्यधिकं ग्रहशतं** भवति, तत् जम्बूद्वीपे **चारं अचरत् चरति चरिष्यति** च। तथा एकैकस्य शशिनस्तारापरिवारः (कोटी)कोटीनां षट्षष्टिसहस्राणि नवशतानि पञ्चसप्तत्यधिकानि, जम्बूद्वीपे च द्वौ शशिनौ, तत एतत्ताराप्रमाणं द्वाभ्यां गुण्यते, (तत) **एकं शतसहस्रं त्रयस्त्रिंशत् सहस्राणि नव शतानि पञ्चाशदधिकानि तारागणकोटिकोटीनां** भवन्ति, एतावत्प्रमाणास्तारा जम्बूद्वीपे शोभितवत्यः शोभन्ते शोभिष्यन्ते च। सम्प्रति विनेयजनानुग्रहाय यथोक्तजम्बूद्वीपगतचन्द्रादिसङ्ख्या-सङ्ग्राहिके द्वे गाथे आह - '**दो चंदा**' इत्यादि। एते च द्वे सुगमे, नवरं '**जम्बुद्दीवे वियारी णं**' (तत्र '**ण**')मिति वाक्यालङ्कारे, ततो '**वियारी**' इति विभक्तिपरिणामेन चन्द्रादिभिः सह सामानाधिकरण्येन योजनीयमिति। '**ता जंबुद्दीवं ण**'मित्यादि। '**ता**' इति पूर्ववत्, **जम्बूद्वीपं द्वीपं** '**ण**'मिति वाक्यालङ्कारे **लवणो नाम समुद्रो वृत्तो वलयाकारसंस्थानसंस्थितः सर्वतः समन्तात्**-सर्वासु दिक्षु विदिक्षु चेत्यर्थः **सम्परिक्षिप्य तिष्ठति**। एवमुक्ते भगवान् गौतमः प्रश्नयति '**ता लवणे णं समुद्दे**' इत्यादि सुगमम्। भगवानाह - '**ता समचक्कवाले**' इत्यादि सुगमम्। (पुनः प्रश्नयति - '**ता लवणे ण**'मित्यादि सुगमम्।) भगवानाह - '**(ता) दो जोयण**'

---

१. नव सया - J। २. ....ष्टाशीतिग्रहाः- M, I, J।

इत्यादि। **द्वे योजनशतसहस्रे चक्रवालविष्कम्भे(न) पञ्चदशयोजनशतसहस्राणि एकाशीतिसहस्राणि शतमेकमेकोनचत्वारिंशदधिकं किञ्चिद्विशेषोनं परिक्षेपेण,** तथा(हि) - लवणसमुद्रे एकतोऽपि द्वे योजनशतसहस्रे चक्रवालविष्कम्भः परतोऽपि द्वे योजनशतसहस्रे मध्ये च जम्बूद्वीपो योजनशतसहस्रमिति सर्वमीलने पञ्चलक्षा भवन्ति ५,००,०००। एतेषां वग्[र्गो](र्गे) जाता पञ्चविंशतिर्दश च शून्यानि, दशभिर्गुणने जातान्येकादश शून्यानि २५,००,००,००,००,०००। एतस्य राशेर्वर्ग-मूलानयने लब्धानि पञ्चदशलक्षाण्येकाशीतिः सहस्राणि शतमेकमष्टात्रिंशदधिकं १५,८१,१३८, शेषमुद्धरति ष[ट्त्रिं](ड्विं)शतिलक्षाश्चतुर्विंशतिसहस्राणि नवशतानि षट्पञ्चाशदधिकानि च्छेदराशिरेकत्रिंशल्लक्षा द्वाषष्टिसहस्राणि द्वे शते षट्सप्तत्यधिके २६,२४,९५६/३१,६२,२७६ , एतदपेक्षया योजनमेकं किञ्चिदूनं लभ्यते, तत उक्तं **'सयं च उयालं किंचि विसेसूण'**मिति। **'ता लवणे (णं) समुद्दे चत्तारि चंदा पभासिंसु वा जाव ताराओ'**त्ति, अत्र **'जाव ताराओ'**त्ति वचनात्तारा-पर्यन्तमेवं सूत्रं द्रष्टव्यम् - '[1]**ता लवणे णं समुद्दे चत्तारि चंदा पभासिंसु वा पभासिंति वा पभासिस्संति वा, चत्तारि सूरिया तविंसु वा तवयंति वा तवइस्संति वा, [छावत्तरं](बारसुत्तरं) नक्खत्तसयं जोगं जोइंसु वा जोइंति वा जोइस्संति वा, तिन्नि बावन्ना महग्गहसया चारं चरंसु वा ३, दोसयसहस्सा सत्तट्ठिं च सहस्सा नव य सया पडिपुन्ना तारागणकोडीकोडीणं सोभंसु वा सोभिंति वा सोभिस्संति वा। पन्नरससयसहस्सा एगासीया सयं च उयालं। किंचि विसेसेणूणो लवणोदहिणो परिक्खेवो॥१॥ चत्तारि चेव चंदा चत्तारि य सूरिया लवणतोए। [बावन्नं](बारसं) च नक्खत्तसयं गहाण तिन्नेव बावन्ना॥२॥ दो चेव सयसहस्सा सत्तट्ठी खलु भवे सहस्साइं। नव य सया लवणजले तारागणकोडिकोडीणं॥३॥**' (जीवाजीवाभिगमसूत्रे सूत्र १५५)

१. मुद्रितजीवाजीवाभिगमसूत्रे त्वयं सूत्रपाठोऽन्यथा दृश्यते।

इति। इदं सकल[मिति](मपि) सूत्रं सुगमम्। नवरं लवणसमुद्रे चत्वारः शशिन इत्यष्टाविंशतिनक्षत्राणि चतुर्भिर्गुण्यन्ते ततो द्वादशोत्तरं नक्षत्राणां शतं तत्र भवति, अष्टाशीतिश्च ग्रहाश्चतुर्भिर्गुणितास्त्रीणि शतानि द्विपञ्चाशदधिकानि तेषां भवन्ति, तारागणकोटिकोटीनां [१]षट्षष्टिः सहस्राणि नवशतानि पञ्चसप्तत्यधिकानि चतुर्भिर्गुण्यन्ते, ततो यथोक्तं ताराप्रमाणं भवतीति। '**ता लवणं णं समुद्द**'मित्यादि सुगमम्। '**ता धायइसंडे ण**'मित्यादि। अत्र '**जहा जीवाभिगमे जाव ताराओ**'त्ति वचनात् **जीवाभिगमो**क्तप्रकारेण तावत्सूत्रं वक्तव्यं यावत्ताराप्रमाणसूत्रम्। तच्चैवं - '[२]**धायइसंडे णं दीवे (किं) समचक्कवालसंठिए०। धायइसंडे णं दीवे ता केवइयं चक्कवालविक्खंभेणं केवइयं परिक्खेवेणं [३]आहियत्ति वएज्जा? ता चत्तारि जोयण(सत)सहस्साइं चक्कवालविक्खंभेणं ईयालीसं (जोयण)-सयसहस्साइं (दस य सहस्साइं) नव य एगट्ठा जोयणसया किंचि विसेसूणा परिक्खेवेणं आहियत्ति वएज्जा। धायइसंडे दीवे बारस चंदा पभासिंसु वा ३, बारस सूरिया तवेंसु वा ३, तिन्नि छत्तीसा नक्खत्तसया जोगं जोएंसु वा ३, एक्कं छप्पन्नं महग्गहसहस्सं चारं चरेंसु वा ३, अट्ठेव सयसहस्सा तिन्नि सहस्साइं सत्त सयाइं तारागणकोडिकोडीणं सोभंसु वा सोभंति वा सोभिस्संति वा, धायइसंडे परिरयो ईयालीस दसुत्तरा सयसहस्सा। नव य सया एगट्ठा किंचि विसेसेण परिहीणा॥१॥ चउवीसं ससिरविणो नक्खत्तसयाइं तिन्नि छत्तीसा। ए[वं](गं) च (गह)सहस्सं छप्पन्नं धायईसंडे॥२॥ अट्ठेव सयसहस्सा तिन्नि सहस्साइं सत्त च सयाइं। धायइसंडे दीवे तारागणकोडिकोडीणं॥३॥' (जीवाजीवाभिगमसूत्रे सूत्र १७४)** इति। इदमपि सुगमं, नवरं परिधिगणितपरिभावना एवं कर्त्तव्या - जम्बूद्वीपस्य विष्कम्भो

१. षट्षष्टिसहस्राणि - H। २. मुद्रितजीवाजीवाभिगमसूत्रे त्वयं सूत्रपाठोऽन्यथा दृश्यते। ३. आहयत्ति - B।

योजन(लक्षं), ल[क्ष](व)णस्योभयतो द्वे द्वे योजनलक्षे इति (मीलि)ताश्चतस्रो लक्षाः, धातकीखण्डस्योभयतश्चतस्रो लक्षा, मीलिता अष्टौ, सर्वसङ्ख्यया जातास्त्रयोदशलक्षाः १३,००,०००। ततोऽस्य राशेर्वर्ग्गे जात एकक षट्को नवकः शून्यानि च दश १६,९०,००,००,००,०००, भूयो दशभिर्गुणने जातान्येकादश शून्यानि १,६९,००,००,००,००,०००। एतेषां वर्ग्गमूलानयने लब्धानि एकचत्वारिंशत् (शतसहस्राणि दश) सहस्राणि नवशतान्येकषष्ट्यधिकानि ४१,१०,९६१। नक्षत्रादिपरिमाणमपि अष्टाविंशत्यादिसङ्ख्यानि नक्षत्रादीनि द्वादशभिर्गुणयित्वा स्वयमानेतव्यम्। '**धायइसं[डे](डं) ण**'मित्यादि सुगमम्। '**ता कालोए णं समुद्दे**' इत्यादि। अत्र '**एवं विक्खंभो परिक्खेवो जोइसं भाणियव्वं जाव ताराओ**' त्ति **एवं जीवाभिगमोक्त**प्रकारेण कालोदसमुद्रस्य [1]**विष्कम्भः परिक्षेपो ज्योतिषं** च तत्र तावद्**भणितव्यं** यावत्तारास्ताराप्रमाणमिति। तच्चैवं- [2]'**ता कालोए णं समुद्दे किं समचक्कवालसंठिए०। ता कालोए णं समुद्दे केवइयं चक्कवालविक्खंभेणं केवइयं परिक्खेवेणं आहियत्ति वएज्जा ? ता कालोए णं समुद्दे अट्ठ जोयणसयसहस्साइं चक्कवालविक्खंभेणं एक्काणउयं जोयणसयसहस्साइं सत्तरिं च सहस्साइं छच्च पंचोत्तरे जोयणसए किंचि विसेसाहिए परिक्खेवेणं आहियत्ति वएज्जा। ता कालोए णं समुद्दे बायालीसं चंदा पभासेंसु वा ३, बायालीसं सूरिया तवयंसु वा ३, एकारस छावत्तरा नक्खत्तसया जोगं जोएंसु वा ३, तिन्नि सहस्सा उ छच्च (छन्)नउया महग्गहसया चारं चरेंसु वा ३, अट्ठावीसं सयसहस्सा बारस[सय]सहस्साइं नव य सया पन्नासा तारागणकोडिकोडीणं (सोभेंसु वा) सोभंति वा सोभिस्संति वा। एक्काणउइसयराइं सयसहस्साइं (परिरतो तस्स। अहियाइं छच्च पंचुत्तराइं कालोदधिवरस्स॥१॥ बातालीसं चंदा बातालीसं च दिणकरा दित्ता।**

---

१. विष्कम्भश्चक्रवालविष्कम्भः - D, K, T। २. मुद्रितजीवाजीवाभिगमसूत्रे त्वयं सूत्रपाठोऽन्यथा दृश्यते।

**कालोदधिंमि एते चरंति संबद्धलेसागा ॥२॥ नक्खत्तसहस्सं एगमेव छावत्तरं च सतमण्णं। छच्च सया छण्णउया महग्गहा तिण्णि य सहस्सा ॥३॥ अट्ठावीसं कालोदहिंमि बारस य सहस्साइं। नव य सया पन्नासा तारागण-कोडीकोडीणं ॥४॥**' (**जीवाजीवाभिगमसूत्रे सूत्र १७५**) इति। एतदपि सुगमम्, नवरं परिक्षेपगणितभावना इयं - कालोदसमुद्रस्य एकतोऽपि चक्रवालतया विष्क-म्भोऽष्टौ योजनलक्षा अपरतोऽपीति षोडश, धातकीखण्डस्यैकतोऽपि चतस्रो लक्षा अपरतोऽपीत्यष्टौ, लवणसमुद्रस्य एकतोऽपि द्वे लक्षेऽपरतोपीति चतस्रः, एको लक्षो जम्बूद्वीपस्येति सर्वसङ्ख्यया एकोनत्रिंशल्लक्षाः जाताः २९,००,०००। तेषां वर्गो विधीयते, जातोऽष्टकश्चतुष्कः एककः शून्यानि दश। ततो दशभिर्गुणने जातान्येकादश शून्यानि ८,४१,००,००,००,००,०००। तेषां वर्गमूलानयने लब्धं यथोक्तं परिधिपरिमाणं ९१,७०,६०५। शेषं त्रिको नवकस्त्रिकस्त्रिको नवकः सप्तकः पञ्चकः ३९,३३,९७५ इति यदवतिष्ठते तदपेक्षया विशेषाधिकत्वमुक्तम्। '**एक्काणउइसयराइं सयसहस्साइं**'ति एकनवतिः शतसहस्राणि सप्ततानि सप्ततिसहस्राधिकानि। नक्षत्रा-दिपरिमाणं चाष्टाविंशत्यादिसङ्ख्यानि नक्षत्रादीनि द्वाचत्वारिंशता गुणयित्वा परिभाव-नीयम्। '**ता कालोयं णं समुद्दं पुक्खरवरे ण**'मित्यादि सुगमम्। '**ता पुक्खरवरे ण**'मित्यादि। अत्र '**एवं विक्खंभो परिक्खेवो जोइसं जाव ताराओ**'त्ति [1]**जीवाभिगमोक्ते**नैव प्रकारेण पुष्करवरद्वीपस्य विष्कम्भः परिक्षेपो ज्योतिष्कं च तावद्वक्तव्यं यावत्तारास्ताराप्रमाणमिति। तच्चैवं - '[2]**ता पुक्खरवरे णं दीवे किं समचक्कवालसंठिए विसमचक्कवालसंठिए ? गो० समचक्कवालसंठिए नो विसमचक्कवालसंठिए। ता पुक्खरवरे णं दीवे केवइयं चक्कवालविक्खंभेणं केवइयं परिक्खेवेणं आहियत्ति वएज्जा ? ता सोलसजोयणसयसहस्साइं चक्कवालविक्खंभेणं एगा जोयणकोडी बाणउयं सयसहस्साइं (अउणणउइं**

---

१. जीवाभिगमोक्तप्रकारेण - T। २. मुद्रितजीवाजीवाभिगमसूत्रे त्वयं पाठोऽन्यथा दृश्यते।

**च सहस्साइं) अट्ठ य चउणवए जोयणसए परिक्खेवेणं आहिय त्ति वएज्जा। ता पुक्खरवरे णं चोयालीसं चंदसयं पभासिंसु वा ३, चोयालीसं सूरियाणं सयं तवइंसु वा ३, चत्तारि सहस्साइं बत्तीसं च नक्खत्ता जोयं जोएंसु वा ३, बारस सहस्साइं छच्च बावत्तरा महग्गहसया चारं चरेंसु वा ३, छण्णउइ सयसहस्साइं (चोयालीसं सहस्साइं) चत्तारि य सयाइं तारागणकोडिकोडीणं सोभंसु वा सोभंति वा सोभिस्संति वा। कोडी बाणउई खलु अउणणउइं भवे सहस्साइं। अट्ठ सया चउणउया परिरओ पोक्खरवरस्स॥१॥ चोयालं चंदसयं चोयालं चेव सूरियाण सयं। पुक्खरवरंमि दीवे चरंति एए [1]पभासेंता॥२॥ चत्तारि सहस्साइं बत्तीसं चेव होंति नक्खत्ता। छच्च सया बावत्तरि महग्गहा बारससहस्सा॥३॥ छण्णउइसयसहस्सा [बा](चो)यालीसं खलु भवे सहस्साइं। चत्तारि य सयाइं तारागणकोडिकोडीणं॥४॥"** (जीवाजीवाभिगमसूत्रे सूत्र १७६) इति। सुगमम्। गणितभावना त्वियं - पुष्करवरद्वीपस्यैकतोऽपि चक्रवालविष्कम्भः षोडशलक्षा अपरतोऽपि षोडशेति द्वात्रिंश[ति](त्), कालोदसमुद्रे एकतोऽप्यष्टौ लक्षा अपरतोऽप्यष्टाविति षोडश, धातकीखण्डे त्वेकतोऽपि चतस्रो लक्षा अपरतोऽपि चतस्र इत्यष्टौ, लवणसमुद्रे एकतोऽपि द्वे लक्षे परतोऽपि द्वे इति चतस्रो जम्बूद्वी[प]-(पे) लक्षमिति सर्वसङ्कलनया जाता एकषष्टिलक्षाः ६१,००,०००। एतस्य राशेर्वर्ग्गो विधीयते जातस्त्रिकः सप्तको द्विक एकक दश च शून्यानि। ततो दशभिर्गुणने जातानि शून्यान्येकादश ३७,२१,००,००,००,००,०००। एतेषां वर्ग्गमूलानयने लब्धं यथोक्तं परिधिपरिमाणम्। नक्षत्रादिपरिमाणं च अष्टाविंशत्यादिसङ्ख्यानि नक्षत्रादीनि चतुश्चत्वरिंशेन शतेन गुणयित्वा स्वयं परिभावनीयम्। **'ता पुक्खरवरस्स ण'**मित्यादि। **'ता'** इति पूर्ववत्, [2]**पुष्करवरस्य द्वीपस्य बहुमध्यदेशभागे** [3]मानु-

१. पभासिंता - M। २. पुष्करवरद्वीपस्य - E, G, T। ३. मानुषोत्तरनामपर्वतः - A, G, M।

षोत्तरनामा **पर्वतः प्रज्ञप्तः**, स च **वृत्तो**, वृत्तं च मध्यपूर्णमपि भवति यथा कौमुदीक्षणे शशाङ्कमण्डलमतस्तद्रूपताव्यवच्छेदार्थमाह **वलयाकारसंस्थानसंस्थितो, यः पुष्करवरद्वीपं द्विधा** सर्वासु दिक्षु विदिक्षु च **विभजमानो विभ[ज्य](ज)-मानस्तिष्ठति** केनोल्लेखेन द्विधा विभ[ज्य](ज)मानस्तिष्ठतीत्याह **तद्यथा अभ्यन्तर-पुष्करार्द्धं च बाह्यपुष्करार्द्धं च**, चशब्दौ समुच्चये, किं (उक्तं) भवति ? मानुषो-त्तरपर्वतादर्वाक् यत् पुष्करार्द्धं तदभ्यन्तरपुष्करार्द्धं यत्पुनस्तस्मान्मानुषोत्तरपर्व्वतात्परतः पुष्करार्द्धं तद्बाह्यपुष्करार्द्धमिति। '**ता अब्भिंतरपुक्खरद्धे ण**'मित्यादि सुगमम्। '**विक्खंभो परिक्खेवो जोइसं जाव ताराओ**' त्ति। **एवं जीवाभिगमोक्तेन** प्रकारेण **विष्कम्भो** अभ्यन्तरपुष्करार्द्धस्य **परिक्षेपो** वक्तव्यः, तथा **ज्योतिषं** चाभ्यन्तरे पुष्करार्द्धे तावद्वक्तव्यं **यावत्तारास्ताराप्रमाणम्**। तच्चैवं - '[1]**(ता अब्भिंतर-पुक्खरद्धे णं किं समचक्कवालसं०।) अब्भिंतरपुक्खरद्धे णं केवइयं चक्कवाल-विक्खंभेणं केवइयं परिक्खेवेणं आहियत्ति वएज्जा ? ता अट्ठ जोयणसय-सहस्साइं चक्कवालविक्खंभेणं एगा जोयणकोडी बायालीसं च सयसहस्साइं तीसं च सहस्साइं दो अउणापन्ने जोयणसए परिक्खेवेणं आहियत्ति वएज्जा। ता अब्भिंतरपुक्खरद्धे णं बावत्तरि चंदा [2]पभासेंसु वा ३, बावत्तरि सूरिया तवइंसु वा ३, दोन्नि सोला नक्खत्तसहस्सा जोगं जोएंसु वा ३, छ महग्गह-सहस्सा (तिन्नि य) [3]छत्तीसा चारं [4]चरिंसु वा ३, अडयालीसं सयसहस्सा बावीसं च सहस्सा दोन्नि सया तारागणकोडिकोडीणं सोभेंसु वा ३।**' **(जीवाजीवाभिगमसूत्रे सूत्र १७६)** इति सुगमम्, नवरं परिधिगणितभावना प्राग्वद्वक्तव्या, नक्षत्रादिपरिमाणं चात्राष्टाविंशत्यादिसङ्ख्यानि नक्षत्रादीनि द्वासप्तत्या गुणयित्वा परिभावनीयम्। सम्प्रति मनुष्यक्षेत्रवक्तव्यतामाह - '**ता माणुसखेत्ते णं**

---

१. मुद्रितजीवाजीवाभिगमसूत्रे त्वयं पाठोऽन्यथा दृश्यते। २. पभासिंसु - G। ३. 'बत्तीसा' इति मुद्रितसूर्यप्रज्ञप्तिवृत्तौ पाठः, स तु न समीचीनो भाति। ४. चरेंसु - G, T।

**केवइयं आयामविक्खंभेणं केवइयं परिक्खेवेणं आहिय त्ति वएज्जा। एवं विक्खंभो परिक्खेवो जोइसं जोइसगा(हा)ओ य जाव एगससीपरिवारो तारागणकोडीकोडी ण**'मिति। **एवं जीवाभिगमोक्तेन** प्रकारेण मानुषक्षेत्रस्य **विष्कम्भः परिक्षेपो** ज्योतिष्कं (ज्योतिष्क)बद्धगाथाश्च तावद्वक्तव्या **यावत्** '**एगससीपरिवारो तारागणकोडिकोडीण**'मिति पदम्, तत्रैवं सूत्रपाठः [1]'**ता पणयालीसं जोयणसयसहस्साइं आयामविक्खम्भेणं एगा जोयणकोडी बायालीसं सयसहस्साइं (तीसं च सहस्साइं) दोन्नि अउणापन्ने जोयणसए परिक्खेवेणं आहियत्ति वएज्जा। ता समयक्खेत्ते णं बत्तीसं चंदसयं पभासिंसु वा ३, बत्तीसं सूरियाण सयं तवयंसु वा ३, तिन्नि सहस्सा (छच्च) छन्नउया नक्खत्तसया जोगं जोएंसु वा ३, एक्कारससहस्सा छच्च सोलस महग्गहसया चारं चरिंसु वा चरिंति वा चरिस्संति वा, अट्ठासीइ (सय)सहस्साइं चत्तालीसं च सहस्सा सत्तसया तारागणकोडिकोडीणं सोभंसु वा सोभंति वा सोभिस्संति वा। अट्ठेव सयसहस्सा अब्भिंतरपुक्खरस्स विक्खंभो। पणयालीस(सय)-सहस्सा माणुसखेत्तस्स विक्खंभो ॥१॥ कोडी बायालीसा तीससहस्सा दो सया अउणपन्ना। माणुस्सखेत्तपरिरओ एमेव य पुक्खरद्धस्स॥२॥ बावत्तरिं चंदा बावत्तरिमेव दिणयरा दित्ता। पुक्खरवरदीवड्ढे चरंति एए पभासेंता॥३॥ तिन्नि सया छत्तीसा छच्च सहस्सा महग्गहाणं तु। नक्खत्ताणं तु भवे [2]सोलसाइं दुवे सहस्साइं॥४॥ अडयालीस(सय)सहस्सा बावीसं खलु भवे सहस्साइं। दो य सया पुक्खरद्धे तारागणकोडिकोडीणं॥५॥ बत्तीसं चंदसयं बत्तीसं चेव सूरियाण सयं। सयलं माणुस्सलोयं चरंति एए पभासेंता॥६॥ एक्कारस य सहस्सा छप्पि य सोला महग्गहाणं तु। छच्च सया छन्नउया नक्खत्ता तिन्नि य सहस्सा॥७॥ अट्ठासी चत्ताइं सयसहस्साइं मणुयलोयम्मि। सत्त**

---

१. मुद्रितजीवाजीवाभिगमसूत्रे त्वयं पाठोऽन्यथा दृश्यते। २. सोलाइं - T।

य सया अणूणा तारागणकोडिकोडीणं॥८॥ एसो तारापिंडो सव्वसमासेणं मणुयलोयम्मि। बहिया पुण ताराओ जिणेहिं भणिया असंखेज्जा॥९॥ एवइयं तारग्गं [जिण](जं) भणियं माणुसंमि लोयंमि। चारं कलंबुयापुप्फसंठियं जोइसं चरइ॥१०॥ रविससिगहनक्खत्ता एवइया आहिया मणुयलोए। जेसिं नामागोयं न पागया पन्नवेहिंति॥११॥ छावट्ठी पिडगाइं चंदाइच्चाण मणुयलोयम्मि। दो चंदा दो सूरा[ण] (य) होंति एक्केक्कए पिडए॥१२॥ छावट्ठीपिडगाइं नक्खत्ताणं तु मणुयलोयंमि। छप्पन्नं नक्खत्ता य होंति एक्केक्कए पिडए॥१३॥ छावट्ठि पिडगाइं महग्गहाणं तु मणुयलोयम्मि। छावत्तरिं गहसयं होइ एक्केक्कए पिडए॥१४॥ चत्तारि य पंतीओ चंदाइच्चाण मणुयलोयम्मि। छावट्ठी छावट्ठी य होइ एक्केक्किया पंती॥१५॥ छप्पन्नं पंतीओ नक्खत्ताणं तु मणुयलोयम्मि। छावट्ठी छावट्ठी य होइ एक्केक्किया पंती॥१६॥ छावत्तरिं गहाणं पंतिसयं होइ मणुयलोयंमि। छावट्ठी छावट्ठी य होइ एक्केक्किया पंती॥१७॥ ते मेरुमणुचरंता पयाहिणावत्तमंडला सव्वे। अणवट्ठियजोगेहिं चंदा सूरा गहगणा य॥१८॥ नक्खत्ततारगाणं अवट्ठिया मंडला मुणेयव्वा। ते विय पयाहिणावत्तमेव मेरुं अणुचरंति॥१९॥ रयणियरदिणगराणं उड्ढं च अहेव संकमो नत्थि। मंडलसंकमणं पुण [अ](स)ब्भंतरबाहिरं[य] ति(रिए)॥२०॥ रयणियरदिणयराणं नक्खत्ताणं महग्गहाणं च। चारविसेसेण भवे सुहदुक्खविही मणुस्साणं॥२१॥ तेसिं पविसिंताणं तावक्खेत्तं तु वड्ढए नियमा। तेणेव कमेण पुणो परिहायइ [वि](नि)क्खमंताणं॥२२॥ तेसिं कलंबुयापुप्फसंठिया तावखेत्त[सु]पहा। अंतो य संकुडा बाहिं वित्थडा चंदसूराणं॥२३॥ केणं वड्ढइ चंदो ? परिहाणी केण होइ चंदस्स ? कालो वा जोण्हो वा केणणुभावेणं चंदस्स॥२४॥ किण्हं राहुविमाणं निच्चं चंदेण होइ अविरहियं। चउरंगुलमप्पत्तं हेट्ठा चंदस्स

**तं चरइ॥२५॥ बावट्ठिं बावट्ठिं दिवसे दिवसे तु सुक्कपक्खस्स। जं परिवड्ढइ चंदो खवेइ तं चेव कालेणं॥२६॥ पन्नरसयभागेण य चंदं पन्नरसमेव तं वरइ। [1]पन्नरसयभागेण पुणो वि तं चेव वक्कमइ॥२७॥ एवं वड्ढइ चंदो परिहाणी एवं होइ चंदस्स। कालो वा [2]जुण्हो वा एयाणुभावेण चंदस्स॥२८॥ अंतो मणुसखेत्ते हवंति चारोवगा उ उववन्ना। पंचविहा जोइसिया चंदा सूरा गहगणा य॥२९॥ तेणं परं [जो](जे) से[से](सा) चंदाइच्चग्गहतारनक्खत्ता। नत्थि गई नवि चारो अवट्ठिया ते मुणेयव्वा॥३०॥ एवं जंबुद्दीवे दुगुणा लवणे चउग्गुणा होंति। लावणगा य तिगुणिया ससिसूरा धायईसंडे॥३१॥ दो चंदा इह दीवे चत्तारि य सायरे लवणतोए। धायइसंडे दीवे बारस चंदा य सूरा य॥३२॥ धायइसंडप्पभिइ उद्दिट्ठा तिगुणिया भवे चंदा। आइल्लचंदसहिया अणंतराणंतरे खेत्ते॥३३॥ रिक्खग्गहतारग्गं दीवसमुद्दे ज[इ](त्थि)च्छसी [मा](णा)उं। तस्स ससीहिं गुणियं रिक्खग्गहतारग्गं तु॥३४॥ बहिया उ माणुसनगस्स चंदसूराणऽवट्ठिया [3]तेया। चंदा अभिइजुत्ता सूरा पुण होंति पुस्सेहिं॥३५॥ चंदाओ सूरस्स (य) सूरा चंदस्स अंतरं होइ। पन्नाससहस्साइं जोयणाणं अणूणाइं॥३६॥ सूरस्स य सूरस्स य ससिणो ससिणो य अंतरं होइ। बहिया माणुस्सनगस्स जोयणाणं सयसहस्सं॥३७॥ सूरं[ति](त)रिया चंदा चंदं[ति](त)रिया य दिणयरा दित्ता। चित्तंतरलेसागा सुहलेसा मंदलेसा य॥३८॥ अट्ठासीइं च गहा अट्ठावीसं च होंति णक्खत्ता। एगससिपरिवारो एत्तो तारागणं वोच्छामि॥३९॥ छावट्ठिसहस्साइं नव चेव सयाइं पंच सयराइं एगससिपरिवारो तारागणकोडिकोडीणं॥४०॥' (जीवाजीवाभिगमसूत्रे सूत्र १७७)** इति। एतस्य समस्तस्यापि सूत्रस्य क्रमेण व्याख्या - तत्र मानुषक्षेत्रस्यायामविष्कम्भविषये पञ्चचत्वारिंशल्लक्षा एवं - एको लक्षो जम्बूद्वीपे,

१. पन्नरसभागेण - F, J। २. जोण्हा - F। ३. जुण्हा - S।

ततो लवणसमुद्रे एकतोऽपि द्वे लक्षेऽपरतोऽपि द्वे इति चतस्रः, धातकीखण्डे एकतोऽपि चतस्रो लक्षा अपरतोऽपि चतस्रो लक्षा इत्यष्टौ, कालोदसमुद्रे एकतोऽप्यष्टावपरतोऽप्यष्टाविति षोडश, अभ्यन्तरपुष्करार्द्धेऽप्येकतोऽप्यष्टौ लक्षा [१]अपरतोऽपीति षोडशेति सर्वसङ्ख्यया पञ्चचत्वारिंशल्लक्षाः। परिधिगणितभावना तु '**विक्खंभवग्गदहगुणे**'त्यादि करणवशात् स्वयं कर्त्तव्या। नक्षत्रादिपरिमाणं तु अष्टाविंशत्यादिसङ्ख्या[दि](नि) नक्षत्रादीन्येकशशिपरिवारभूतानि द्वात्रिंशेन शतेन गुणयित्वा स्वयमानेतव्यम्। '**अट्ठेव सयसहस्सा**' इत्यादि। अ[य](त्र) गाथापूर्वार्द्धे-नाभ्यन्तरपुष्करार्द्धस्य विष्कम्भपरिमाणमुक्तमुत्तरार्द्धे(न) मानुषक्षेत्रस्य॥१॥ '**कोडी**'-त्यादि। एका योजन**कोटी द्वाचत्वारिंश**च्छतसहस्राधिका **त्रिंशत् सहस्राणि द्वे शते एकोनपञ्चाशदधिके** १,४२,३०,२४९, एतावत्प्रमाणो **मानुषक्षेत्रस्य परिरयः**, एष एतावत्प्रमाण **एव पुष्करार्द्धस्य** अभ्यन्तरपुष्क[र]रार्द्धस्यापि परिरयः॥२॥ '**बावत्तरिं च चंदा**' इत्यादिगाथात्रयमभ्यन्तरपुष्करार्द्धगतचन्द्रादिसङ्ख्याप्रतिपादकं सुगमम् ॥३॥॥४॥॥५॥ [२]यदपि च '**बत्तीसं चंदसयं**'इत्यादि गाथात्रयं सकलमनुष्यलोकगतचन्द्रादिसङ्ख्याप्रतिपादकं तदपि सुगमम्, नवरं '**अट्ठासी चत्ता**' इति **अष्टाशीतिशतसहस्राणि चत्वारिंशानि**-चत्वारिंशत्सहस्राधिकानि, [३]शेषं गतार्थम्॥६॥॥७॥॥८॥ सम्प्रति सकलमनुष्यलोकगततारागणस्यैवोपसंहारमाह - '**एसो**' इत्यादि। **एषो**ऽनन्तरगाथोक्तसङ्ख्याक**स्तारापिण्डः** सर्वसङ्ख्यया **मानुषे लोके** आख्यात इति गम्यते। **बहिः पुनर्**मनुष्यलोकात् यास्**तारा जिनैः** सर्व-ज्ञैस्तीर्थकृद्भि**र्भणिता असङ्ख्याताः** द्वीपसमुद्राणामसङ्ख्यातत्वात्, प्रतिद्वीपं प्रतिसमुद्रं च यथायोगं सङ्ख्येयानामसङ्ख्येयानां च ताराणां सद्भावात्॥९॥ '**एवइय**'मित्यादि। **एतावदे**तावत्सङ्ख्याकं **ताराग्रं** तारापरिमाणं **यदनन्तरं भणितं**

१. अपरतोऽपीत्यष्टौ - A, D, E, F, I, J, N, T। २. यद्यपि बत्तीसं - B,T। ३. शेषं सुगमं गतार्थम् - A।

**मानुषलोके** (तत्) **ज्योतिष्कं** ज्योतिष्कदेवविमानरूपं **कदम्बपुष्पसंस्थितं** - कदम्बपुष्पवदधः सङ्कुचितमुपरि विस्तीर्णमुत्तानीकृतार्द्धकपित्थसंस्थानसंस्थितमित्यर्थः **चारं चरति** चारं प्रतिपद्यते, तथाजगत्(स्वाभाव्यात्), ताराग्रहणं चोपलक्षणं तेन सूर्यादयोऽपि यथोक्तसङ्ख्याका मनुष्यलोके तथाजगत्स्वाभाव्यात् चारं प्रतिपद्यन्ते इति द्रष्टव्यम्॥१०॥ सम्प्रत्येतद्गतमेवोपसंहारमाह - '**रवी**'त्यादि। **रविशशिग्रहनक्षत्राणि** उपलक्षणमेतत् तारकाणि च **एताव(न्)**त्येतावत्सङ्ख्याकानि **व्याख्यातानि**[१] सर्व्वज्ञै**र्मनुष्यलोके, येषां** किमित्याह- येषां सूर्यादीनां यथोक्तसङ्ख्याका[नि](नां) सकलमनुष्यलोकभाविनां प्रत्येकं **नामगोत्राणि** इहान्वर्थयुक्तं नाम सिद्धान्तपरिभाषया नामगोत्रमित्युच्यते ततोऽयमर्थो नामगोत्राणि अन्वर्थ[योगिनामन](युक्तानि नामानि) यदि वा नामानि च गोत्राणि (च नामगोत्राणि) **प्राकृता** - अनतिशायि[म]नः पुरुषा [न्](**न**) कदाचनापि **प्रज्ञापयिष्यन्ति,** केवलं यदा तदा वा सर्वज्ञ एव। तत इदमपि सूर्यादिसङ्ख्यानं प्राकृतपुरुषाप्रमेयं सर्वज्ञोपदिष्टमिति सम्यक्श्रद्धेयम्॥११॥ '**छावट्ठी पिडगाइं**' इत्यादि। इह द्वौ चन्द्रौ द्वौ सूर्यौ चैकं पिटकमुच्यते इत्थम्भूतानि च **पिटकानि चन्द्रादित्यानां** सर्वसङ्ख्यया **मनुष्यलोके** भवन्ति **षट्षष्टि**सङ्ख्यानि। अथ किम्प्रमाणं पिटकमिति पिटकप्रमाणमाह - **एकैकस्मिन्पिटके द्वौ चन्द्रौ द्वौ सूर्यौ भवतः**। किमुक्तं भवति ? द्वौ चन्द्रौ द्वौ सूर्यावित्येतावत्प्रमाणमेकैकं चन्द्रादित्यानां पिटकमिति। एवम्प्रमाणं च पिटकं जम्बूद्वीपे (एकं, जम्बूद्वीपे) द्वयोरेव चन्द्रमसोर्द्वयोरेव च सूर्ययोर्भावात्, द्वे पिटके लवणसमुद्रे तत्र चतुर्ण्णां चन्द्रमसां चतुर्ण्णां च सूर्याणां भावात्, एवं षट् पिटकानि धातकीखण्डे एकविंशतिः कालोदे षट्त्रिंशदभ्यन्तरपुष्करार्द्धे इति भवन्ति सर्वमीलने चन्द्रादित्यानां षट्षष्टिः पिटकानि॥१२॥ '**छावट्ठी**' इत्यादि। सर्व्वस्मिन्नपि **मनुष्यलोके** सर्वसङ्ख्यया **नक्षत्राणां पिटकानि** भवन्ति **षट्षष्टिः** नक्षत्र-

---

१. आहिया - मूले।

पिटकपरिमाणं च शशिद्वयसम्बन्धिनक्षत्रसङ्ख्यापरिमाणं, तथा चाह - **एकैकस्मिन्पिटके नक्षत्राणि भवन्ति षट्पञ्चाशत्**सङ्ख्याकानि। किमुक्तं भवति? षट्पञ्चाशन्नक्षत्रसङ्ख्याकमेकैकं नक्षत्रपिटकम्। अत्रापि षट्षष्टिसङ्ख्याभावना एवं - [१]एकं नक्षत्रपिटकं जम्बूद्वीपे द्वे लवणसमद्रे (षट्) धातकीखण्डे एकविंशतिः (कालोदे) षट्त्रिंशदभ्यन्तरपुष्करार्द्धे (इति॥१३॥ '**छावट्ठी**') इत्यादि। **महाग्रहाणामपि** सर्वस्मिन् **मनुष्यलोके** सर्वसङ्ख्यया **पिटकानि** भवन्ति **षट्षष्टिः**, ग्रहपिटकपरिमाणं च शशिद्वयसम्बन्धिग्रहसङ्ख्यापरिमाणं, तथा चाह - **एकैकस्मिन्** ग्रहपिटके **भवति** [२]**षट्सप्तत्यधिकं ग्रहशतं**, षट्सप्तत्यधिकग्रहशतपरिमाणमेकैकं ग्रहपिटकमितिभावः षट्षष्टिसङ्ख्याभावना च प्राग्वत् कर्त्तव्या॥१४॥ '**चत्तारि य**' इत्यादि। इह **मनुष्यलोके चन्द्रादित्यानां पङ्क्तयश्चतस्रो भवन्ति**, तद्यथा - द्वे पङ्क्ती चन्द्राणां द्वे पङ्क्ती सूर्याणा**मेकैका** च **पङ्क्तिर्भवति षट्षष्टिः** षट्षष्टिसूर्यादिसङ्ख्या। तद्भावना चैवं - एकः किल सूर्यो जम्बूद्वीपे मेरोर्दक्षिणभागे चारं चरन् वर्त्तते एक उत्तरभागे, एकश्चन्द्रमा मेरोः पूर्वभागे एकोऽपरभागे। तत्र यो मेरोर्दक्षिणभागे सूर्यश्चारं चरन् वर्त्तते तत्समश्रेणिव्यवस्थितौ द्वौ दक्षिणभा[ग](गे) सूर्यौ लवणसमुद्रे, षट् धातकीखण्डे, एकविंशतिः कालोदे, षट्त्रिंशदभ्यन्तरपुष्करार्द्धे [एत](इत्य)स्यां सूर्यपङ्क्तौ षट्षष्टिः सूर्याः। [एषो](यो)ऽपि च मेरोरुत्तरभागे व्यवस्थितः सूर्यश्चारं चरन्नवतिष्ठते तस्यापि समश्रेणिव्यवस्थितावुत्तरभागे द्वौ सूर्यौ लवणसमुद्रे, षट् धातकीखण्डे, एकविंशतिः कालोदे, षट्त्रिंशदभ्यन्तरपुष्करार्द्धे इत्यस्यामपि पङ्क्तौ सर्वसङ्ख्यया षट्(षष्टिः) सूर्याः। तथा यो मेरोः पूर्वभागे चन्द्रमाश्चारं चरन् वर्त्तते तत्समश्रेणिव्यवस्थितौ द्वौ पूर्वभाग एव चन्द्रमसौ लवणसमुद्रे, षट् धातकीखण्डे, एकविंशतिः कालोदे, षट्त्रिंशदभ्यन्तरपुष्करार्द्धे इत्यस्यां चन्द्रपङ्क्तौ सर्वसङ्ख्यया षट्षष्टिः चन्द्रमसः। एवं यो मेरोरपरभागे चन्द्रमास्त(न्)-

१. एकनक्षत्र...... - B, T। २. षट्सप्तत्यधिकग्रहशतं - G, T।

मूलायामपि पङ्क्तौ षट्षष्टिश्चन्द्रमसो वेदितव्याः॥१५॥ '[छावट्ठी]'(छप्पन्नं) इत्यादि। **नक्षत्राणां मनुष्यलोके** सर्वसङ्ख्यया **पङ्क्तयो भवन्ति षट्पञ्चाशत्, एकैका च पङ्क्तिर्भवति षट्षष्टिः** - षट्षष्टिनक्षत्रपरिमाणा इत्यर्थः। तथाह्यस्मिन् किल जम्बूद्वीपे दक्षिणतो अर्द्धभागे एकस्य शशिनः परिवारभूतानि अभिजिदादीन्यष्टाविंशतिसङ्ख्याकानि नक्षत्राणि व्यवस्थितानि चारं चरन्ति उत्तरतोऽर्द्धभागे द्वितीयस्य शशिनः परिवारभूतान्यष्टाविंशतिसङ्ख्याकानि अभिजिदादीन्येव नक्षत्राणि क्रमेण व्यवस्थितानि। तत्र दक्षिणतो अर्द्धभागे यदभिजिन्नक्षत्रं तत्समश्रेणिव्यवस्थिते [उत्तरभागे एवं] द्वे अभिजिन्नक्षत्रे लवणसमुद्रे, षट् धातकीखण्डे, एकविंशतिः कालोदे, षट्त्रिंशदभ्यन्तरे पुष्करार्द्धे इति सर्वसङ्ख्यया षट्षष्टिरभिजिन्नक्षत्राणि पङ्क्त्या व्यवस्थितानि। एवं श्रवणादीन्यपि दक्षिणतोऽर्द्धभागे पङ्क्त्या व्यवस्थितानि षट्षष्टिसङ्ख्याकानि भावनीयानि। उत्तरतोऽप्यर्द्धभागे यदभिजिन्नक्षत्रं तत्समश्रेणिव्यवस्थिते उत्तरभागे एव द्वेऽभिजिन्नक्षत्रे लवणसमुद्रे, षट् धातकीखण्डे, एकविंशतिः कालोदे षट्त्रिंशत् पुष्करार्द्धे। एवं श्रवणादिपङ्क्तयोऽपि प्रत्येकं षट्षष्टिसङ्ख्याका वेदितव्या इति सर्वसङ्ख्यया नक्षत्राणां षट्(पञ्चाशत्) पङ्क्तयः एकैका च पङ्क्तिः षट्षष्टिसङ्ख्येति॥१६॥ **'छाव[ट्ठी](त्तरिं)'** इत्यादि। **ग्रहाणाम**ङ्गारकप्रभृतीनां सर्वसङ्ख्यया **मनुष्यलोके षट्सप्तत्यधिकं पङ्क्तिशतं भवति ए(कै)का च पङ्क्तिर्भवति षट्षष्टिः** [४] षट्षष्टिग्रह[णं]सङ्ख्या। अत्रापीयं भावना - इह जम्बूद्वीपे दक्षिणतोऽर्द्धभागे एकस्य शशिनः परिवारभूता अङ्गारकप्रभृतयो अष्टाशीतिर्ग्रहा, उत्तरतो अर्द्धभागे द्वितीयस्य शशिनः परिवारभूता अङ्गारकप्रभृतय एवाष्टाशीतिः, [सु](त)त्र दक्षिणतोऽर्द्धभागे योऽङ्गारकनामा ग्रहस्तत्समश्रेणिस्थितौ दक्षिणभाग एव द्वावङ्गारकौ लवणसमुद्रे, षट् धातकीखण्डे, एकविंशतिः कालोदे, षट्त्रिंशदभ्यन्तरपुष्करार्द्धे इति षट्षष्टिः। एवं शेषा अपि सप्ताशीतिग्रहाः पङ्क्तिव्यवस्थिताः प्रत्येकं षट्षष्टिर्वेदितव्याः एवमुत्तरतोऽप्यर्द्धभागेऽङ्गारकप्रभृतीनामष्टाशी-

तेर्ग्रहाणां पङ्क्तयः प्रत्येकं षट्षष्टिसङ्ख्याका भावनीया इति भवति सर्वसङ्ख्यया ग्रहाणां षट्सप्ततं पङ्क्तिशतमेकैका च पङ्क्तिः षट्षष्टिसङ्ख्याकेति॥१७॥ '**ते मेरुमणुचरंती**'त्यादि। **ते** मनुष्यलोकवर्त्तिनः **सर्वे चन्द्राः** सर्वे **सूर्याः** सर्वे च **ग्रहा अनवस्थितैः** यथायोगम[न्येन](न्यैः अन्यैः) नक्षत्रेण सह **योगै**रुपलक्षिताः '**पयाहिणावत्तमंडला**' इति प्रकर्षेण सर्वासु दिक्षु विदिक्षु (च) परिभ्रमतां चन्द्रादीनां दक्षिण एव मेरुर्भवति यस्मिन्नावर्त्तने - मण्डलपरिभ्रमणरूपे स प्रदक्षिणः, प्रदक्षिण आवर्त्तो येषां मण्डलानां तानि तथा, प्रदक्षिणावर्त्तानि मण्डलानि येषां ते तथा, **मेरुमनु**लक्षीकृत्य **चरन्ति** एते[न](नै)तदुक्तं (भवति) - सर्वेऽपि सूर्यादयो मनुष्य-लोकवर्त्तिनः प्रदक्षिणावर्त्तमण्डलगत्या परिभ्रमन्तीति, इह चन्द्रादित्यग्रहाणां मण्डलानि अनवस्थितानि यथायोगमन्यस्मिन्(अन्यस्मिन्) मण्डले तेषां सञ्चारित्वात्, नक्षत्रतारकाणां तु मण्डला(न्यवस्थिता)न्येव॥१८॥ तथा चाह '**नक्खत्ते**' इत्यादि। **नक्षत्राणां तारकाणां** च **मण्डलान्यवस्थितानि**, किमुक्तं भवति ? आकालं प्रतिनियतमेकैकं नक्षत्राणां (तारकाणां) च प्रत्येकं मण्डलमिति। (न) चेत्थमवस्थित-मण्डलत्वोक्तावेवमाशङ्कनीयं यथैतेषां गतिरेव न भवतीति यत आह- '**ते विये**'-त्यादि। **तान्यपि** नक्षत्राणि तारकाणि च, सूत्रे पुंस्त्वनिर्देशः प्राकृतत्वात्, **प्रदक्षिणावर्त्तमेव**, इदं क्रियाविशेषणम्, **मेरुमनु**लक्षीकृत्य चारं **चरन्ति**। एतच्च मेरुं लक्षीकृत्य प्रदक्षिणावर्त्तं तेषां चरणं प्रत्यक्षत एवोपलभ्यत इति संवादि॥१९॥ '**रयणियरे**'त्यादि **रजनिकरदिनकराणां** चन्द्रादित्याना**मूर्द्ध्वमधश्च सङ्क्रमो न भवति**, तथाजगत्स्वाभाव्यात्, **तिर्यक् पुनर्मण्डलेषु सङ्क्रमणं** भवति, [किञ्चित्](किं)विशिष्टमित्याह - **साभ्यन्तरबाह्यं** अभ्यन्तरं च बाह्यं (च अभ्यन्तर-बाह्यं) सहाभ्यन्तरबाह्येन वर्त्तते इति साभ्यन्तरबाह्यम्। एतदुक्तं भवति - सर्वाभ्यन्तरात् मण्डलात्परतस्तावन्मण्डलेषु सङ्क्र[मं](मणं) यावत् सर्वबाह्यं मण्डलं सर्वबाह्याच्च मण्डलादर्वाक्तावन्मण्डलेषु सङ्क्रमणं यावत्सर्वाभ्यन्तरमिति॥२०॥

'**रयणियरे**'त्यादि। **रजनिकरदिनकराणां** चन्द्रादित्यानां **नक्षत्राणां महाग्रहाणां (च) चारविशेषेण** - तेन ते[च](न) चारेण **सुखदुःखविधयो मनुष्याणां भवन्ति,** तथाहि - द्विविधानि सन्ति सदा मनुष्याणां [करोति](कर्म्माणि) तद्यथा- शुभ-वेद्या(नि) अशुभवेद्यानि च, क[र्म्माणि](र्म्मणां) च सामान्यतो विपाकहेतवः पञ्च, तद्यथा द्रव्यं क्षेत्रं कालो भावो भवश्च, उक्तञ्च '**उदयक्खयक्खओवसमोवसमा जं च कम्मणो भणिया। दव्वं खेत्तं कालं भावं च भवं च संपप्प॥९४९॥**' **(धर्मसङ्ग्रहणी)** 'शुभवेद्यानाञ्च कर्म्मणां प्रायः शुभद्रव्यक्षेत्रादिसामग्री विपाक-हेतुरशुभवेद्यानामशुभद्र[1]व्यक्षेत्रादिसामग्री। ततो यदा येषां जन्मनक्षत्रादिविरोधी चन्द्रसूर्यादीनां चारो भवति तदा तेषां प्रायो यान्यशुभवेद्यानि कर्म्माणि तानि तथाविधां विपाकसामग्रीमवाप्य विपाकमायान्ति, विपाकमागतानि च शरीर-रोगोत्पादनेन धनहानिकरणतो वा प्रियविप्रयोगजन[सह](नेन) कलहसम्पादनतो वा दुःखमुत्पादयन्ति। यदा च येषां जन्मनक्षत्राद्यनुकूलश्चन्द्रादीनां चारस्तदा तेषां प्रायो यानि शुभवेद्यानि कर्म्माणि तानि तां तथाविधां विपाकसामग्रीमधिगम्य विपाकं प्रपद्यन्ते, प्रपन्नविपाकानि च तानि शरीरनीरोगतासम्पादनतो [2]धनवृद्धिकरणेन वा वैरोपशमतः प्रियसम्प्रयोगसम्पादनतो वा (य)दि वा प्रारब्धाभीष्टप्रयोजननिष्पत्ति-करणतः सुखमुपजनयन्ति। अत एव महीयांसः परमविवेकिनोऽल्पमपि प्रयोजनं शुभतिथिनक्षत्रमुहूर्त्तादावारभन्ते न तु यथाकथञ्चन। अत एव च जिनानामप्याज्ञा प्रव्राजनादिकमधिकृ[त्याद्य](त्येत्थ)मवर्त्ति यथा शुभक्षेत्रे शुभां दिशमभिमुखीकृत्य शुभे तिथिनक्षत्रमुहूर्त्तादौ प्रव्राजनव्रतारोपणादिकं कर्त्तव्यं नान्यथा, तथा चोक्तं **पञ्चवस्तुके** - '[3]**एसा जिणाणमाणा खेत्ताइया य कम्मुणो भणिया। उदया[य]-(इ)कारणं जं तम्हा सव्वत्थ जइयव्वं॥११४॥**' अस्या अक्षरगमनिका - **एषा**

---

१. .....द्रव्यादि..... - M। २. धर्म.. E, K, M। ३. एसा जिणाणमाणा खित्ताईआ य कम्मुणो हुंति। उदयाइकारणं जं तम्हा एएसु जइअव्वं॥११४॥ - इति पञ्चवस्तुके पाठः।

**जिनानामाज्ञा** यथा शुभे क्षेत्रे शुभां दिशमभिमुखीकृत्य शुभे तिथिनक्षत्रमुहूर्त्तादौ प्रव्राजनव्रतारोपणादि कर्त्तव्यं नान्यथा, अपि च **क्षेत्रादयः कर्म्मणामुदयादिकारणं** भगवद्भिरुक्तास्ततो अशुभद्रव्यक्षेत्रादिसामग्रीं प्राप्य कदाचिदशुभवेद्यानि कर्माणि विपाकं गत्वोदयमासादयेयुस्तदुदये च गृहीतव्रतभङ्गादिदोषप्रसङ्गः, शुभद्रव्यक्षेत्रा-दिसामग्र्यां तु प्रायो नाशुभकर्म्मणां विपाकसम्भव इति निर्विघ्नं सामायिकपालनादि[१]। **तस्मादवश्यं** छद्मस्थेन शुभनक्षत्रादौ **यतितव्यम्**। ये तु भगवन्तोऽतिशायिनस्ते-ऽतिशयबलादेव निर्विघ्नं सविघ्नं वा सर्वमधिगच्छन्ति ततो न शुभतिथिमुहूर्त्तादि-कमपेक्षन्ते इति न तन्मार्गानु[सारेण](सरणं) छद्मस्थानां [आद्यं](न्याय्यम्)। तेन ये परममुनिपर्युपासितप्रवचनविडम्बका अपरि[मि](म)लितजिनशासनोपनिषद्भूत-शास्त्रा गुरुपरम्परायातनिरवद्यविशदकालोचितसामाचारीप्रतिपन्थिनः स्वमतिकल्पित-सामाचारीका अभिदधति यथा न प्रव्राजनादिषु शुभतिथिनक्षत्रमुहूर्त्तादिनिरीक्षणं कर्त्तव्यं, न खलु भगवान् जगत्स्वामी प्रव्राजनायोपस्थितेषु शुभतिथ्यादिनिरीक्षणं कृतवानिति तेऽपास्ता द्रष्टव्या इति॥२१॥ '**तेसि**'मित्यादि। **तेषां** सूर्यचन्द्रमसां सर्वबाह्यमण्डलादभ्यन्तरं **प्रविशतां तापक्षेत्रं** प्रतिदिवसं क्रमेण **नियमादायामतो वर्द्धते** येन च क्रमेण परिवर्द्धते **तेनैव क्रमेण** सर्वाभ्यन्तरान् मण्डलाद्बहि**र्निष्क्रमतां परिहीयते**, तथाहि - सर्वबाह्ये मण्डले चारं चर[ति](तां) सूर्यचन्द्रमसां (प्रत्येकं) जम्बूद्वीपचक्रवालस्य दशधाप्रविभक्तस्य द्वौ द्वौ भागौ तापक्षेत्रम्। ततः सूर्यस्याभ्यन्तरं प्रविशतः प्रतिमण्डलं षष्ट्यधिकषट्त्रिंशच्छतप्रविभक्तस्य (जम्बूद्वीपचक्रवालस्य) द्वौ द्वौ भागौ तापक्षेत्रस्य वर्द्धेते, चन्द्रमसस्तु मण्डलेषु प्रत्येकं पोर्ण्णमासीसम्भवे क्रमेण प्रतिमण्डलं (षड्विंशतिः) षड्विंशतिर्भागाः सप्तविंशतितमस्य च एकः सप्तभाग इति वर्द्धते। एवं प्रतिमण्डलमभिवृद्धौ यदा सर्वाभ्यन्तरमण्डले चारं चरतस्तदा प्रत्येकं जम्बूद्वीपचक्रवालस्य त्रयः परिपूर्णा दशभागास्तापक्षेत्रम्। ततः पुनरपि सर्वाभ्यन्तरात्

१. ...परिपालनादि - E, T।

मण्डलाद्बहिर्निष्क्रमणे सूर्यस्य प्रतिमण्डलं षष्ट्यधिकषट्त्रिंशच्छतप्रविभक्तस्य जम्बूद्वीपचक्रवालस्य द्वौ द्वौ भागौ परिहियेते चन्द्रमसस्तु मण्डलेषु प्रत्येकं पोर्ण्ण-मासीसम्भवे क्रमेण प्रतिमण्डलं षड्विंशतिः षड्विंशतिर्भागाः सप्तविंशतितमस्य भागस्य एकः सप्तभाग इति॥२२॥ '**तेसि**'मित्यादि। **तेषां चन्द्रसूर्याणां ताप-क्षेत्रपथाः कलम्बुकापुष्पसंस्थिता** - नालिकापुष्पाकारा भवन्ति। एतदेव व्याचष्टे - **अन्तर्मेरु**दिशि **सङ्कुचिता बहिर्लवण**दिशि **विस्तृताः**। एतच्च प्रागेव चतुर्थे प्राभृते भावितमिति भूयो न भाव्यते॥२३॥ सम्प्रति चन्द्रमसमधिकृत्य गौतमः प्रश्नयति - '**केण**'मित्यादि। **केन** कारणेन शुक्लपक्षे **चन्द्रो वर्द्धते** ? **केन** वा कारणेन **चन्द्रस्य** कृष्णपक्षे **परिहाणिर्भवति** ? **केन** वा **अनुभावेन चन्द्रस्य** एकः पक्षः कृष्णो भवत्येको **ज्योत्स[ना](नः)** शुक्लः?॥२४॥ एवमुक्ते भगवानाह - '**किण्ह**'मित्यादि। इह द्विविधो राहुः तद्यथा- पर्वराहुर्नित्यराहुश्च तत्र पर्वराहुः स उच्यते यः कदाचिदकस्मात्समागत्य निजविमानेन (चन्द्रविमानं) सूर्यविमानं चान्तरितं करोति, अन्तरिते च कृते लोके ग्रहणमिति प्रसिद्धम्। (स) इह [नि](न) गृह्यते। यस्तु नित्यराहुस्तस्य **विमानं कृष्णं** तच्च तथाजगत्स्वाभाव्यात् **चन्द्रेण** सह **नित्यं** काल**मविरहितं** तथा चतुरङ्गुलेन **चतुर्भिरङ्गुलैरप्राप्तं** सत् **चन्द्रस्य** विमानस्या-**धस्ताच्चरति**। तच्चैवं चरत् शुक्लपक्षे शनैः शनैः प्रकटीकरोति चन्द्रमसं कृष्णपक्षे शनैः [१]शनैस्तमावृणोति॥२५॥ तथा चाह '**बावट्ठि**'मित्यादि। इह द्वाषष्टिभागीकृतस्य चन्द्रविमानस्य द्वौ भागावुपरितनावपाकृत्य शेषस्य पञ्चदशभिर्भागे हृते ये चत्वारो भागा लभ्यन्ते ते द्वाषष्टिः शब्द्य(न्)ते, अवयवे समुदायोपचारात्। एतच्च व्याख्यानं जीवाभिगमचूर्ण्यादिदर्शनतः कृतं न पुनः स्वमनीषिकया। तथा चास्या एव गाथाया व्याख्याने **जीवाभिगमचूर्ण्णिः** - '**चन्द्रविमानं द्वाषष्टिभागीक्रियते, ततः पञ्चदशभिर्भागो ह्रियते, तत्र चत्वारो भागा द्वाषष्टिभागानां पञ्च-**

१. शनैरावृणोति - C, E, I, T।

**दशभागेन लभ्यन्ते, शेषौ द्वौ भागौ, एतावत् दिने २ शुक्लपक्षस्य राहुणा मुच्यते।**' इत्यादि। एवं च सति [त](य)त्**समवायाङ्गसूत्रं- 'सुक्कपक्खस्स दिवसे दिवसे चंदो बावट्ठिं बावट्ठिं भागे परिवड्ढइ।**' (सूत्र ६२) इति तदप्येवमेव व्याख[्या इ]येयम्, सम्प्रदायवशाद्धि सूत्रं व्याख्येयम्, न स्वमनीषिकया, सम्प्रदायश्च यथोक्तस्वरूप इति, तत्र **शुक्लपक्षस्य दिवसे दिवसे यत्** यस्मात् कारणात् चन्द्रो **द्वाषष्टिं द्वाषष्टिं** भागान् कृत्वा द्वाषष्टिभागसत्कान् चतुरश्चतुरो भागान् यावत्**परिवर्द्धते**, '**कालेन**' कृष्णपक्षेण पुनर्दिवसे दिवसे **ता[न्ये](ने)व** द्वाषष्टिभागसत्कान् चतुरश्चतुरो भागान् **क्षपयति** परिहापयति॥२६॥ एतदेव व्याचष्टे '**पन्नरसे**'त्यादि। कृष्णपक्षे प्रतिदिवसं राहुविमानं स्वकीयेन **पञ्चदशभागेन तं चन्द्रं** चन्द्रविमानं **पञ्चदशमेव** भागमा**वृणोति** - आच्छादयति, शुक्लपक्षे **पुनस्तमेव** प्रतिदिवसं पञ्चदशभाग-मात्मीयेन **पञ्चदशभागेन व्यतिक्रामति** - मुञ्चति। किमुक्तं भवति ? कृष्णपक्षे प्रतिपद आरभ्यात्मीयेन पञ्चदशेन भागेन प्रतिदिवसमेकैकं पञ्चदशभागमुपरितन-भागादारभ्यावृणोति शुक्लपक्षे तु प्रतिपद आरभ्य तेनैव क्रमेण प्रतिदिवसमेकैकं पञ्चदशभागं प्रकटीकरोति। तेन जगति चन्द्रमण्डलस्य वृद्धिहानी प्रतिभासेते स्वरूपतः पुनश्चन्द्रमण्डलमवस्थितमेव॥२७॥ तथा चाह '**एवं व[ठ मि]ड्ढइ**' इत्यादि। **एवं** राहुविमानेन प्रतिदिवसं क्रमेणानावरणकरणतो **वर्द्धते** - वर्द्धमानः प्रतिभासते **चन्द्रः**। **एवं** राहुविमानेन प्रतिदिवसं क्रमेणावरणकरणतः **परिहानिः** परिहानिप्रतिभासो **भवति चन्द्रस्य** विषये, (एतेषां) **एतेनैवानुभावेन** - कारणेन एकः पक्षः **कालः** कृष्णो भवति यत्र **चन्द्रस्य** परिहानिः प्रतिभासते, एकस्तु **ज्योत्स्नः** शुक्लो येन चन्द्रविषये वृद्धिप्रतिभासः॥२८॥ '**अंतो**' इत्यादि। **अन्तर्मध्ये मनुष्यक्षेत्रे** मनुष्यक्षेत्रस्य **पञ्चविधा** अपि **ज्योतिष्कास्तद्यथा चन[्द्र](द्राः) सूर्या ग्रहाश्च**शब्दान्नक्षत्राणि तारकाश्च भवन्ति, **चारोपगाश्चारयुक्[तेः](ताः)**॥२९॥ '**तेण पर**'मित्यादि। **तेने**ति प्राकृतत्वात् पञ्चम्यर्थे तृतीया, (ततो) मनुष्यक्षेत्रात्**परं यानि शेषाणि चन्द्रा-**

**दित्यग्रहतारानक्षत्राणि** - चन्द्रादित्यग्रहतारानक्षत्रविमानानि, सूत्रे पुंस्त्वनिर्देशः प्राकृतत्वात्, तेषां **नास्ति गतिर्न** स्वस्मात्स्थानात् चलनं **ना[ति](पि) चारो** - मण्डलगत्या परिभ्रमणं किन्त्व**वस्थितान्येव तानि** ज्ञातव्यानि॥३०॥ '**एवं जम्बुद्दीवे**' इत्यादि। **एवं** सति एकैकौ चन्द्रसूर्यौ **जम्बूद्वीपे द्विगुणौ** भवतः, किमुक्तं भवति ? द्वौ चन्द्रमसौ द्वौ सूर्यौ जम्बूद्वीपे, [१]लवणसमुद्रे तावेकैकौ सूर्यचन्द्रमसौ **चतुर्गुणौ भवत**श्चत्वारश्चन्द्राश्चत्वारः सूर्या लवणसमुद्रे भवन्तीति भावः, **लावणिका** - लवणसमुद्रभवाः **शशिसूरास्त्रिगुणिता धातकीखण्डे** भवन्ति, द्वादश चन्द्रा द्वादश सूर्या धातकीखण्डे भवन्तीत्यर्थः ॥३१॥ '**दो चंदा**' इत्यादि सुगमम्॥३२॥ '**धायइसंडे**' इत्यादि। धातकीखण्डः प्रभृतिरादिर्येषां ते धातकीखण्डप्रभृतयस्तेषु **धातकीखण्डप्रभृतिषु** द्वीपेषु समुद्रेषु च ये **उद्दिष्टा**श्चन्द्रा द्वादशादय उपलक्षणमेतत् सूर्या[वेति](वा) ते **त्रिगुणिता**स्त्रिगुणीकृताः सन्त '**आइल्लचंद-सहिय**'त्ति उद्दिष्टचन्द्रयुक्तात् द्वीपात् समुद्राद्वा प्राक् जम्बूद्वीपमादिं कृत्वा ये प्राक्तनाश्चन्द्रा(स्ते आदिमचन्द्रा)स्तैरादिमैश्चन्द्रैरुपलक्षणमेतत् आदिमसूर्यैश्च सहिता यावन्तो भवन्ति एतावत्प्रमाणा **अनन्तरे अनन्तरे** कालोदादौ भवन्ति। तत्र धातकीखण्डे द्वीपे उद्दिष्टाश्चन्द्रा द्वादश ते त्रिगुणाः क्रियन्ते जाताः षट्त्रिंशत्, आदिमाश्चन्द्राः षट्, तद्यथा द्वौ चन्द्रौ जम्बूद्वीपे चत्वारो लवणसमुद्रे, (एतैरादिमैश्चन्द्रैः सहिता द्वाचत्वारिंशद् भवन्ति। एतावन्तः कालोदे समुद्रे चन्द्राः। एष एव करणविधिः सूर्याणामपि। तेन सूर्या अपि तत्रैतावन्तो वेदितव्याः, तथा कालोदसमुद्रे द्विचत्वारिंशच्चन्द्रमसः उद्दिष्टास्ते त्रिगुणाः क्रियन्ते, जातं षड्विंशं शतं, आदिमचन्द्रा अष्टादश, तद्यथा - द्वौ जम्बूद्वीपे चत्वारो लवणसमुद्रे द्वादश) धातकीखण्डे, [२]एतैरादिमैश्चन्द्रैः सहितं षड्विंशं शतं जातं चतुश्चत्वारिंशं शतम्। (ए)तावन्तः पुष्करवरद्वीपे चन्द्राः एतावन्त एव सूर्याः। एवं सर्वेष्वपि द्वीपसमद्रेषु

---

१. लवणे समुद्रे - G.A। २. एतैरादिमचन्द्रैः - T।

(ए)तत्करणवशाच्चन्द्रसङ्ख्या प्रतिपत्तव्या॥३३॥ सम्प्रति प्रतिद्वीपं प्रतिसमुद्रं च ग्रहनक्षत्रतारापरिमाणपरिज्ञानोपायमाह '**रिक्खग्गहतारग्ग**'मित्यादि। अत्र '**अग्र**'शब्दः परिमाणवाची **यत्र** द्वीपे समुद्रे वा नक्षत्रपरिमाणं ग्रहपरिमाणं तारापरिमाणं वा **ज्ञातुमिच्छति तस्य** द्वीपस्य समुद्रस्य वा सम्बन्धिभिः **शशिभि**रेकस्य राशिनः परिवारभूतं नक्षत्रपरिमाणं ग्रहपरिमाणं तारापरिमाणं च **गुणितं** सत् यावद्भवति तावत्प्रमाणं तत्र द्वीपे समुद्रे वा नक्षत्रपरिमाणं ग्रहपरिमाणं तारापरिमाणमिति, यथा लवणसमुद्रे किल नक्षत्रादिपरिमाणं ज्ञातुमिष्टं लवणसमुद्रे च शशिनश्चत्वारस्तत एकस्य शशिनः परिवारभूतानि यान्यष्टाविंशतिनक्षत्राणि तानि चतुर्भिर्गुण्यन्ते, जातं द्वादशोत्तरं शतं, एतावन्ति लवणसमुद्रे नक्षत्राणि। (तथा) अष्टाशीतिग्रहा एकस्य शशिनः परिवारभूतास्ते चतुर्भिर्गुण्यन्ते, जातानि त्रीणि शतानि द्विपञ्चाशदधिकानि ३५२, एतावन्तो लवणसमुद्रे ग्रहास्तथा एकस्य शशिनः परिवारभूतानि तारागणकोटिकोटीनां षट्षष्टिः सहस्राणि नवशतानि पञ्चसप्तत्यधिकानि, तानि चतुर्भिर्गुण्यन्ते, जातानि कोटिकोटीनां द्वे लक्षे सप्तषष्टिसहस्राणि नव शतानि २,६७,९०,००,००,००,००, ००,००,००० एतावत्यो लवणसमुद्रे तारागणकोटिकोटयः। एवंरूपा च नक्षत्रादीनां सङ्ख्या प्रागेवोक्ता, एवं सर्वेष्वपि द्वीपसमुद्रेषु नक्षत्रादिसङ्ख्यापरिमाणं परिभावनीयम्॥३४॥ '**बहिया**' इत्यादि। **मानुषनगस्य**-मानुषोत्तरपर्वतस्य **बहिः चन्द्र-सूर्याणां तेजांसि अवस्थितानि** भवन्ति, (किमुक्तं भवति ?) सूर्याः सदैवानुष्ण-तेजसो न तु जातुचिदपि मनुष्यलोके ग्रीष्मकाल इवात्युष्णतेजसः, चन्द्रमसोऽपि सर्वदैवानतिशीतलेश्याका न तु कदाचना(प्य)न्तर्मनुष्यक्षेत्रस्य शिशिरकाल इवाति-शीततेजसो। तथा मनुष्यक्षेत्राद्बहिः (सर्वेऽपि **चन्द्राः**) सर्वदैवा**भिजिता** नक्षत्रेण **युक्ताः सूर्याः पुनर्भवन्ति पुष्येण** युक्ता इति॥३५॥ '**चंदाओ**' इत्यादि। मनुष्यक्षेत्राद्बहिश्**चन्द्रात् सूर्यस्य सूर्याच्चन्द्रस्यान्तरं भवत्यन्यूनानि** परिपूर्णानि **योजनानां पञ्चाशत्सहस्राणि**। तदेवं सूर्यस्य चन्द्रस्य च परस्परमन्तरमुक्तम्॥३६॥

सम्प्रति चन्द्रस्य चन्द्रस्य सूर्यस्य सूर्यस्य (च) परस्परमन्तरमाह **'सूरस्स य २'** [१]इत्यादि। **मानुषनगस्य** - मानुषोत्तरपर्वतस्य **बहिः सूर्यस्य सूर्यस्य** परस्परं **चन्द्रस्य चन्द्रस्य च** परस्परमन्तरं **भवति योजनानां शतसहस्रं**-लक्षम्, तथाहि - चन्द्रान्तरिताः सूर्याः सूर्यान्तरिताश्चन्द्राः, बहिःस्थितचन्द्रसूर्याणां च परस्परमन्तरं पञ्चाशत् योजनसहस्राणि ५०,०००। ततश्चन्द्र[श्](स्य) चन्द्रस्य सूर्यस्य सूर्यस्य परस्परमन्तरं योजनानां लक्षं भवतीति॥३७॥ सम्प्रति बहिश्चन्द्रसूर्याणां पङ्क्ताव-वस्थानमाह **'सूरंतरिया'** इत्यादि। नृलोकाद्बहिः पङ्क्त्या स्थिताः **सूर्यान्तरिता-श्चन्द्राश्चन्द्रान्तरिता दिनकरा दीप्ता**-दीप्यन्ते स्म दीप्ता भास्वरा इत्यर्थः। कथम्भूतास्ते चन्द्रसूर्या इत्याह - **चित्रान्तरलेश्याका** चित्रमन्तरं लेश्या [वा](च) प्रकाशरूपा येषां ते तथा। तत्र चित्रमन्तरं चन्द्राणां सूर्यान्तरितत्वात् (सूर्याणां च चन्द्रान्तरितत्वात्,) चित्रलेश्या चन्द्रमसां शीतरश्मित्वात् [नो कप्पोववन्नगा] सूर्याणामुष्णरश्मित्वात्। (लेश्या)विशेषप्रदर्शनार्थमाह - **'सुहलेसा मंदलेसा य' सुखलेश्याश्चन्द्रमसो** न शीतकाले मनुष्यलोके इवात्यन्तशीतरश्मय इत्यर्थः, **मन्दलेश्याः** सूर्या न मनुष्यलोके निदाघसमय इवैकान्तउष्णरश्मय इत्यर्थः, आह च **तत्त्वार्थटीकाकारो हरिभद्रसूरिः - 'नात्यन्तशीताश्चन्द्रमसो नाप्यत्यन्तोष्णाः सूर्यस्य किन्तु साधारणा द्वयोरपी'**ति (४/१६)॥३८॥ इहेदमुक्तं - यत्र द्वीपे समुद्रे वा नक्षत्रपरिमाणं ज्ञातुमिष्यते तत्र एकशशिपरिवारभूतनक्षत्रादिपरिमाणं तावद्भिः शशिभिर्गुणयितव्यमिति, तत एक शशिपरिवारभूतानां ग्रहादीनां सङ्ख्यामाह **'अट्ठासीयं च गहा'** इत्यादिगाथाद्वयं निगदसिद्धम्॥३९॥॥४०॥ इहान्यान्यपि सूत्राणि प्रविरलपुस्तकेषु दृश्यन्ते न सर्वेषु पुस्तकेषु ततस्तान्यपि विनेयजनानुग्रहाय दर्श्यन्ते - **'अंतो मणुस्सखेत्ते चंदिमसूरियगहगणनक्खत्ततारारूवा ते णं देवा किं उड्ढोववन्नगा कप्पोववन्नगा विमाणोववन्नगा चारोववण्णगा चारठिइया**

---

१. इत्यादि मानुषोत्तरपर्वतस्य - K।

गइर(इ)या गइसमावन्नगा ? ता ते णं देवा नो उड्ढोववन्नगा (नो कप्पोववण्णगा) विमाणोववन्नगा चारोववन्नगा नो चारठि(इ)या गइर(इ)या गइसमावन्नगा उद्धीमुहकलंबुयापुप्फसंठाणसंठिएहिं जोयण[स](सा)हस्सिएहिं तावखेत्तेहिं साहस्सियाहिं बाहिरियाहिं वेउव्वियाहिं परिसाहिं महताहयनट्टगीयवाइयतंतीतलतालतुडियघणमुयंगपडुप्पवाइतरवेणं महता उक्किट्ठिसीहनायबोलकलय(ल)रवेणं अच्छं पव्वयरायं पयाहिणावत्तमंडलचारं मेरुमणुपरिंति। ता तेसिं (णं) देवाणं जाहे इंदे चयइ से कह[नि](मि)याणिं पकरेंति ? (ता) चत्तारि पंच सामाणिया देवा तं ठाणं उवसंपिज्जित्ताणं विहरंति जावन्ने तत्थ इंदे उववन्ने भवति। ता इंदठाणे (णं) केवइयं कालं विर[हेति]हियं उववाएणं पन्नत्ते ? ता जहन्नेणं एक्कं समयं उक्कोसेणं छम्मासे। ता बहिया णं माणुसखेत्तस्स जं चंदिमसूरियगहणक्खत्ततारारूवा ते णं देवा किं उड्ढोववण्णगा (कप्पोववण्णगा) विमाणोववण्णगा (चारोववन्नगा) चारठिइया गइरइया गइसमावण्णगा ? (ता) ते णं देवा नो उड्ढोववन्नगा नो कप्पोववन्नगा विमाणोववन्नगा नो चारोववन्नगा चारठि(इ)या (नो गइरइया) नो गइसमावन्नगा, [एक्को](पक्के)ट्टगसंठाणसंठिएहिं जोयणसयसाहस्सिएहिं तावखेत्तेहिं साहस्सियाहिं बाहिरियाहिं (वेउव्वियाहिं) परिसाहिं महयाहयनट्टगीयवाइयतंतीतलतालतुडियघणमुइंगप्पडुप्पवाइयरवेणं दिव्वाइं भोगभोगाइं भुंजमाणा विहरंति सुहलेसा मंदलेसा मंदायवलेसा चित्तंतरलेसा अन्नोन्नसमोगाढाहिं लेसाहिं कूडा इव ठाणठिया ते पएसा सव्वओ समंता ओभासंति उज्जोवंति तवयंति पभासेंति। ता तेसिं देवाणं जाहे [ठा]इंदे चयंति से कहमियाणिं पकरेंति ? ता चत्तारि पंच सामाणिया देवा तं ठाणं तहेव जाव छम्मासे' इति। एतेषां सूत्राणां क्रमेण व्याख्या -

अन्तर्मनुष्यक्षेत्रस्य ये चन्द्रसूर्यग्रहनक्षत्रतारारूपा देवास्ते किं ऊर्द्ध्वोपपन्ना

सौधर्म्मादिभ्यो द्वादशभ्यः कल्पेभ्य ऊर्द्ध्वमुपपन्नाः, कल्पेषु सौधर्म्मादिषूपपन्नाः **कल्पोपपन्नाः**, विमानेषु सामान्यरूपेषु उपपन्ना **विमानोपपन्नाः**, चारो मण्डलगत्या परिभ्रमणं तमुपपन्ना -आश्रिताश्च**ारोपपन्नाः** चारस्य-यथोक्तरूपस्य स्थितिरभावो येषां ते (**चारस्थितिका** अपगत)चारा इत्यर्थः। ग[ते](तौ) रतिरासक्तिः प्रीतीर्येषां ते **गतिरतिकाः**, एतेन गतौ रतिमात्रमुक्तं, सम्प्रति साक्षाद्गतिं प्रश्नयति - **गतिसमापन्ना** गतियुक्ताः ? एवं प्रश्ने कृते भगवानाह - '**ता ते णं देवा**' इत्यादि। '**ता**' इति पूर्ववत् (**ते**) चन्द्रादयो **देवा नो ऊर्द्ध्वोपपन्ना** नापि **कल्पोपन्नगा** किन्तु **विमानोपपन्नका**श्चारसहिता **नो चारस्थितिका**स्तथास्वभावतोऽपि **गति-रतिकाः** साक्षाद्गतियुक्ताश्च **ऊद्ध्र्वमुखीकृतकलम्बुकापुष्पसंस्थानसंस्थितैर्यो-जनसाहस्रिकै**रनेकयोजनसहस्रप्रमाणै**स्तापक्षेत्रैः** **साहस्रिकाभि**रनेकसहस्रसङ्ख्या-भि**र्बाह्याभिः पर्षद्भिर**[न्य]त्र व्यक्त्यपेक्षया बहुवचनम्, **वैकुर्विकाभि**र्विकुर्व्वित-नानारूपधारिणीभि**र्महता** रवेण इति योग अहतानि अक्षतानि अनघानीत्यर्थः यानि नाट्यानि गीतानि वादित्राणि च याश्च तन्त्र्यो - वीणा ये च तलताला हस्तताला यानि च त्रुटितानि शेषाणि तूर्याणि ये च घना घनाकारा ध्वनिसाधर्म्म्यात् पटुप्रवादिता निपुणपुरुषप्रवादिता मृदङ्गास्तेषां रवेण, तथा स्वभावतो गतिरतिकैर्बाह्यपर्ष-दन्तर्गतैर्देवैर्वेगेन गच्छत्सु विमानेषु उत्कृ[ष्टा](ष्टितः - उत्कर्ष)वशेन ये (मुच्यन्ते) सिंहनादा [द]यश्च क्रियते बोलो, बोलो नाम मुखे हस्तं दत्त्वा महता शब्देन पूत्करणं, यश्च कलकलो व्याकुलः शब्दसमूहस्तद्रवेण मेरुमिति योगः, किंविशिष्टमित्याह - **अच्छम**तीव [ग](स्व)च्छम[पि](ति)निर्मलजा(म्बु)नदरत्नबहुलत्वात् **पर्वतराजं** - पर्वतेन्द्रं **प्रदक्षिणावर्त्तमण्डलचारं** यथा भवति तथा **मेरुमनु**लक्षीकृत्य **परिरयन्ति** पर्यटन्ति। पुनः प्रश्नयति '**ता तेसि ण**'मित्यादि। '**ता**' इति पूर्ववत्, **तेषां** ज्योतिष्काणां **देवानां यदा इन्द्रश्च्यवते** तदा **ते** देवा **इदानी**मिन्द्रविरहकाले **कथं प्रकुर्वन्ति** ? भगवानाह - '**ता**'इत्यादि। '**ता**' इति पूर्ववत्, **चत्वारः पञ्च** वा

**सामानिका देवा** समुदितीभूय **तत्स्थान**मिन्द्रस्थान**मुपसम्पद्य विहरन्ति** - तदिन्द्रस्थानं परिपालयन्ति, सञ्जातौ शुल्कस्थानादिकं पञ्चकुलवत्। कियन्तं कालं यावत् तदिन्द्रस्थानं परिपालयन्तीति [१]चेद् ? आह - **यावदन्यस्तत्रेन्द्र उपपन्नो भवति**। '**ता इंदठाणे ण**'मित्यादि। '**ता**' इति पूर्ववत्, **इन्द्रस्थानं कियत्कालमुप[पन्नम](पातेन) विरहितं प्रज्ञप्तम्** ? भगवानाह - '**ता**'इत्यादि। **जघन्येनैकं** [२]**समयं** यावदुत्कर्षेण **षण्मासान्**। '**ता बहिया ण**'मित्यादि प्रश्नसूत्रमिदं प्राग्वत् व्याख्येयम्। भगवानाह - '**ता ते ण**'मित्यादि। '**ता**'इति पूर्ववत्, **ते** मनुष्यक्षेत्राद्बहिर्वर्त्तिनश्चन्द्रादयो **देवा नोद्ध्वोपपन्ना** नापि **कल्पोपपन्नाः** किन्तु **विमानोपपन्ना**स्तथा **नो चारोपपन्नाः** - चारयुक्ताः किन्तु **चारस्थितिकाः**, अत एव **नो गतिरतयो** नापि **गतिसमापन्नकाः**, **पक्केष्टकासंस्थानसंस्थितैर्योजनशतसाहस्रिकै**रातपक्षेत्रैर्यथा पक्का इष्टका आयामतो दीर्घा भवन्ति विस्तरतस्तु स्तोकाः चतुरस्राश्च तथा तेषामपि मनुष्यक्षेत्राद्बहिर्व्यवस्थितानां चन्द्रसूर्याणामातपक्षेत्राण्यायामतोऽनेकयोजनशतसहस्रप्रमाणानि विस्तरत एकयोजनशतसहस्राणि (चतुरस्राणि) चेति तैरित्थम्भूतैरातपक्षेत्रैः **साहस्रिकाभि**रनेकसहस्रसङ्ख्याभि**र्बाह्याभिर्पर्षद्भि**रत्रापि बहुवचनं व्यक्त्यपेक्षया, '**महयाहये**'त्यादि पूर्व्ववत्, **दिव्यान्** दिवि भवान् **भोगभोगान्** भोगार्हान् शब्दादीन् भोगान् **भुञ्जाना विहरन्ति**, कथम्भूताः ? इत्याह - **शुभलेश्याः**, एतच्च विशेषणं [३]चन्द्रमसः प्रति, तेन नातिशीततेजसः किन्तु सुखोत्पादहेतुपरमलेश्याका इत्यर्थः, **मन्दलेश्याः**, एतच्च विशेषणं सूर्यान्प्रति, तथा च एतदेव व्याचष्टे **मन्दातपलेश्याः** मन्दा-नात्युष्णस्वभावा आतपरूपा लेश्यारश्मिसङ्घातो येषां ते तथा, पुनः कथम्भूताश्चन्द्रादित्याः ? इत्याह **चित्रान्तरलेश्याः** - चित्रमन्तरं लेश्या च येषां (ते) तथा, भावार्थश्चास्य पदस्य प्रागेवोपदर्शितः, ते इत्थम्भूताश्चन्द्रादित्याः परस्परमवगाढा[नि](भिः) **लेश्या[नि](भिः)**, तथाहि -

---

१. चेदत आह - C, F, G, T। २. समयमुत्कर्षेण - T। ३. चन्द्रमसं प्रति - C, T।

चन्द्रमसां सूर्याणां च प्रत्येकं लेश्या योजनशतसहस्रप्रमाणविस्तराः, चन्द्रसूर्याणां च (सूची)पङ्क्त्या व्यवस्थितानां परस्परमन्तरं पञ्चाशत् योजनसहस्राणि, ततश्चन्द्र-प्रभासम्मिश्राः सूर्यप्रभाः सूर्यप्रभासम्मिश्राः चन्द्रप्रभा इति इत्थं परस्परमवगाढा-भिर्लेश्याभिः **कूटानीव** पर्वतोपरिव्यवस्थितशिखराणीव **स्थानस्थिताः** सदैवै-कत्रस्थाने स्थितास्तान्[1] **प्रदेशान्** स्वस्वप्रत्यासन्नान् **अवभासयन्ति उद्योतयन्ति तापयन्ति प्रभासयन्ति**। '**ता तेसिं णं देवाणं जाहे इंदे चयइ**' इत्यादि प्राग्वद्व्याख्येयम्। '**ता पुक्खरवरं ण**'(मित्यादि। '**ता**' इति पूर्ववत्, **पुष्करवरं** '**ण**')मिति वाक्यालङ्कारे (**द्वीपं**) **पुष्करोदो नाम समुद्रो वृत्तो वलया-कारसंस्थानसंस्थितः** [प](स)र्व[त](तः) समन्तात्सम्परिक्षिप्य **तिष्ठति**, पुष्करोदे च समुद्रे जल[मि](म)तिस्वच्छं पथ्यं जात्यं तनुपरिणामं स्फटिकवर्णाभं प्रकृत्या उदकरसं द्वौ च तत्र देवावाधिपत्यं परिपालयतः त(द्य)था श्रीधरः श्रीप्रभश्च, तत्र श्रीधरः पूर्वार्द्धाधिपतिः श्रीप्रभोऽपरार्द्धाधिपतिर्विष्कम्भादिविषयेऽतिदेशमाह - '**एवं वि[क्खे-वो]क्खंभो परिक्खेवो जोइसं च भाणियव्वं जहा जीवाभिगमे जाव स्वय-म्भूरमणे**' इति। **एवं** पूर्वोक्तेन प्रकारेण यथा **जीवाभिगमे** तथा पुष्करोदसमुद्रस्य **विष्कम्भपरिक्षेपौ ज्योतिष्कं च भणितव्यम्**। एवं शेषेष्वपि द्वीपसमुद्रेषु तावद्वक्तव्यं **यावत् स्वयम्भूरमणसमुद्रः**। इदं चातिसङ्क्षिप्त[प्रयु](मु)क्तमिति किञ्चि-द्विशेषतो भाव्यते। तत्र प्रथमतः सूत्रपाठ उपदर्श्यते -'[2]**पुक्खरोदे णं समुद्दे किं समचक्कवालसंठिए विसमचक्कवालसंठिए ? गोयमा ! समचक्कवालसंठिए नो विसमचक्कवालसंठिए। ता पुक्खरोदे णं समुद्दे केवइयं चक्कवाल-विक्खंभेणं केवइयं परिक्खेवेणं आहियत्ति वएज्जा ? ता संखेज्जाइं जोयण-सयसहस्साइं चक्कवालविक्खंभेणं संखेज्जाइं जोयणसयसहस्साइं परिक्खेवेणं आहियत्ति वएज्जा। ता पुक्खरवरोदे णं समुद्दे केवइया चंदा पभासेंसु वा**

१. ते पएसा सव्वओ समंता - मूले। २. मुद्रितजीवाजीवाभिगमसूत्रे त्वयं सूत्रपाठोऽन्यथा दृश्यते।

३ आपुच्छा तहेव। ता पुक्खरोदे णं समुद्दे संखेज्जा चंदा पभासेंसु वा ३ संखेज्जा सूरिया तवइंसु वा जाव संखेज्जाओ तारागणकोडिकोडीओ सोभेंसु वा ३। एएणं अभिलावेणं [1]वरुणवरे दीवे वरुणवरे समुद्दे ४ खीरवरे दीवे खीरवरे समुद्दे ५ [2]घयवरदीवे [3]घयवरे समुद्दे ६ खोयवरे दीवे खोयवरे समुद्दे ७ [4]नंदीसरे दीवे नंदीसरे समुद्दे ८ [5]अरुणे दीवे अरुणोदे समुद्दे ९ अरुणवरे दीवे [6]अरुणवरे समुद्दे १० अरुणवरोभासे दीवे अरुणवरोभासे समुद्दे ११ कुंडले दीवे कुंडलोदे समुद्दे १२ कुंडलवरे दीवे कुंडलवरोदे समुद्दे १३ कुंडलवरोभासे दीवे कुंडलवरोभासे समुद्दे १४ सव्वेसिं विक्खंभो परिक्खेवो जोइसाइं च पुक्खरोदसायरसरिसाइं। ता कुंडलवरोभासं णं समुद्दं रुयगे नाम दीवे वट्टे वलयाकारसंठाणसंठिए सव्वओ समंता संपरिक्खित्ताणं चिट्ठइ। ता रुयगे णं दीवे [7]किं समचक्कवालसंठिए विसमचक्कवालसंठिए जाव नो विसमचक्कवालसंठिए। ता रुयगे णं दीवे केवइयं चक्कवाल-विक्खंभेणं केवइयं परिक्खेवेणं आहियत्ति वएज्जा ? ता (अ)संखेज्जाइं जोयण(सय)सहस्साइं चक्कवालविक्खंभेणं (अ)संखेज्जाइं जोयणसय-सहस्साइं परिक्खेवेणं आहियत्ति वएज्जा। ता रुयगे णं दीवे केवइया चंदा पभासेंसु वा ३ पुच्छा ? (ग्रन्थाग्रं ९,०००) ता रुयगे णं दीवे (अ)संखेज्जा चंदा पभासेंसु वा ३ जाव (अ)संखेज्जाओ तारागणकोडीकोडीओ सोभेंसु वा ३। एवं रुयगे समुद्दे रुयगवरे दीवे रुयगवरोदे समुद्दे रुयगवरोभासे दीवे रुयगवरोभासोदे समुद्दे। एवं तिपडोया[रो](रा) नायव्[वो](वा) जाव सूरे दीवे सूरोदे समुद्दे सूरवरे दीवे सूरवरोदे समुद्दे सूरवरोभासे दीवे सूरवरोभासोदे

---

१. वरुणवरदीवे वरुणवरसमुद्दे - T। २. घयवरे दीवे - D, T। ३. घयोदे - D, T। ४. नंदीसरदीवे - T। ५. अरुणदीवे - T। ६. अरुणवरोदे - J, K। ७. किं समचक्कवालसंठिए जाव नो विसमचक्कवालसंठिए - K।

**समुद्दे। सव्वेसिं विक्खंभपरिक्खेवजोइसा[इं] (य) रुयग[वर]दीवसरिसाइं। ता सूरवरोभासोदं णं समुद्दं [दी](दे)वे णामं दीवे वट्टे वलयाकारसंठाणसंठिए सव्वओ समंता संपरिक्खेत्ताणं चिट्ठइ जाव नो विसमचक्कवालसंठिए। ता देवे णं दीवे केवइयं (चक्कवालविक्खंभेणं केवतियं) परिक्खेवेणं आहियत्ति वएज्जा? ता असंखेज्जाइं जोयणसयसहस्साइं चक्कवालविक्खंभेणं असंखेज्जाइं जोयणसयसहस्साइं परिक्खेवेणं आहियत्ति वएज्जा। ता देवे णं दीवे कइ चंदा पभासेंसु वा पुच्छा ३ तहेव। ता देवे णं दीवे असंखिज्जा चंदा पभासिंसु वा ३ जाव असंखेज्जाओ तारागणकोडिकोडीओ सोभेंसु वा ३। एवं देवोदे समुद्दे नागे दीवे नागोदे समुद्दे जक्खे दीवे जक्खोदे समुद्दे भूते दीवे भूतोदे समुद्दे सयंभूरमणे दीवे सयंभूरमणे समुद्दे सव्वे देवदीवसरिसा इति।' (जीवाजीवाभिगमसूत्रे सूत्र १८०-१८५)** अस्य व्याख्या - तत्र पुष्करोदसमुद्रगतं सकलमपि सुगमम्। '**एए[सि] ण**'मित्यादि। **एतेनानन्तरोदितेनाभिलापेन वरुणवरो द्वीपो** वक्तव्यस्तदनन्तरं [1]**वरुणोदः समुद्रः**, ततः **क्षीरवरो द्वीपः क्षीरोदः समुद्र** इत्यादि। सूत्रपाठश्चैवं- '**ता पुक्खरोदं णं समुद्दं वरुणवरे दीवे वट्टे वलयाकारसंठाणसंठिए सव्वओ समंता संपरिखित्ताणं चिट्ठई**'त्यादि। वरुणद्वीपे च वरुणवरुणप्रभौ द्वौ देवौ स्वामिनौ, नवरमाद्यः पूर्वा(र्द्धा)धिपतिरपरोऽपरार्द्धाधिपतिरेवं सर्वत्र भावनीयम्। [2]वरुणोदे समुद्रे परमसुजातमृद्विकारसनिष्पन्नरसा[दी]-(द)पीष्टतरास्वादं तोयं वारुणिवारुणिप्रभौ च द्वौ तत्र देवौ। क्षीरवरे द्वीपे पण्डरसुप्रदन्तौ देवौ। [3]क्षीरोदे समुद्रे जात्यपुण्ड्रेक्षुचारिणीनां गवां क्षीरं तदन[य](या)भ्यो गोभ्यो दीयते, तासामपि क्षीरमन्याभ्यस्तासामप्यन्याभ्य एवं चतुर्थस्थानपर्यवसितस्य क्षीरस्य प्रयत्नतो मन्दाग्निना क्वथितस्य जात्येन खण्डेन मत्स्यण्डिकया वा सम्मिश्रस्य यादृशो रसस्ततोऽपीष्टतरास्वादं तोयं विमलविमलप्रभौ च देवौ तत्र स्वामिनौ। घृतवरे

---

१. वरुणवरे समुद्दे - मूले। २. वरणोदे च समुद्रे - A। ३. खीरवरे समुद्दे - मूले।

द्वीपे कनककनकप्रभौ देवौ। [१]घृतोदे समुद्रे सद्यो विस्यन्दितगोघृतास्वादं तत्काल-विकसितकर्ण्णिकारपुष्पवर्णाभं तोयं कान्तसुकान्तौ च तत्र देवौ। इक्षुवरे द्वीपे सुप्रभमहाप्रभौ देवौ। इक्षुवरे समुद्रे जात्यवरपुण्ड्ररूपाणामिक्षूणामपनीतमूलोपरि-त्रिभागानां [२]मध्यगृहीतत्रिभागानां विशिष्टगन्धपरिवासितानां यो रसः श्लक्ष्णवस्त्रपरि-पूतस्तस्मादपीष्टतरास्वादं तोयं पूर्ण्णपूर्ण्णप्रभौ च तत्र द्वौ देवौ। नन्दीश्वरे द्वीपे कैलाशहरिवाहनौ देवौ। नन्दीश्वरे समुद्रे इक्षुरसास्वादं तोयं सुमनःसौमनसौ देवौ। एतेऽष्टावपि द्वीपा अष्टावपि च समुद्रा एक[स्य च]प्रत्यवतारा एकैकरूपा इत्यर्थः। अत ऊद्ध्वं तु द्वीपाः समुद्राश्च त्रिप्रत्यवताराः, तद्यथा - अरुणोऽरुणवरोऽरुणवराव-भासः कुण्डलः कुण्डलवरो कुण्डलवरावभास इ[त्यर्थः](त्यादि)। तत्रारुणे द्वीपे अशोकवीतशोकौ देवौ अरुणोदे समुद्रे [३]सुभद्रसुमनोभद्रौ, अरुणवरे द्वीपे अरुण(वर)भद्र(अरुणवर)महाभद्रौ, अरुणवरे समुद्रे अरुण[भद्र](वर)अरुणमहा[भद्रो]-(वरौ) अरुणवरावभासे द्वीपे अरुणवरावभासभद्रअरुणवरावभासमहाभद्रौ, अरुण-वरावभासे समुद्रेऽरुणवरावभासवरअरुणवरावभासमहावरौ, कुण्डलद्वीपे कुण्डल-कुण्डलभद्रौ देवौ, कुण्डलसमुद्रे चक्षुःशुभ(चक्षुः)कान्तौ, कुण्डलवरे द्वीपे कुण्डल-वरभद्रकुण्डलवरमहाभद्रौ, कुण्डलवरे समुद्रे कुण्डलवरकुण्डलमहा[भद्रौ](वरौ), कुण्डलवरावभासे द्वीपे कुण्डलवरावभासभद्रकुण्डलवरावभासमहाभद्रौ, कुण्डलवराव-भासे समुद्रे कुण्डलवरावभासवरकुण्डलवरावभासमहावरौ। एते सूत्रोपात्तद्वीपसमुद्रा। अत ऊद्ध्वं तु सुत्रानुपात्ता दर्श्यन्ते - कुण्डलवरावभाससमुद्रानन्तरं रुचको द्वीपो रुचक समुद्रः, ततो रुचकवरो द्वीपो रुचकवरः समुद्रस्तदनन्तरं रुचकवरावभासो द्वीपो रुचकवरावभासः समुद्रः। तत्र रुचके द्वीपे सर्वार्थमनोरमौ देवौ रुचकसमुद्रे सुमनःसौमनसौ देवौ, रुचकवरे द्वीपे (रुचकवरभद्र-)रुचकवरमहाभद्रौ, रुचकवरे समुद्रे रुचकवररुचकमहावरौ, रुचकवरावभासे द्वीपे रुचकवरावभासभद्ररुचकवराव-

---

१. घयवरे समुद्दे - मूले। २. मध्ये गृहीत... - B। ३. सुभद्रमनोभद्रौ - S।

भासमहाभद्रौ, रुचकवरावभासे समुद्रे रुचकवरावभासवररुचकवरावभासमहावरौ। कियन्[ती](तो) [1]नामग्राहं द्वीपसमुद्रा वक्तुं शक्यन्ते ? ततो यानि कानिचिदाभरणनामानि हारार्द्धहारकनकावलिरत्नावलिप्रभृतीनि, यानि च वस्त्रनामानि, यानि च गन्धनामानि कोष्ठपुटादीनि, यानि चोत्पलनामानि जलरुहचन्द्रोद्योतप्रमुखानि, यानि च तिलकप्रभृतीनि वृक्षनामानि, यानि च पद्मनामानि शतपत्रसहस्रपत्रप्रभृतीनि, यानि च पृथिवीनामानि - पृथिवीशर्करावालुकेत्यादीनि, यानि नवानां निधीनां चतुर्द्दशानां चक्रवर्त्तिरत्नानां क्षुल्लहिमवदादीनां वर्षधरपर्वतानां पद्मादीनां ह्रदानां गङ्गासिन्धुप्रभृतीनां नदीनां कच्छादीनां विजयानां माल्यवदादीनां वक्षस्कारपर्वतानां सौधर्म्मादीनां कल्पानां शक्रादीनामिन्द्राणां देवकुरूत्तरकुरुमन्दराणामावासानां शक्रादिसम्बन्धिनां मेरुप्रत्यासन्ना[दी]नां कूटादीनां क्षुल्लहिमवदा[दीनां](दि)सम्बन्धिनां नक्षत्राणां कृत्तिकादीनां चन्द्राणां सूर्याणां च नामानि तानि सर्वाण्यपि द्वीपसमुद्राणां त्रिप्रत्यवताराणि वक्तव्यानि, तद्यथा - हारो द्वीपो हारः समुद्रो हारवरो द्वीपो हारवरः समुद्रः हारवरावभासो द्वीपो हारवरावभासः समुद्र इत्यादि। (ए)तेषु च द्वीपसमुद्रेषु सङ्ख्येययोजन(शतसहस्र)प्रमाणो विष्कम्भः सङ्ख्येययोजनशतसहस्रप्रमाणः परिक्षेपः सङ्ख्येयाश्च चन्द्रादयस्तावद्वक्तव्या यावदन्त्यः कुण्डलवरावभासः समुद्रः। तथा चाह '**सव्वेसि**'मित्यादि। **सर्वेषामुक्तस्वरूपाणां** द्वीपसमुद्राणां अन्त्यकुण्डलवरावभाससमुद्रपर्यन्तानां **विष्कम्भपरिक्षे[पेण](प)ज्योतिष्काणि पुष्करोदसागरसदृशानि** वक्तव्यानि सङ्ख्येययोजनप्रमाणो विष्कम्भः सङ्ख्येययोजनप्रमाणः परिक्षेपः सङ्ख्येयाश्च चन्द्राद[यस्तावद](यो) वक्तव्या इत्यर्थः। ततस्तदनन्तरं योऽन्यो रुचकनामा द्वीपस्तत्प्रभृतिषु रुचकसमुद्ररुचकवरद्वीपरुचकवरसमुद्ररुचकवरावभासद्वीपरुचकवरावभाससमुद्रादिषु (अ)सङ्ख्येययोजनप्रमाणो विष्कम्भोऽसङ्ख्येययोजनप्रमाणः परिक्षेपोऽसङ्ख्येयाश्च चन्द्रादयो वक्तव्यास्तथा चाह '**ता कुंडलवराव-**

---

१. नाम नामग्राहं - B, G, T।

**भासन्न**'मित्यादि सुगमम्। '**एवं तिपडोयारा**' इत्यादि। **एवमुक्तेन** प्रकारेण रुचकवरावभासात्समुद्रात्परतो द्वीपाः समुद्राश्च **त्रिप्रत्यवतारास्तावत् ज्ञातव्या यावत् सूर्यो द्वीपः सूर्यः**[1] **समुद्रः (सूर्यवरो द्वीपः सूर्यवरः समुद्रः) सूर्यवरावभासो द्वीपः सूर्यवरावभासः समुद्रः**, उक्तञ्च **जीवाभिगमचूर्णौ** - '**अरुणादिदीवसमुद्दा तिप्पडोवयारा यावत् सूर्यवरावभासः समुद्रः।**' इति। '**सव्वेसि**'मित्यादि। **सर्वेषां** रुचकसमुद्रादीनां सूर्यवरावभाससमुद्रपर्यन्तानां **विष्कम्भपरिक्षेपज्योतिष्काणि** रुचकद्वीप[समुद्र]वद् वक्तव्यानि असङ्ख्येययोजनप्रमाणो विष्कम्भोऽसङ्ख्येययोजनप्रमाणः परिक्षेपोऽसङ्ख्येयाः प्रत्येकं चन्द्रसूर्यग्रहनक्षत्रतारका वक्तव्या इति भावः। '**ता सूरवरावभासो[दे](दं) णं समुद्दं**' इत्यादि सुगमम्, नवरं एते पञ्च देवादयो द्वीपाः पञ्च देवादयः समुद्राः प्रत्येकमेकरूपाः, न पुनरेषां त्रिप्रत्यवतारः, उक्तञ्च **जीवाभिगमचूर्णौ** - '**अन्ते पञ्च द्वीपाः पञ्च समुद्रा एकप्रकाराः।**' इति। **जीवाभिगमसूत्रे**ऽप्युक्तं - '[2]**देवे नागे जक्खे भूये य सयंभूरमणे य। एक्केक्के चेव भाणियव्वे तिपडोयारं नत्थि॥१॥**' तत्र देवे द्वीपे द्वौ देवौ देवभद्रदेवमहाभद्रौ स्वामिनौ, देवसमुद्रे देववरदेव[वर]महावरौ, नागे द्वीपे नागभद्रनागमहाभद्रौ देवौ, नागे समुद्रे नागवर(नाग)महावरौ, यक्षे द्वीपे यक्षभद्रयक्षमहाभद्रौ, यक्षे समुद्रे यक्षवरयक्षमहावरौ, भूते द्वीपे भूतभद्रभूतमहाभद्रौ, भूते समुद्रे भूतवरभूतमहावरौ, स्वयम्भूरमणे द्वीपे स्वयम्भूभद्रस्वयम्भूमहाभद्रौ, स्वयम्भूरमणे समुद्रे स्वयम्भूवरस्वयम्भूमहावरौ। इह नन्दीश्वरादयः सर्व्वे समुद्राः (भूतसमुद्र)-पर्यवसाना इक्षुरसोदसमुद्रसदृशोदकाः प्रतिपत्तव्याः। स्वयम्भूरमणसमुद्रस्य उदकं पुष्करोदसमुद्रोदकसदृशम्। तथा जम्बूद्वीप इति नाम्ना असङ्ख्येयद्वीपा अवगन्तव्याः, लवण इति नाम्ना असङ्ख्येयाः समुद्राः। एवं तावद्वाच्यं यावत् सूर्यवरावभास इति नाम्ना असङ्ख्येयाः समुद्राः। ये तु पञ्च देवादयो द्वीपाः पञ्च देवादयः समुद्रास्ते

---

१. सूरोदे समुद्दे - मूले। २. मुद्रितजीवाजीवाभिगमसूत्रे त्विदं वृत्तं न दृश्यते।

एकैका एव प्रतिपत्तव्या न तेषां नामभिरन्ये द्वीपसमुद्राः, उक्तश्च **जीवाभिगमे** - '[१]**केवइया णं भंते ! जंबुद्दीवा दीवा पन्नत्ता ? गोयमा ! असंखेज्जा जंबुद्दीवा दीवा पन्नत्ता। एवं जाव सूरवरावभासा समुद्दा असंखेज्जा पन्नत्ता। केवइया णं भंते देवदीवा पन्नत्ता ? गोयमा ! एगे देवदीवे पन्नत्ते। दसवि एगागारा।**' (सूत्र १८६) इति।

इति श्रीमलयगिरिविरचितायां चन्द्रप्रज्ञप्तिटीकायां एकोनविंशतितमं प्राभृतं समाप्तम्।

* * * * *

*गुर्वायत्ता यस्माच्छास्त्रारम्भा भवन्ति सर्वेऽपि।*
*तस्माद्गुर्वाराधनपरेण हितकाङ्क्षिणा भाव्यम्।।*

*धन्यस्योपरि निपतत्यहितसमाचरणघर्मनिर्वापी।*
*गुरुवदनमलयनिःसृतो, वचनसरसचन्दनस्पर्शः।।*

*दुष्प्रतिकारौ माता-पितरौ स्वामी गुरुश्च लोकेऽस्मिन्।*
*तत्र गुरुरिहामुत्र च, सुदुष्करतरप्रतीकारः।।*

*सत्येन शुध्यते वाणी, मनो ज्ञानेन शुध्यति।*
*गुरुशुश्रूषया कायः, शुद्धिरेषा सनातनी।।*

*शमार्थं सर्वशास्त्राणि, विहितानि मनीषिभिः।*
*तस्मात् स सर्वशास्त्रज्ञो, यस्य शान्तं मनः सदा।।*

---

१. मुद्रितजीवाजीवाभिगमसूत्रे त्वयं पाठोऽन्यथा दृश्यते।

## विंशतितमं प्राभृतम्

तदेवमुक्तमेकोनविंशतितमं प्राभृतम्। सम्प्रति विंशतितममारभ्यते। तस्य चाय-मर्थाधिकारो यथा कीदृशश्चन्द्रादीनामनुभाव इति। तद्विषयं प्रश्नसूत्रमाह -

**मू० ता कहं ते अणुभा[गे](वे) आहितेति वदेज्जा ? तत्थ खलु इमातो दो पडिवत्तीतो पण्णत्तातो। तत्थेगे एवमाहंसु - ता चंदिमसूरिया णं णो जीवा अजीवा णो घणा झुसिरा (णो) [बाय]-(व)रबोंदिधरा कलेवरा णत्थि णं तेसिं उट्ठाणेति वा कंमेति वा बलेति वा वीरिए इ वा पुरिसक्कारपरक्कमेति वा णो ते विज्जुं लवंति णो असणिं लवंति णो थणितं लवंति, अहे णं बायरे वाउयाए संमुच्छति, अहे णं बायरवाउयाए संमुच्छित्ता विज्जुंपि लवति असणिं पि लवति थणितं पि लवति। (एगे०)। एगे पुण एवमाहंसु - ता चंदिमसूरिया णं जीवा णो अजीवा घणा णो झुसिरा [बाद](व)-रबोंदिधरा (नो) कलेवरा अत्थि णं तेसि णं उट्ठाणेति वा जाव पुरिसक्कारपरक्कमे ति वा। ते णं विज्जुंपि लवंति असणिंपि लवंति थणियंपि लवंति। एगे एवमाहंसु।**

**टी०** '**ता कहं ते**' इत्यादि। '**ता**' इति पूर्ववत्, **कथं** केन प्रकारेण (**त्वया**) चन्द्रादीनां **अनुभावः** स्वरूपविशेष **आख्यात इति वदेत्**? एवमुक्ते भगवानेतद्विषये (ये द्वे) प्रतिपत्ती ते उपदर्शयति - '**तत्थ खलु**' इत्यादि। **तत्र** चन्द्रादीनामनुभाव-विषये **खल्विमे द्वे प्रतिपत्ती** - परतीर्थिकाभ्युपगमरूपे[१] **प्रज्ञप्ते**, तद्यथा - '**तत्थेगे**'-त्यादि। **तत्र** तेषां द्वयानां परतीर्थिकानां मध्ये **एके** परतिर्थिका **एवमाहुः** '**ता**'इति तेषां परतीर्थिकानां प्रथमं स्वशिष्यं प्रत्यनेकवक्तव्यस्योपक्रमे[२] क्रमोपदर्शनार्थः, **चन्द्रसूर्या** '**ण**'मिति वाक्यालङ्कारे **नो जीवा**-जीवरूपाः किन्त्व**जीवा**स्त[द्य]था **नो**

१. .....स्वरूपे - T। २. .....स्योपक्रमोपदर्शनार्थः - C।

**घना** निबिडप्रदेशोपचयाः किन्तु **शुषिराः**, (तथा) **न वरबोन्धिधराः** न प्रधान-सुव्यक्तावयवशरीरोपेताः किन्तु **कलेवराः** कलेवरमात्राः, तथा **नास्ति** '**ण**'मिति वाक्यालङ्कारे **तेषां** चन्द्रादीना**मुत्थानमू**[र्द्धा]द्धूर्वीभवनमितिरुपदर्शने '**वा**'शब्दो विकल्पे समुच्चये वा **कम्म**-उत्क्षेपणादि **बलं**-शारीरः प्राणः **वीर्य**मान्तरोत्साहः '**पुरिसक्कारपरक्कमे**'इति पुरुषकारः(-पौरुषाभिमानः) पराक्रमः स एव साधिताभि-मतप्रयोजनः पुरुषकारश्च पराक्रम(श्च) पुरुषकार(पराक्रमं) इति-वा-शब्दौ सर्वत्रापि पूर्ववत्, तथा ते चन्द्रा[दी](दित्याः) '[1]**नो विज्जुयं लवंति**'त्ति, (नो विद्युतं प्रवर्त्तयन्ति **नाप्यश**निं) विद्युद्विशेषरू[पा]पम्, **नापि** [2][गर्जि]**(स्तनि)तं** - मेघध्वनिम्, किन्तु '**अहे ण**'मित्यादि, चन्द्रादित्यानामधो '**ण**'मिति[3] पूर्व्ववत् **बादरवायुकायिकः सम्मूर्च्छति अधश्च बादरो वायुकायः सम्मूर्च्छ्य** '**विज्जुं पि लवइ**'त्ति **विद्युतमपि प्रवर्त्तयति अशनिमपि प्रवर्त्तयति** [गर्जि](**स्तनि)तमपि प्रवर्त्तयति** विद्युदा(दि)रूपेण परिणमते इति भावः। अत्रोपसंहारमाह- '**एगे एवमाहंसु १**'। **एके पुनरेवमाहुः**, '**ता**' इति पूर्व्ववत्, **चन्द्रसूर्या** '**ण**'मिति वाक्यालङ्कारे **जीवा**-जीवरूपा (**न**) पुन**रजीवा** यथाहुः [स](पू)र्वे परतीर्थिकाः तथा **घना न शुषिरास्तथा**[च] (**वर**)**बोन्दिधरा न कलेवरमात्रास्तथा** '**अस्ति तेषां उट्ठाणे इति वा**' इत्यादि पूर्ववत् व्याख्येयम्। '**ते विज्जुंपि लवंति**'इति **विद्युतमपि प्रवर्त्तयन्ति अशनिमपि प्रवर्त्तयन्ति** [गर्जि](**स्तनि)तमपि**। किमुक्तं भवति ? विद्युदादिकं सर्वं चन्द्रादित्यप्रवर्त्तितमिति। अत्रोपसंहारमाह - '**एगे एवमाहंसु २**'।

परतीर्थिकप्रतिपत्तिद्वयमुपदर्श्य सम्प्रति भगवान् स्वमतं कथयति -

**मू० वयं पुण एवं वदामो-ता चंदिमसूरिया णं देवा महिड्ढिया जाव [महेसक्खा](महाणुभावा) वरवत्थधरा वरगंधधरा**

---

१. णो ते विज्जुं लवंति - मूले। २. यद्यप्यत्र अग्रे च 'गर्जितं' इति पाठो नाऽसमीचीनस्तथापि मूलानुसारेण 'स्तनितं' इति पाठः समीचीनः प्रतिभाति। ३. .......मिति वाक्यालङ्कारे बादरो वायु.... - A।

**वरमल्लधरा वराभरणधरा अव्वोच्छित्तिणयट्ठताए अण्णे चयंति अण्णे उववज्जंति आहिता ति वदेज्जा।**

**टी० 'वयं पुण'** [मि](इ)त्यादि। **वयं पुनरेवं वदामः** । कथं वदथ ? इत्याह - '**ता**'इति पूर्ववत्, **चन्द्रसूर्याः** '**ण**'मिति वाक्यालङ्कारे **देवा**-देवरूपा न सामान्यतो जीवमात्राः । कथम्भूतास्ते देवा ? इत्याह - **महर्द्धिका** महती ऋद्धिर्विमानपरिवारादिका येषां ते तथा, '**जाव महाणुभावा**' इति **यावत्करणात्** '**महज्जुइया महब्बला महायसा महेसक्खा**' इति द्रष्टव्यम्। तत्र महती द्युतिः शरीराभरणविष[ये](या) येषां ते **महाद्युतयः**, तथा महत् बलं शारीरः प्राणो येषां ते **महाबलाः**, महत् यशः ख्यातिर्येषां ते **महायशसः**, तथा महेश इति महान् ईश ईश्वर इत्याख्या येषां ते **महेशाख्याः** क्वचित् '**महासोक्खा**' इति पाठः तत्र महत् सौख्यं येषां ते **महासौख्याः**, तथा महान् अनुभावो विशिष्टवैक्रियादिकरणविष[यो](या) अचिन्त्या शक्तिर्येषां ते **महानुभावाः**, [1]**वरवस्त्र(धरा) वरमाल्यधरा वराभरणधारिणः, अ[स्य च स्थि](व्युच्छि)त्तिनयार्थतया** द्रव्यास्तिकनयमतेन **अन्ये**[न] पूर्वोत्पन्नाः स्वायुःक्षये **च्यवन्ते अन्ये उत्पद्यन्ते**।

**मू० ता कहं ते राहुकम्मे आहिते ति वदेज्जा ? तत्थ खलु इमातो दो पडिवत्तीतो पण्णत्तातो। [2]तत्थ एगे एवमाहंसु- ता अत्थि णं से राहू देवे जे णं चंदं च सूरं च गेण्हति। (एगे) एवमाहंसु। एगे पुण० - ता नत्थि णं से राहू देवे जे णं चंदं च सूरं च गेण्हति। (एगे०।) तत्थ जे ते एवमाहंसु ता अत्थि णं से राहू देवे जे णं चंदं च सूरं च गेण्हति ते णं एवमाहंसु ता राहू णं देवे चंदं (च) सूरं च गेण्हमाणे बुद्धंतेणं गेण्हेत्ता बुद्धंतेणं मुयति**

---

१. वरवत्थधरा वरगंधधरा वरमल्लधरा - मूले। २. तत्थेगे - U।

**बुद्धंतेणं गेण्हित्ता मुद्धंतेणं मुयति मुद्धंतेणं गिण्हित्ता बुद्धंतेणं मुयति मुद्धंतेणं गिण्हित्ता मुद्धंतेणं मुयति, वामभुयंतेणं गिण्हित्ता वामभुयंतेणं मुयइ वामभुयंतेणं गिण्हित्ता दाहिणभुयंतेणं मुयइ दाहिणभुयंतेणं गेण्हित्ता वामभुयंतेणं मुयति दाहिणभुअंतेणं गेण्हित्ता दाहिणभुअंतेणं मुअइ। तत्थ जे ते एवमाहंसु ता णत्थि णं से राहू देवे जे णं चंदं (च) सूरं च गेण्हति ते णं एवमाहंसु तत्थ खलु इमे पण्णरस कसिणा पोग्गला पण्णत्ता तं० सिंघाडए जडिलए खेत्तए खरते अंजणे खंजणे सीतले हिमसीतले केलासे [1]अरुणप्पहे [2]पणिज्जए तसूवरए कविलिए पिंगलए राहू। ता जता णं एए पण्णरस कसिणा कसिण-पोग्गला सता चंदस्स वा सूरस्स वा लेसाणुबंधचारिणो भवंति, तता णं मणुस्सलोए मणुस्सा वतंति - एवं खलु राहू चंदं वा सूरं वा गेण्हति। ता जता णं एए पण्णरस कसिणा कसिणपोग्गला णो सता चंदस्स वा सूरस्स वा लेसाणुबंधचारिणो भवंति णो खलु त[त](ता) मणुस्सलोए मणुस्सा वतंति - एवं खलु राहू चंदं सूरं वा गेण्हति। एवं खलु राहू चं०। ए[गे](ए) एवमाहंसु।**

**टी०** **'ता कहं'** इत्यादि। **'ता'** इति पूर्ववत्, **कथं** केन प्रकारेण भगवन्! **त्वया राहुकर्म्म** राहुक्रिया **आख्यातमिति वदेत्** ? एवमुक्ते भगवानेतद्विषये (ये) द्वे परतीर्थिकप्रतिपत्ती ते उपदर्शयति - **'तत्थे'**त्यादि। **तत्र** राहुकर्म्मविषये **खल्विमे द्वे प्रतिपत्ती प्रज्ञप्ते**। **'तत्थेगे'**त्यादि। **तत्र** तेषां द्वयानां परतीर्थिकानां मध्ये **एके** परतीर्थिका **एवमाहुः** **'ता'**इति पूर्ववत्, **अस्ति** **'ण'**मिति वाक्यालङ्कारे **स राहुनामा देवो यश्चन्द्रं सूर्यं** [3]**वा गृह्णाति**। अत्रोपसंहारः - **'एगे एवमाहंसु।'** **एके**

१. अरुणाभे - S। २. परिज्जए - S। ३. मूले तु 'च' इति पाठः।

**पुनरेवमाहुः** '**ता**'इति पूर्ववत्, **नास्ति स राहुनामा देवो यश्चन्द्रं सूर्यं**[१] **वा गृह्णाति।** तदेवं प्रतिपत्तिद्वयमुपदर्श्य सम्प्रत्येतद्भावनार्थमाह - '**तत्थे**'त्यादि। **तत्र ये ते** वादिन **एवमाहुरस्ति स राहुनामा देवो यश्चन्द्रं सूर्यं**[२] **वा गृह्णातीति त एवमाहुः** त एवं स्वमतभावनिकां कुर्वन्ति '**ता राहू ण**'मित्यादि। '**ता**' इति पूर्ववत् **राहुर्देवश्चन्द्रं सूर्यं वा गृह्णन्** कदाचिद् **बुध्नान्तेन गृहीत्वा बुध्नान्तेनैव मुञ्चति** अधोभागेन गृहीत्वाऽधोभागेनैव मुञ्चतीति भावः, कदाचित् **बुध्नान्तेन गृहीत्वा मूर्द्धान्तेन मुञ्चति** अधोभागेन गृहीत्वा उपरिभागेन मुञ्चतीत्यर्थः, अथवा कदाचित् **मुर्द्धान्तेन गृहीत्वा बुध्नान्तेन मुञ्चति,** यदि वा **मूर्द्धान्तेन गृहीत्वा** तेनैव **मुञ्चति** भावार्थः प्राग्वत् भावनीयः, अथवा कदाचिद् **वामभुजान्तेन गृहीत्वा वामभुजान्तेन मुञ्चति** वामपार्श्वेन गृहीत्वा वामपार्श्वेनैव मुञ्चति, यदि वा **वामभुजान्तेन गृहीत्वा दक्षिणभुजान्तेन मुञ्चति,** अथवा कदाचित् **दक्षिणभुजान्तेन गृहीत्वा वामभुजान्तेन मुञ्चति,** यद्वा **दक्षिणभुजान्तेन गृहीत्वा दक्षिणभुजान्तेन मुञ्चति,** भावार्थः सुगमः। '**तत्थ जे ते**' इत्यादि। **तत्र** तेषां द्वयानां परतीर्थिकानां मध्ये **ये ते** वादिन **एवमाहुर्यथा नास्ति स राहुर्देवो यश्चन्द्रं सूर्यं वा**[३] **गृह्णा(ती)ति ते एवमाहुः** '**तत्थ ण**'मित्यादि। **तत्र** जगति '**ण**'[४]मिति वाक्यालङ्कारे **इमे** वक्ष्यमाणरूपाः **पञ्चदशभेदाः कृष्णाः पुद्गलाः प्रज्ञप्तास्तद्यथे-**त्यादिना तानेव दर्शयति। एते यथासम्प्रदायं वैविक्त्येन प्रतिपत्तव्याः। '**ता जया ण**'मित्यादि। **ततो यदा** '**ण**'मिति वाक्यालङ्कारे **एते**ऽनन्तरोदिताः **पञ्चदशभेदाः कृष्णाः पुद्गलाः कृत्स्नाः** समस्ताः '**सया**' इति **सदा** सातत्येन इत्यर्थः **चन्द्रस्य वा सूर्यस्य वा लेश्यानुबन्धचारिण**श्चन्द्रसूर्यबिम्बगतप्रभानुचारिणो **भवन्ति तदा मनुष्यलोके मनुष्या वदन्ति** यथा **एवं खलु राहुश्चन्द्रं वा सूर्यं वा गृह्णातीति।** '**ता जया ण**'मित्यादि। '**ता**' इति पूर्ववत्, **यदा** '**ण**'मिति पुनरर्थे

१-२-३. मूले तु 'च' इति पाठः। ४. मूले तु 'खलु' इति पाठः।

निपातस्यानेकार्थत्वात् यदा पुनरेते **पञ्चदश कृष्णाः पुद्गलाः** समस्ता **नो सदा** न सातत्येन **चन्द्रस्य सूर्यस्य वा लेश्यानुबन्धचारिणो भवन्ति, न खलु तदा मनुष्यलोके मनुष्या** एवं **वदन्ति** यथा **एवं खलु राहुश्चन्द्रं सूर्यं वा गृह्णातीति।** तेषामेवोपसंहारवाक्यमाह - '**एवं खलु**' इत्यादि। **एवमुक्तेन** प्रकारेण **राहुश्चन्द्रं सूर्यं वा गृह्णातीति** लौकिकं (वाक्यं) प्रतिपत्तव्यम्, न पुनः प्रागुक्तपरतीर्थिकाभिप्रायेण। भगवानाह - '**एते**' इत्यादि। **एते** परतीर्थिका **इत्येवमाहुः।**

**मू० वयं पुण एवं वदामो-ता राहू णं देवे महिड्डिए जाव [महेसक्खे](महाणुभावे) वरवत्थधरे जाव वराभरणधारी। राहुस्स णं देवस्स णव णामधेज्जा प०, तं० सिंघाडते जडिलए खेत्तते खरए दद्दुरे[1] मगरे मच्छे कच्छभे किण्हसप्पे। (ता) राहुस्स णं देवस्स विमाणा पंचवण्णा पण्णत्ता तं० किण्हा नीला लोहिता हालिद्दा सुक्किला। अत्थि कालए राहुविमाणे खंजणवण्णाभे पण्णत्ते। अत्थि णीलए राहुविमाणे लाउयवण्णाभे पण्णत्ते। अत्थि लोहितए राहु-(विमाणे) मंजिट्ठावण्णाभे (प०)। अत्थि [पीए](हालिद्दे राहुविमाणे) हालिद्दवण्णाभे (प०।) अत्थि सुक्किलए (राहुविमाणे) भासरासि-वण्णाभे पण्णत्ते।**

**टी०** '**वयं पुण**'इत्यादि। **वयं** पुनरुत्पन्नकेवलविदः केवलविदोपलभ्य **एवं वदामो** यथा '**ता राहू ण**'मित्यादि। '**ता**' इति पूर्ववत्, राहुः '**ण**'मिति वाक्यालङ्कारे **देवो** न परपरिकल्पितपुद्गलमात्रम्, स च देवो **महर्द्धिको महाद्युतिः महाबलो महायशा महासौख्यो महानुभावः**। एतेषां पदानामर्थः प्राग्वद्भावनीयस्तथा **वरवस्त्र(धरो) वरमाल्यधरो वराभरणधारी**। '**राहुस्स ण**'मित्यादि। तस्य च **राहोर्देवस्य नव नामधेयानि प्रज्ञप्तानि तद्यथा '**सिंघाडए**'** इत्यादि सुगमम्।

---

१. ढड्डरे - S।

**'ता राहुस्स ण'**मित्यादि। **'ता'** इति पूर्ववत् **राहोर्देवस्य विमानानि पञ्चवर्णानि प्रज्ञप्तानि**। किमुक्तं भवति ? पञ्च विमानानि पृथगेकै[के](कवर्ण)युक्तानि प्रज्ञप्तानि तद्यथा **'किण्हे[१] नीले'**इत्यादि सुगमम्, नवरं खञ्जनो दीपमल्लिकामलः **'लाउयवन्नाभे'** इति आ[र्द्रातुसु](र्द्रतुम्ब)वर्णा[भा](भम्)।

**मू० ता जया णं राहु(देवे) आगच्छमाणे वा गच्छमाणे वा विउव्वमाणे वा परियारेमाणे वा चंद(स्स वा सूरस्स वा) लेसं पुरच्छिमेणं आवरित्ताणं पच्चच्छिमेणं वीतिवतती, तता णं पुरच्छिमेणं चंदे (सूरे वा) उवदंसेति पच्चच्छिमेणं राहू। ता जता णं राहू देवे आगच्छमाणे वा जाव परियारेमाणे वा चंदस्स (वा सूरस्स वा) लेसं पच्चच्छिमेणं आवरित्ताणं पुरच्छिमेणं वीइवयइ, तया णं पच्चच्छिमेणं चंदे (वा सूरे वा) उवदंसेति पुरच्छिमेणं राहू। एवं एएणं अभिलावेणं दाहिणेणं आवरेत्ताणं उत्तरेणं वीतिवयति उत्तरेणं आवरेत्ता दाहिणेणं वीतिवयति, उत्तरपुरच्छिमेणं आवरेत्ता दाहिणपच्चच्छिमेणं वीतिवतति, दाहिणपच्चच्छिमेणं आवरेत्ता उत्तरपुरच्छिमेणं वीतिवयइ, दाहिणपुरच्छिमेणं आवरेत्ता उत्तरपच्चच्छिमेणं वीतिवतति, उत्तरपच्चच्छिमेणं आवरेत्ता दाहिणपुरच्छिमेणं वीतिवयति, तया णं उत्तरपच्चच्छिमेणं चंदे (वा सूरे वा) उवदंसेति दाहिणपुरच्छिमेणं राहू। ता जता णं राहू आगच्छमाणे वा गच्छमाणे वा (४) चंदस्स (वा सूरस्स वा) लेस्सं आवरे[ति](त्ता वीतिवयइ) तता णं मणुस्सलोगे मणुस्सा वतंति एवं खलु राहुणा चंदे (सूरे वा) गहिए। [२]ता जता णं राहू आगच्छमाणे वा ४ चंदस्स वा**

१. मूले तु 'किण्हा नीला' इत्यादि पाठो दृश्यते। २. एवं २, ता - Q, U।

**सूरस्स वा लेस्सं आवरेत्ता पासेणं वीतिवतति तता णं मणुस्सलोगे मणुस्सा वतंति एवं खलु चंदेणं (वा सूरेण वा) राहुस्स कुच्छी भिण्णा।** [१]**ता जता णं राहू आगच्छमाणे वा ४ चंद(स्स वा सूरस्स वा) लेस्सं आवरित्ताणं पच्चोसक्कति तता णं मणुस्सलोगे मणुस्सा वदंति एवं खलु राहुणा चंदे (वा सूरे वा) वंते।** [२]**ता जता णं राहू आगच्छमाणे वा (४) चंदस्स (वा सूरस्स वा) लेस्सं आवरेत्ताणं मज्झेणं वीतिवतति तता णं मणुस्सलोगे मणुस्सा वदंति एवं खलु राहुणा चंदे (वा सूरे वा) वतिचरिए।** [३]**ता जता णं राहू आगच्छमाणे वा ४ चंदस्स वा सूरस्स वा लेस्सं अहे सपक्खं सपडिदिसिं आवरेत्ताणं चिट्ठति तता णं मणुस्सलोए मणुस्सा वयंति एवं खलु राहुणा चंदे (वा सूरे वा)** [४]**घत्थे।**

टी० '**ता जया ण**'मित्यादि। '**ता**' इति **तत्र यदा राहुदेव आगच्छन्** कुतश्चित्स्थानात् **गच्छन्वा** क्वापि स्थाने **विकुर्वन्वा** स्वेच्छया तां तां विक्रियां कुर्वन्वा परिचरणबुद्ध्या इतस्ततो वा गच्छन् **चन्द्रस्य (वा सूर्यस्य) वा लेश्यां** विमानगतधवलिमानं '**पुरच्छिमेणं**' ति **पौरस्त्येनावृत्याग्रभागेनावृत्येत्यर्थः पाश्चा-त्यभागेन व्यतिव्रजति** (व्यति)क्रामति, **तदा** '[५]**ण**'मिति प्राग्वत् **पौरस्त्येन चन्द्रः सूर्यो वा** आत्मानं **दर्शयति पश्चिमभागेन राहुः**। किमुक्तं भवति ? तदा मोक्षकाले चन्द्रः सूर्यो वा पूर्व्वदिग्भागे प्रकट उपलभ्यते अधस्ताच्च पश्चिमविभागे राहुरिति। '[६]**एवं (ता) जया णं राहू**' इत्याद्यपि [७]दक्षिणोत्तरविषयं सूत्रं भावनीयम्। '[८]**एए[सि]ण**'मित्यादि। **एतेनानन्तरोदितेनाभिलापेन** '[९]**पच्चच्छिमेणं**'[१०] **आवरित्ता**

१. एवं ता - Q, R, U। २. एवं ता - Q, R। ३. एवं ता - U। ४. घत्थे एवं - R, U। ५. णमिति वाक्यालङ्कारे - E। ६. ता जया णं राहू - मूले। ७. मूले त्वत्र पश्चिमपूर्वविषयं सूत्रमस्ति। ८. एवं एएणं - मूले। ९. मूले त्वत्र दक्षिणोत्तरविषयं सूत्रमस्ति। १०. पच्चत्थिमेणं - T।

[१]**'पुरच्छिमेणं [वइय](वीइवयइ) उत्तरेणं आवरित्ता दाहिणेणं वीइवयइ'** इत्येतद्विषयेऽपि द्वे सूत्रे वक्तव्ये। ते चैवं **'ता जया णं राहू देवे आगच्छमाणे० विउव्वमाणे वा परियारेमाणे वा चंदस्स सूरस्स वा लेसं** [२]**पच्चच्छिमेणं (आवरित्ता पुरच्छिमेणं) वीइवयति, तया णं** [३]**पच्चच्छिमेणं चंदे सूरे वा उवदंसेइ** [४]**पुरच्छिमेणं राहू।'** एवं द्वितीयं सूत्रमपि वक्तव्यम्। [५]**'एवं ता जया ण'**मित्यादिनि [६]दक्षिणपूर्वोत्तरपश्चि[मा]मदक्षिणपश्चिमोत्तरपूर्वोत्तरपश्चिमदक्षिणपूर्वोत्तर-पूर्वदक्षिणपश्चिमविषयाण्यपि चत्वारि सूत्राणि भावनीयानि। **'ता जया ण'**मित्यादि सुगमम्, नवरमयं भावार्थो **यदा चन्द्रस्य सूर्यस्य वा (लेश्यामावृत्य** स्थितो भवति **राहुस्तदा** लोके एवमुक्तिर्यथा **राहुणा चन्द्रः सूर्यो वा गृहीत** इति। **यदा** तु **राहुर्लेश्यामावृत्य पार्श्वेन व्यतिक्रामति तदैवं** मनुष्याणामुक्तिः यथा **चन्द्रेण सूर्येण वा राहोः कुक्षिर्भिन्ना,** राहोः कुक्षिं भित्त्वा चन्द्रः सूर्यो वा निर्गत इति भावः। **यदा** च **राहुश्चन्द्रस्य सूर्यस्य वा) लेश्यामावृत्यावष्वष्कते** पश्चादेवाव-सर्प्पति **तदैवं मनुष्यलोके (मनुष्याः) प्रवदन्ति** यथा **राहुणा चन्द्रः सूर्यो वा वान्त** इति। **यदा च राहुश्चन्द्रस्य सूर्यस्य वा मध्यभागेन लेश्यामावृण्वन् व्यतिव्रजति** गच्छति **तदैवं मनुष्यलोके** प्रवादो (यथा) **चन्द्रः सूर्यो वा राहुणा व्यतिचरित** इति। किमुक्तं भवति ? [७]मध्यभागेन विभिन्न इति। [८]**यदा** च **राहुश्चन्द्रस्य सूर्यस्य वा 'सपक्ख'**मिति सह पक्षैरिति (सपक्षं) सर्वेषु पार्श्वेषु पूर्वापर-दक्षिणोत्तररूपेषु इत्यर्थः सह प्रतिदिग्भिः **स[म्]प्रतिदिक्,** सर्वास्वपि विदिक्षु इत्यर्थः, **लेश्यामावृत्याधस्तिष्ठति तदैवं** मनुष्यलोकोक्तिर्यथा **राहुणा चन्द्रः सूर्यो वा** सर्वात्मना **ग्रस्त** इति। आह चन्द्रविमानस्य पञ्चैकषष्टिभागन्यूनयोजनप्रमाणत्वात् राहुविमानस्य च ग्रहविमानत्वेनार्द्धयोजनप्रमाणत्वात्, कथं राहुविमानस्य सर्वात्मना

---

१. पुरत्थिमेणं - T। २. पच्चत्थिमेणं - T। ३. पच्चत्थिमेणं - T। ४. पुरत्थिमेणं - T। ५. 'एवं ता जया णं'-इति मूले नास्ति। ६. मूले तु क्रमोऽन्यथा दृश्यते। ७. मध्यमभागेन - T। ८. यदा राहुः - T।

चन्द्रविमानावरणसम्भवः ? उच्यते, यदिदं ग्रहविमानानामर्द्धयोजनमिति प्रमाणं तत्प्रायिकमवसेयम्। ततो राहोर्ग्रहस्योक्ताधिकप्रमाणमपि विमानं सम्भाव्यत इति न [कदा](का)चिदनुपपत्तिः। अन्ये पुनरेवमाहुः राहुविमानस्य महान् बहल[स्ति](स्त)-मिस्ररश्मिसमूहस्ततो लघीयसापि राहुविमानेन महता बहलेन [ति](त)मिस्ररश्मिजालेन प्रसरमभिरोहता सकलमपि चन्द्रमण्डलमाव्रियते ततो न कश्चिद्दोषः।

अथ राहोर्भेदं जिज्ञासिषुः प्रश्नयति -

**मू० ता कतिविहे णं राहू पण्णत्ते ? ता दुविहे राहू पण्णत्ते, तं जहा- धुवराहू य पव्वराहू य। तत्थ णं जे से धुवराहू से णं बहुलपक्खस्स पडिवए पण्णरसतिभागेण पण्णरसभागं चंदलेस्सं आवरेमाणे आ २ चिट्ठति, तं० पढमाए पढमं [1]भागं, बितियाए बितियं भागं जाव पण्णरसिए पण्णरसमं भागं, चरिमसमते चंदे रत्ते भवति, (अवसेसे समए चंदे रत्ते य विरत्ते य भवइ), तमेव सुक्कप[क्खस्स](क्खे) उवदंसेमाणे चिट्ठति तं० पढमाए पढमं भागं जाव पण्णरसमं भागं, चरिमे समए चंदे विरत्ते भवति, अवसेसे समए चंदे रत्ते य विरत्ते य भवति। तत्थ णं जे से पव्वराहू से जहन्नेणं छण्हं मासाणं उक्कोसेणं बातालीसाते मासाणं चंदस्स अडतालीसाए संवच्छराणं सूरस्स। ता से केणट्ठेणं एवं वुच्चति चंदे ससी चंदे ससी ? ता चंदस्स णं जोतिसिंदस्स जोतिसरण्णो मियंके विमाणे कंता देवा कंतातो देवीतो कंताइं आसणसयण-खंभभंडमत्तोवगरणाइं अप्पणा वि य णं चंदे जोतिसिंदे जोतिसराया सोमे कंते सुभगे य पियदंसणे सुरूवे, ता से तेणट्ठेणं एवं वुच्चति चंदे ससी चंदे ससी। ता से केणट्ठेणं एवं वुच्चति सूरे आइच्चे**

१. भागं जाव पण्णरसिए - U।

**२ ? ता सूरादिता णं समताति वा आवलिताति वा जाव ओसप्पिणीति वा उस्सप्पिणीति वा, से एएणट्टेणं एवं वुच्चति सूरे आदिच्चे सूरे आदिच्चे।**

टी० '**ता कतिविहे ण**'मित्यादि सुगमम्। भगवानाह - '**(ता) दुविहे**'त्यादि। **द्विविधो राहुः (प्रज्ञप्तः, तद्यथा)** [नित्य](**ध्रुव**)राहुः **पर्वराहुश्च**। तत्र यः सदैव चन्द्रविमानस्याधस्तात् चरति स ध्रुवराहुः यस्तु पर्वणि पौर्णमास्याममावास्यायां वा यथाक्रमं चन्द्रस्य सूर्यस्य वोपरागं करोति स पर्वराहुः, **तत्र योऽसौ ध्रुवराहुः (स) बहुलपक्षस्य** - कृष्णपक्षस्य सम्बन्धिन्याः **प्रतिपद** आरभ्य प्रतितिथि आत्मीयेन **पञ्चदशविभागेन पञ्चदशभागं** २ चन्द्रस्य लेश्या**मावृण्वन्तिष्ठति, तद्यथा प्रथमायां** प्रतिपल्लक्षणायां तिथौ **प्रथमं** पञ्चदश**भागं द्वितीयस्यां** [१]**द्वितीयं** तृतीयस्यां तृतीयं **यावत्पञ्चदश्यां पञ्चदशं**, ततः पञ्चदश्यां तिथौ **चरमसमये** पञ्चदशतिथिचरमसमये **(चन्द्रः) रक्तो भवति** - राहुविमानेनोपरक्तो भवति, सर्वात्मना राहुविमानेनाच्छादितो भवतीत्यर्थः। **अ[थ](व)शेषसमये** प्रतिपद्द्वितीयातृतीयादिके **चन्द्रो रक्तश्च विरक्तश्च भवति**, देशेन राहुविमानेनाच्छादितो भवति देशतश्चानाच्छादित इत्यर्थः। शुक्लपक्षस्य प्रतिपद आरभ्य पुनस्**तमेव** पञ्चदशभागं प्रतितिथि **उपदर्शयन्** (प्रकटीकुर्वन् **तिष्ठति, तद्यथा -प्रथमायां** प्रतिपल्लक्षणायां तिथौ **प्रथमं**[२] पञ्चदश**भागं**) प्रकटीकरोति द्वितीयायां द्वितीयं एवं **यावत्**पञ्चदश्यां [३]पौर्णमास्यां **पञ्चदशं** पञ्चदश**भागं, चरमसमये** पौर्णमासी-(चरमसमये) **चन्द्रः** सर्वात्मना **विरक्तो भवति** सर्वात्मना प्रकटीभवतीत्यर्थः, [राहु]लेशतोऽपि राहुविमानेना(ना)च्छादितत्वात्। आह शुक्लपक्षे कृष्णपक्षे वा कतिपयान् दिवसान् यावत् राहुविमानं वृत्तमुपलभ्यते, यथा ग्रहणकाले पर्वराहोः,

१. बितियं भागं जाव पण्णरसिए - मूले। २. पढमं भागं जाव पण्णरसमं - मूले। ३. पौर्णमास्यां पञ्चदशभागं - G।

कतिपयांश्च दिवसान् याव[तं](न्न) तथा ततः किमत्र कारणमिति ? उच्यते, इह येषु दिवसेष्वतिशयेन तमसाभिभूयते (शशी) तेषु तद्विमानं वृत्तमाभाति, चन्द्रप्रभाया बाहुल्येन प्रसराभावतो राहुविमानस्य यथावस्थिततयोपलम्भात्, येषु पुनश्चन्द्रो भूयान् प्रकटो भवति तेषु न चन्द्रप्रभा राहुविमानेनाभिभूयते, किन्त्वतिबहलतया चन्द्रप्रभयैव स्तोकं २ राहुविमाने प्रभाया अभिभवः ततो न वृत्ततोपलम्भः, [एवं](पर्व)राहुविमानं च ध्रुवराहुविमानादतीवतमोबहुलमतस्तस्य स्तोकस्यापि न चन्द्रप्रभयाभिभवसम्भव इति त[तः](स्य) स्तोकरूपस्यापि वृत्तत्वेनोपलब्धिः, तथा चाह **विशेषणवत्यां जिनभद्रगणिक्षमाश्रमणः 'वट्टच्छेओ कइवयदिवसे धुवराहुणो विमाणस्स। दीसइ परं न दीसइ जह गहणे पव्वराहुस्स॥१०६॥'** आचार्य आह - **'अच्चत्थं नहि तमसाभिभूयते जं ससी विमु[क्खंते](च्चंतो)। तेणं न [ट्ट](वट्ट)च्छेओ गहणे उ तमो तमोबहुलो ॥१०७॥'** **'तत्थ णं जे से'** इत्यादि। **तत्र योऽसौ पर्वराहुः स जघन्येन षण्णां मासानामुपरि** चन्द्रस्य सूर्यस्य चोपरागं करोति, **उत्कर्षतो द्वाचत्वारिंश[तां](तो) मासानामुपरि चन्द्रस्य अष्टाचत्वारिंशतः संवत्सराणामुपरि सूर्यस्य।** सम्प्रति चन्द्रस्य लोके शशीति यदभिधानं प्रसिद्धं तस्यान्वर्थतावगमनिमित्तं प्रश्नं करोति - [१]**'ता कहं ते'**इत्यादि। **'ता'**इति पूर्ववत्, **कथं** केन प्रकारेण (के)नान्वर्थेनेति भावश्चन्द्रः **शशी**त्याख्यात इति वदेत्? भगवानाह - **'ता चंदस्स ण'**मित्यादि। **'ता'** इति पूर्ववत्, **चन्द्रस्य ज्योतिषेन्द्रस्य ज्योतिषराजस्य मृगाङ्के** - मृगचिह्ने **विमाने**ऽधिकरणभूते **कान्ताः** - कमनीयरूपा **देवाः कान्ता देव्यः कान्तानि** च **आसनशयनस्तम्भभाण्डमात्रोपकरणानि आत्मनापि चन्द्रो देवः (ज्योतिषेन्द्रो ज्योतिषराजः)** [सोमो](**सौम्यो**)-ऽरौद्राकारः, (**कान्तः**) कान्तिमान्, **सुभगः** सौभाग्ययुक्तत्वाद्वल्लभो जनस्य, प्रियं प्रेमकारि दर्शनं यस्य स **प्रियदर्शनः**, शोभनमतिशायि रूपमङ्गप्रत्यङ्गावय-

---

१. मूले तु एवं पाठो दृश्यते - 'ता से केणट्ठेणं एवं वुच्चति चंदे ससी चंदे ससी?

वसन्निवेशविशेषो यस्य स **सुरूपः**। **'ता' तत** एवं खलु अनेन कारणेन [1]**चन्द्रः शशी चन्द्रः शशी**त्याख्यात इति वदेत्। किमुक्तं भवति ? सर्व्वात्मना कमनीयत्वलक्षणमन्वर्थमाश्रित्य चन्द्रः शशीति व्यपदिश्यते। कया व्युत्पत्त्येति चेत् ? उच्यते, इह **'शश कान्ता'**विति धातुरदन्तश्चौरादिकोऽस्ति। चुरादयो हि धातवो अपरिमिता न तेषामियत्तास्ति केवलं यथालक्ष्यमनुसर्त्तव्याः। अत एव **चन्द्रगोमी** चुरादिगणस्यापरिमिततया परमार्थतो यथालक्ष्यमनुसरणमवगम्य द्वित्रानेव चुरादिधातून्पठितवान् (न) भूयसः। ततो णिगन्तस्य शशनं शश इति घञ्-प्रत्यये शश इति भवति शशोऽस्याऽस्तीति शशी (स्व)विमानवास्तव्यदेवदेवीशयनासनादिभिः सह कमनीयकान्तिकलित इति भावः, अन्ये तु व्याचक्षते शशीति सह श्रिया वर्त्तते इति (स)श्रीः प्राकृतत्वाच्च शशीति रूपम्। [2]**'ता कहं ते'**इत्यादि। **'ता'** इति पूर्व्ववत्, **कथं** - केन प्रकारेण केनान्वर्थेनेति भावः **सूर्य आदित्य** इत्याख्यात इति वदेत् ? भगवानाह - **'ता सूराइया'** इत्यादि। सूर आदिः प्रथमो येषां ते **सूरादिकाः** के इत्याह **'समयाति वा' समया** अहोरात्रादिकालस्य निर्व्विभागा भागास्ते सूरादिकाः सूरकारणास्तथाहि सूर्योदयमवधिं कृत्वाऽहोरात्राऽऽरम्भकः समयो गण्यते, नान्यथा, एवमावलिकादयोऽपि सूरादिका भावनीयाः नवरमसङ्ख्येयसमयसमुदायात्मिका आवलिका, [अ]सङ्ख्येया आवलिका एक आनप्राणः, द्विपञ्चाशदधिकत्रिचत्वारिंशच्छतसङ्ख्यावलिका एक आनप्राण इति वद्धसम्प्रदायस्तथा चोक्तं **'एगो आणापाणू तेयालीसं सया उ बावण्णा। आवलियपमाणेणं अणंतनाणीहिं निद्दिट्ठो॥'** सप्ताऽऽनप्राणप्रमाणः स्तोकः यावत् शब्दात् मुहूर्त्तादयो द्रष्टव्यास्ते च सुगमत्वात् स्वयं भावनीयाः। [3]**'एवं खलु'** इत्यादि **एवमनेन** कारणेन **खलु** निश्चितः **सूर आदित्य**(२) इति वदेत्, आदौ भव आदित्यो बहु(ल)वचनात् त्यप्रत्यय इति व्युत्पत्तेः।

---

१. चन्द्रः शशीत्याख्यात इति वदेत् - C। २. मूले त्वेवं पाठो दृश्यते-'ता से केणट्ठेणं एवं वुच्चति सूरे आइच्चे २ ?' ३. 'से एएणट्ठेणं एवं वुच्चति.....' इति मूले पाठः।

मू० ता चंदस्स णं जोतिसिंदस्स जोतिसरण्णो कति अग्गमहिसीओ पण्णत्ताओ ? ता चत्तारि अग्गमहिसीओ पण्णत्ताओ तं जहा चंदप्पहा दोसिणाभा अच्चिमाली पभंकरा। तत्थ णं एगमेगाए देवीए चत्तारि २ एवं तं चेव पुव्वभणितं अट्ठारसमे पाहुडे तहा णेयव्वं जाव मेहुणवत्तियं। एवं सूरस्सवि। ता [सूरियचंदमा]-(चंदिमसूरिया) णं जोतिसिंदा जोतिसरायाणो केरिसए कामभोगे पच्चणुभवमाणे विहरंति ? ता से जहाणामए केति पुरिसे पढम-जोव्वणुट्ठाण(बलसमत्थे) पढमजोव्वणुट्ठाणबलसमत्थाए चेव भारि-ताए सद्धिं अचिरवत्तविवाहे अत्थत्थी अत्थगवेसणताए सोलसवास-विप्पवासिते। ता से णं ततो लद्धट्ठे कतकज्जे अणहसमग्गे पुणरवि [१]नियगं गिहं हव्वमागते ण्हाते जाव सरीरे मणुण्णं थालिपागसुद्धं अट्ठारसवंजणाउलं भोयणं भुत्ते समाणे तंसि तारिसगंसि वासघरंसि अब्भिंतरतो सचित्तकम्मे बाहिरतो दुमितघट्ठमट्ठे विचित्तउल्लोयचिल्ल-गतले मणिरयणपणासियंधकारे बहुसम(सुविभत्त)रमणिज्जभूमिभागे पंचवण्णसरससुरभिमुक्कपुप्फपुंजोवयारकलिते काला[ग](गु)रुपवर-कुंदुरुक्क(तुरुक्क)धूवमघमघेंतगंधुद्धुयाभिरामे सुगंधवरगंधिए गंधवट्टि-भूए तंसि तारिसगंसि सयणिज्जंसि सालिंगणवट्टिए उभतो बिब्बोयणे दुहतो उण्णए मज्झेण य गंभीरए गंगापुलिणवालुतोद्दालसा[२]लिसते तोतवितखोमितदुगुल्लपट्टपडिच्छायणे सुविरतियरयत्ताणे रत्तंसुतसंवुडे सुरंमे आईणगरूयबूरणवणीततूलफासे सुगंधवरकुसुमचुण्णसयणो-वयारकलिए ताए तारिसियाए सिंगारागारचारुवेसाए संगय जाव

१. सयं - H। २. .....सरिसए - U, V।

**जोव्वणविलासकलिताए अणुरत्ताए अविरत्ताए मणाणुकूलाए (भारियाए) सद्धिं (एगंतरतिपसत्ते) अण्णत्थ कत्थइ मणं अकुव्वमाणे इट्ठे सद्दफरिसरसरूवगंधे पंचविहे माणुस्सए कामभोगे पच्चणुभवमाणे विहरेज्जा। ता से णं पुरिसे तंसि णं कालसमयंसि केरिसतं सातासोक्खं पच्चणुभवमाणे विहरति ? ओरालं समणाउसो ! तस्स णं पुरिसस्स कामभोगेहिंतो वाणमंतराणं देवाणं एत्तो अणंतगुणविसिट्ठतरगा चेव कामभोगा, वाणमंतराणं देवाणं कामभोगेहिंतो असुरिंदवज्जियाणं भवणवासीणं देवाणं एत्तो अणंतगुणविसिट्ठतरगा चेव कामभोगा ३, असुरिंदवज्जिताणं भवण जाव भोगेहिंतो असुरकुमाराणं एत्तो अणंतगुण०, असुरकुमारदेवकामभोगेहिंतो गहगणणक्खत्ततारारूवाणं जोतिसियाणं देवाणं एत्तो अणंत०, गहगणणक्खत्त जाव कामभोगेहिंतो चंदिमसूरियाणं जोतिसियाणं जोतिसराईणं इत्तो अणंतगुणविसिट्ठतरगा चेव कामभोगा। ता चंदिमसूरिया णं जोतिसिंदा जोतिसरायाणो एरिसते कामभोगे (पच्चणुभवमाणा) विहरंति।**

टी० '**ता चंदस्स ण**'मित्यादिसूत्रमग्रमहीषीविषयं पूर्व्ववद्वेदितव्यं प्रस्तावानुरोधाच्च भूय उक्तमित्यदोषः। '**ता चंदिम**' इत्यादि। '**ता**' इति पूर्ववत्, **चन्द्रसूर्या** '**ण**'मिति वाक्यालङ्कारे **ज्योति[षी](षे)न्[द्रो](द्रा) ज्योतिषराजाः किदृशान्कामभोगान्प्रत्यनुभवन्तो विहरन्ति** [वा] (अव)तिष्ठन्ते? भगवानाह - '**ता से जहे**'त्यादि। '**ता**' इति पूर्व्ववत्, '**से**' इत्यनिर्द्दिष्टो **यथानाम कोऽपि पुरुषः** प्रथमयौवनोत्थाने प्रथमयौवनोद्गमे यद्बलं शारीरः प्राणस्तेन समर्थः **प्रथमयौवनोत्थानबलसमर्थया भार्यया** सह **अचिरवृत्तविवाहः** सन् **अर्थार्थी**

**अर्थगवेष[णाय](णतया)** अर्थगवेषणनिमित्तं **षोडशवर्षाणि** यावत् [षोडशविशेष] **विप्रोषितो**-देशान्तरे प्रवासं कृतवान्। **ततः** षोडशवर्षानन्तरं **स** पुरुषो **लब्धार्थः** प्रभूतविढपितार्थः (**कृतकार्यः** - निष्ठिताखिलप्रयोजनः) '**अणहसमग्गे**'त्ति अनघं-अक्षतं न पुनरपान्तराले केनापि चौरादिना विलुप्तं समग्रं द्रव्यभाण्डोपकरणादि यस्य स तथा, स[न्] (च) **पुनरपि निजकं गृहं शीघ्रमागतः**, ततः **स्नातः**[1] कृत-बलिकर्म्मा कृतकौतुकमङ्गलप्रायश्चित्तः शुद्धप्रवेष्याणि-वेषोचितानि प्रवराणि वस्त्राणि परिहितो निवसितः '**अप्पमहग्घाभरणालंकियसरीरे**' इति अल्पैः स्तोकैर्महार्घैः महामूल्यैराभरणैरलङ्कृतशरीरो, **मनोज्ञं** कलमौदनादि, स्थाली पिठरी तस्यां पाको यस्य तत्तथा, अन्यत्र हि [तं](तत्) पक्वं न सुपक्वं भवतीतीदं विशेषणं शुद्धं भक्तदोषवर्जितं, स्थालीपाकं च तत् शुद्धं च **स्थालीपाकशुद्धं**, '**अट्ठारसवंजणा-उल**'मिति अष्टादशभिर्लोकप्रतीतैर्व्यञ्जनैः शालनकतक्रादिभिराकुलं संकीर्ण्णं यत् तत्तथा, अथवा अष्टादशभेदं च तत् व्यञ्जनाकुलं (च **अष्टादशव्यञ्जनाकुलं**) शाकपार्थिवादिदर्शनाद्भेदशब्दलोपः, अष्टदश च भेदा इमे '**सुओ१दणो२ जवण्णं३ तिन्निय मंसाइं६ गोरस७ जूसो८। भक्खा९ गुललावणिया१० मूलफला११ हरियगं१२ डागो१३॥१॥ होइ रसालू य तहा१४ पाणं१५ पाणीय१६ पाणगं चेव१७। अट्ठारसमो सागो१८ निरुवहओ लोइओ पिंडो॥२॥**' इदं गाथाद्वयमपि सुगमम्, नवरं मांसत्रयं - जलजादिसत्कं, जूषो-मुद्गतण्डुलजीरककटुभाण्डादिरसः, भक्ष्याणि- खण्डखाद्यानि, [2]गुडलावणिका - लोकप्रसिद्धा गुडपर्प्पटिका गुडधाना वा, मूलफलानीत्येकमेव पदं द्वन्द्वसमासरूपं, हरितकं - जीरकादि, डागो-वस्तुलादि-भर्जिका, रसालू - मर्जिका तल्लक्षणमिदं - '**दो घयपला महुपलं दहिस्स अद्धाढयं मिरिय वीसा। दस खंडगुल पलाइं एस रसालू निवइजोग्गो॥१४१६॥**' (**प्रवचनसारोद्धारः**) इति, पानं-सूरादि, पानीयं-जलं, पानकं-द्राक्षापानादि,

---

१. ण्हाते जाव सरीरे - मूले। २. गुललावणिका - E।

शाकस्तक्रसिद्धः, एवम्भूतं **भोजनं भुक्तः सन् तस्मिन् तादृशे वासगृहे**, किंविशिष्टे इत्याह - अन्तः**सचित्रकर्म्मणि 'बहीं**[१] **दूमियघट्टेमट्टे'**त्ति **दुमिए** - सुधापङ्कधवलिते, घृष्टे पाषाणादिना उपरि घर्षिते, ततो मृष्टे - मसृणीकृते, तथा विचित्रैर्नानारूपैरुल्लोचैश्चन्द्रोदयैराकीर्ण्णं क्वचित् **'चिल्लगतले'**त्ति [पाठ]सूत्र(पाठः) चिल्लगं-देदीप्यमानं गृहमध्यभागे उपरितनं तलं यस्य तत्तथा तस्मिन्, [२]बहुसमः - प्रभूतसमः सुविभक्तः - सुविच्छित्तिको भूमिभागो यत्र तस्मिन्, तथा **मणिरत्नप्रणाशितान्धकारे**, तथा कालागुरुप्रवरकुन्दुरुष्कतुरुष्कधूपस्य यो गन्धो मघमघायमान उद्भूत इतस्ततो विप्रसृतस्तेनाभिरामं रमणीयं तस्मिन्, (तत्र कुंदुरुक्कं सिल्हकं), तथा शोभनो गन्धस्तेन कृत्वा (ग्रंथाग्रं-९,३१०) वरगन्धिकं वरो गन्धो वरगन्धः सोऽस्यास्तीति वरगन्धिकं, [त]'(अ)**तोऽनेकस्वरात्**' (**मलयगिरिशब्दानुशासने तद्धिते ७/१४**) इक-प्रत्ययस्तस्मिन्, गन्धवर्त्तिभूते, **तस्मिन् तादृशे शयनीये**, किंविशिष्टे? [३]**उभयोः** पार्श्वयो**रुन्नते मध्येन च** मध्यभागेन च गम्भीरे **'सालिंगणवट्टिए'** इति सहालिङ्गनवर्त्या शरीरप्रमाणेन उपधानेन वर्त्तते यत् तत्तथा तस्मिन्, तथा **'उभओ बिब्बोयणे'** इति **उभयोः** प्रदेशयोः शिरो[रु]ऽन्तपा[द्वेरुप]-(दान्त)लक्षणयोः **बिब्बोयणे** [वरु](उ)पधानके यत्र तत्तथा तत्र, क्वचित् **'पन्नत्तगंडबिब्बोयणे'** इति पाठः, तत्रैवं व्युत्पत्तिः प्रज्ञया विशिष्टपरिकर्म्मविषयया बुद्ध्या आप्ते प्राप्ते [इ](अ)तीव सुष्ठु परिकर्म्मिते इति भावः गण्डोपधानके यत्र तत्तथा (तत्र), क्वचित् **'सुरंमे'**[४] सुष्ठु अतिशयेन रम्ये मनोरमणयोग्ये, **'गंगापुलिणवालुओद्दालसालिसए'** गंगापुलिनवालुकाया(म)वदालोऽवदालनं पदातिन्यासोऽधोगमनमिति भावः तेन सदृशकमतिमृदुत्वात् यत् तत्तथा तत्र, **'ओयवियखोमिल-**

१. 'बाहिरतो दुमितघट्ठमट्ठे' - मूले। २. मूले तु 'मणिरयणपणासियंधयारे' इति पदं पूर्वमुपन्यस्तं, ततः 'बहुसम...'इति पदमुपन्यस्तं, ततश्च 'पंचवण्ण...'इति पदमुपन्यस्तम्। टीकायां 'बहुसम...'इति पदस्य टीका पूर्वं दृश्यते, ततः 'मणिरयण...'इति पदस्य टीका दृश्यते, 'पंचवण्ण...'इति पदस्य तु टीका न दृश्यते। ३. मूले तु इत्थं पाठो दृश्यते - 'सालिंगणवट्टिए उभओ बिब्बोयणे दुहतो उण्णए मज्झेण य गंभीरए।' ४. मूले तु 'सुरंमे' इति पदं 'रत्तंसुतसंवुडे' इति पदात्पश्चाद्दृश्यते।

**दुकुलपट्टपडिच्छायणे**' इति ओयवियं सुपरिकर्म्मि[कं](तं) (क्षौमिकं) दुकुलं कार्प्पासिक(मतसी)मयं वा वस्त्रं तस्य युगलरूपो यः पट्टशाटकः सप्रतिच्छादनमाच्छादनं यस्य तत्तथा (तत्र), '[१]**रत्तंसुयसंवुडे**' रक्तांशुकेन - मशकगृहाभिधानेन वस्त्रविशेषेण संवृते समन्ततः आवृते, '**आईणगरुयबूरनवणीयतूलफासे**' आजिनकं चर्म्ममयो वस्त्रविशेषः स च स्वभावादतिकोमलो भवति रुतं-कार्प्पासपक्ष्म बूरो-वनस्पतिविशेषः नवनीतं-म्रक्षणं तूलोऽर्कतूल एतेषामिव स्पर्शो यस्य तत्तथा तत्र, '**सुगंधवरकुसुमचुन्न(स)यणोवयारकलिए**'त्ति सुगन्धीनि यानि वरकुसुमानि ये च सुगन्धचूर्णाः पटवासादयो ये च एतद्व्यतिरिक्तास्तथाविधाः शयनोपचारास्तैः कलिते, **(तया) तादृशया** वक्तुमशक्यस्वरूपतया पुण्यवतां योग्यया, '**सिंगा(रागा)रचारुवेसाए**' इति शृङ्गारः शृङ्गाररसपोषक आकारः संनिवेशविशेषो यस्य स शृङ्गाराकारः इत्थम्भूतश्चारुः शोभनो वेषो यस्याः सा तथाभूता तया, [२]'**संगयगयहसियभणियचिट्ठियसंलावविलासनिउणजुत्तोवयार[कलिया](कुसला)ए**' सङ्गतमुपपन्नं यत् गतं गमनं सविलासं चङ्क्रमणमित्यर्थः हसितं (स)प्रमोदं कपोलसूचितं हसनं भणितं मन्मथोद्दीपिका विचित्रा भणितिश्चेष्टितं सकाममङ्गप्रत्यङ्गावयवप्रदर्शनपुरस्सरं प्रियस्य पुरतोऽवस्थानं संलापः प्रियेण सह सप्रमोदं सकामं परस्परं संकथा एतेषु विलासेन सुभगलीलया यो निपुणः सक्ष्मबुद्धिगम्योऽत्यन्तकामविषयपरमनैपुण्योपेत इत्यर्थः युक्तो देशकालोपपन्न उपचारस्तत्कुशलया, **अनुरक्तया** - अनुरागवत्या, तथा कदाचिदप्य**विरक्तया मनोनुकूलया भार्यया सार्द्धमेकान्तेन रतिप्रसक्तो** - रमणप्रसक्तो, **अन्यत्र कुत्राऽपि मनोऽकुर्वन्** अन्यत्र मनःकरणे न हि यथावस्थितमिष्टभार्यागतं कामसुखमनुभवति, **इष्टान्[३]शब्दरसस्पर्शरूपगन्धान् पञ्चविधान् मानुषान्** मनुष्यभवसम्बन्धिनः **कामभोगान् प्रत्यनुभवन्** प्रतिशब्द आभिमुख्ये संवेदयमानो

१. मूले तु 'रत्तंसुयसंवुडे' इति पदस्य पूर्वं 'सुविरतियरयत्ताणे'इति पदं दृश्यते। 'सुविरतिय....'इति पदस्य टीका न दृश्यते। २. मूले त्वत्र 'संगय जाव जोव्वणविलासकलियाए' इति पाठो दृश्यते। ३. मूले तु 'सद्दफरिसरसरूवगंधे'इति पाठो दृश्यते।

**विहरेद**वतिष्ठेत्। '**ता से ण**'मित्यादि। तावत्शब्दः क्रमार्थः, आस्तामन्यदग्रेतनं वक्तव्यं इदं **तावत्** कथ्यतां **स पुरुषस्तस्मिन्कालसमये** कालेन तथाविधेनोपलक्षितः समयोऽवसरः कालसमयः तस्मि**न्कीदृशं** [स्यात्](**सात**)रूपमाह्लादरूपं **सौख्यं प्रत्यनुभवन् विहरति** ? एवमुक्ते गौतम आह '**ओरालं समणाउसो**' हे भगवन् हे **श्रमण** हे **आयुष्मन् उदार**मत्यद्भुतं सातसौख्यं प्रत्यनुभवन् विहरति। भगवानाह - '**तस्स ण**'मित्यादि। **एत्तो** एतेभ्यस्तस्य **पुरुषस्य** सम्बन्धिभ्यः **कामभोगेभ्यो वानमन्तराणां देवानामनन्तगुणविशिष्टतरा** एवं अनन्तगुणतया मनोरमतरा **एव कामभोगाः**, [१]**एतेभ्योऽपि वानमन्तराणां देवानां कामभोगेभ्योऽसुरेन्द्रवर्जितानां (भवनवासिनां) देवानामनन्तगुणविशिष्टतरा एव कामभोगा, (ए)तेभ्योऽप्यनन्तगुणविशिष्टतरा असुरकुमाराणां देवानां** कामभोगास्तेभ्योऽप्य**नन्तगुणविशिष्टतरा ग्रहनक्षत्रतारारूपाणां देवानां** कामभोगास्तेभ्योऽप्य**नन्तगुणविशिष्टतरा कामभोगाश्चन्द्रसूर्याणाम्। एतादृशान् चन्द्रसूर्या ज्योतिषेन्द्रा ज्योतिषराजाः कामभोगान् प्रत्यनुभवन्तो विहरन्ति।**

